श्रीदलपतिराजविरचितं

श्रीनृसिंहसहस्रनामभाष्यम्

सहस्रनामस्तोत्रादिभूषितम्

सूर्यनारायणनागेन्द्रभट्टः

आरामपुरम्

8
H
466

लक्ष्मीनृसिंहप्रकाशनम्, हित्तलळिळ.

५८१३४७

20466

प्रथमसंस्करणम् १९९७

नवदिल्लीस्थराष्ट्रियसंस्कृतसंस्थानस्य सम्पत्साहाय्येन प्रकाशितम्

(C)सूर्यनारायणनागेन्द्रभट्टः हित्तलळ्ळि ५८१ ३४७

अशीतिरूप्यकाणि

Rupees Eighty only

प्राप्यस्थानम्

श्रीनागेन्द्र अनन्त भट्टः

हित्तलळ्ळि यल्लापुर(उ.क.)

कर्णाटकराज्यम्

५८१ ३४७

विषयानुक्रमणिका

विज्ञापनम्	
सङ्केतविवरणम्	१२
श्रीनृसिंहसहस्रनामस्तोत्रम्	**१३-३४**
श्रीनृसिंहसहस्रनामभाष्यम्	**३५-१८६**
भक्तेः पुरुषार्थत्वम्	३५
भक्तिलक्षणम्	३५
भक्तेः पुरुषार्थत्वसमर्थनम्	३६
भक्तिवृत्तिनिरूपणम्	३६
भक्तिभेदः	३८
ामकीर्तनस्य वैधत्वादिविचारः	३९
ायश्चित्तान्तरावैयर्थ्यम्	४०
ाणानाम् विवक्षितस्वार्थत्वादिविचारः	४३
मांसकमतम्	४३
ाभिप्रायकथनम्	४३
यश्चित्तानामगतार्थता	४५
मसहस्रस्य पूर्ववृत्तान्तः	४५
हिरण्यकशिपोर्वरप्राप्तिः	४६
अनन्तरवृत्तकथनम्	४७
प्रह्लादवृत्तान्तः	४८
ामसहस्रकथनम्	४९
स्रनामस्तोत्रस्य जप्यमन्त्रत्वम्	४९

नामकीर्तनमात्रत्वाशङ्का ४९

जपकीर्तनयोर्भेदः ५०

मन्त्राणामपि सार्थकत्वम् ५०

श्रीनृसिंहसहस्रनामस्तोत्रमन्त्रस्य विशेषः ५१

अर्थपूर्वकजपे फलविशेषः ५१

ध्याननिरूपणम् ५२

अवतारचातुर्विध्यम् ५४

युगावताराः ५४

मन्वन्तरावताराः ५४

कल्पावताराः ५४

विष्णोः पञ्चात्मकत्वम् ५६

सामान्यलक्षणम् ५६

निराकारलक्षणम् ५६

पुरुषलक्षणम् ५६

विष्णुरूपम् ५७

विष्णोः स्वरूपलक्षणम् ५७

ब्रह्मरुद्रविष्णूनां लक्षणानि ५७

पुरुषस्वरूपम् ५७

कृतार्थतासिद्धिक्रमः ५८

ध्यानश्लोकार्थः ५८

द्वितीयध्यानश्लोकविचारः ६०

सहस्रनामात्मकग्रन्थस्यैकमन्त्रता ६१

प्रथमशतकम् ६१

नमःशब्दसार्थक्यम् ६२
नृसिंहस्य सर्वगत्वादिसमर्थनम् ६३
प्रकारान्तरम् ६३
नरसिंहशब्दस्य जीवेश्वरपरत्वादिविचारः ६४
जीवशरीरादिनिरूपणम् ६[illegible]
नारसिंहव्यपदेशसार्थक्यम् ६[illegible]
पौनरुक्त्याशङ्कानिरासः ६७
वासुदेवशब्दार्थः ६७
पुरुषशब्दार्थः ७२
द्वितीयशतकम् ८०
प्रमितशब्दार्थः ८२
षट्चक्रनिरूपणम् ८४
हरिशब्दार्थः ८५
परमात्मशब्दार्थः ८६
अक्षरशब्दार्थः ८८
विभावशब्दार्थः ९३
तृतीयशतकम् ९[illegible]
शतमूर्तिशब्दार्थः ९[illegible]
मायाविद्ययोर्भेदः ९[illegible]
सूक्ष्मशब्दार्थः १००
चतुर्थशतकम् १०४
मायानिरूपणम् १०७
विकुण्ठशब्दार्थः ११[illegible]

हरिहरयोरभेदः	११३
अप्रमेयशब्दार्थः	११६
पञ्चमशतकम्	**११७**
निरविद्यशब्दार्थः	११७
सद्योजातशब्दार्थः	११८
पद्मनाभशब्दार्थः	१२०
पञ्चब्रह्मशब्दार्थः	१२३
महाविष्णुशब्दार्थः	१२४
षष्ठशतकम्	**१२७**
निमेषादियुगान्तकालनिरूपणम्	१३१
आत्मस्वरूपादिनिरूपणम्	१३३
स्वाहाकारार्थः	१३४
मन्त्रराजविद्या	१३५
सप्तमशतकम्	**१३८**
योगनिरूपणम्	१३९
सौम्यशब्दार्थः	१४१
अप्रमितशब्दार्थः	१४४
अष्टमशतकम्	**१४९**
शुभ्रशब्दार्थः	१५३
दृढशब्दार्थः	१५७
अग्निनेत्रशब्दार्थः	१६०
नवमशतकम्	**१६१**
सोमशब्दार्थः	१६६

जीवस्वरूपादिनिरूपणम्	१६७
रामशब्दार्थः	१७०
दशमशतकम्	**१७२**
इन्द्रियशब्दार्थः	१७२
ईशानशब्दस्य विष्णुवाचित्वम्	१७३
शिशुचारशब्दार्थः	१७५
पञ्चविंशतिमूर्त्यादिशब्दार्थः	१७६
मतभेदेन मुक्तिस्वरूपकथनम्	१७[illegible]
उपसंहारग्रन्थार्थः	१८२
श्रीनृसिंहसहस्रनामावलिः	१८[illegible]
टिप्पणी	**२०१**
सहस्रनामानुक्रमणिका	**२२१**
भाष्योदाहृतप्रमाणवाक्यसूचिः	**२४१**
आकरग्रन्थसूचिः	**२५[illegible]**

विज्ञापनम्

आलम्ब्य यद्भक्तितरिं महान्तस्तरन्ति संसारमहासमुद्रम्।
आरामपल्लीनिलयं नमामो लक्ष्मीनृसिंहं कुलदैवतं नः।

श्रीनृसिंहसहस्रनामभाष्यं दलपतिराजविरचितं प्रकाशयितुं बुधानां सविधे निधातुञ्च नितान्तं सन्तोषमावहति नः स्वान्तम्। अस्य संशोधने पुण्यपत्तन(पूना)गत**भारतीयेतिहाससंशोधकमण्डलस्य** देवनागरीलिपिमय्या मातृकायाः प्रतिकृतिमात्रमुपायोजि, यदर्थं धन्यवादानर्हन्ति तदीया अधिकृताः। प्रतिलिपेस्ततः स्वीकरणे, अस्मदावासम्प्रति प्रेषणे च सुहृद्भिः सहकृतम्।

विदन्त्येव विद्वांसो विष्णोर्दिव्यसहस्रनामस्तोत्रस्य भगवत्पादादिप्रणीतं भाष्यम्। श्रीनृसिंहसहस्रनामभाष्यं तु न तथा प्रसिद्धम्, न वा क्वापि प्रकाशित पूर्वम्। विनैव व्याख्यानं केषाञ्चिन्नाम्नामर्थावगमो दुष्कर इति भाष्यमन्विष्य क्लेशेन च संशोध्य प्रकाशितम्। तदिदं दलपतिराजस्य नृसिंहप्रसादाख्य ग्रन्थादुद्धृतमिति तद्विषये किंचिदधस्तात्सङ्गृह्यते -

नृसिंहप्रसादम्-

अयमप्रकाशितपूर्वो धर्मशास्त्रग्रन्थः। अस्य विशालकायस्य ग्रन्थस्य पूर्णा मातृका काशीस्थसंस्कृतकलाशालायामस्ति। अत्र द्वादश साराख्या भागा अध्याया वा सन्ति -

१.संस्कारसारः २.आह्निकसारः ३.श्राद्धसारः ४.कालसारः ५.व्यवहारसारः ६.प्रायश्चित्तसारः ७.कर्मविपाकसारः ८.व्रतसारः ९.दानसारः १०.शान्तिसारः ११.तीर्थसारः १२.प्रतिष्ठासारः

तदुक्तम्-

संस्कारसारः प्रथमो द्वितीयस्त्वाह्निकाभिधः।
श्राद्धसारस्तृतीयस्तु चतुर्थः कालनिर्णयः।
पञ्चमो व्यवहाराख्यः प्रायश्चित्ताभिधोपरः।
प्राक्तनानां च भवतां सप्तमस्त्वघनाशकः।।
अष्टमो व्रतसाराख्यः पुराणोक्ताभिधायकः।
नवमो दानसाराख्यः सर्ववर्णाधिकारकः।।
दशमः शान्तिसंज्ञो वै तैर्थ एकादशः स्मृतः।
देवप्रतिष्ठासारश्च द्वादशः परिकीर्तितः।।(संस्कारसारः श्लो०१७-२०)

सर्वेषामेतेषां साराणामादौ श्रीनृसिंहप्रार्थनाऽस्ति। यथा -

प्रणम्य श्रीनृसिंहेन(हं तु) दलाधीशेन भूभुजा।
श्रीनृसिंहप्रसादेन दिनानुष्ठेयमुच्यते।। (आह्निकसारः श्लो० १.
श्रीनृसिंहं नमस्कृत्य दलाधीशमहीपतिः।
श्राद्धसारं प्रकुरुते सर्ववैदिकतुष्टये।। (श्राद्धसारः श्लो० १)

श्रीनृसिंहप्रसादेन कृतो ग्रन्थः श्रीनृसिंहप्रसादमिति ग्रन्थकारोऽभिमन्यते

दलपतिः (दलाधीशः)

अयम् वल्लभतनूजन्मा भारद्वाजगोत्रो याज्ञवल्क्यशुक्लयजुःशाखाध्यायी सूर्यपण्डितशिष्यो निजामशाहस्य मन्त्री। तदुक्तम् (संस्कारसारः श्लो० १४)-

प्रौढश्रीद्विजराजवंशतिलकालङ्कारहीरः प्रभु-
र्भारद्वाजकुलानुगः प्रथमया यः शाखयालङ्कृतः
श्रीमन्नेजमशासमस्तकरणाधीशः सतामग्रणीः
श्रीमद्वल्लभभूश्चिरं विजयते श्रीमान्दलाधीश्वरः।

"श्रीमत्प्रौढप्रतापमहाराजाधिराज - सर्वपुरीसुन्दरीदेवगिरिपुरवराधीश्वर - समस्तयवनाधीश्वरश्रीमन्निजामसाहसमस्तकरणाधीश्वर- सकलविद्याविशारद-

याज्ञवल्कीयलुप्तशाखाप्रवर्तक - द्विजराजकुलालंकारहीर - श्रीवैष्णवप्रवर्तक-श्रीवल्लभात्मज - श्रीवल्लभपण्डितप्रसादासादितसूर्यपण्डिताभिधगुरु - मन्वादि प्रणीतनीतिशास्त्राभिज्ञ - महाप्रभुस्वकार्यवीक्षणप्रतिनिधीकृतश्रीमहाराजदलपति राजविरचिते श्रीनृसिंहप्रसादे" (श्राद्धसारः पुष्पिका)

अत्रोक्तः सूर्यपण्डितो मराठासाधोरेकनाथस्य पिता स्याद्यो भागवतं काश्यां शके १४९५ (क्रि०१५६३) तमवर्षे रचयामास।

दलपत्युदाहृतग्रन्थाः -

१.कालादर्शः २.दीपिकाविवरणम् ३.प्रयोगपारिजातः ४.मदनपारिजातः ५.कृत्यकल्पतरुः ६.स्मृतिचन्द्रिका ७.स्मृतिरत्नावलिः ८.स्मृतिदर्पणः ९.स्मृतिचिन्तामणिः १०.स्मृतिभास्करः ११.विज्ञानतिलकम् १२.अपरार्कः १३.विज्ञानमार्तण्डः १४.भोजराजीयम् १५.विश्वरूपनिबन्धः १६.वाक्यमीमांसा १७.स्मृतिमीमांसा १८.निबन्धसर्वस्वम् १९.स्मृतिमहार्णवः २०.शातातपीयकर्म विपाकसमुच्चयः २१.माधवीयम् २२.मैलुगिकर्मविपाकः २३.प्रवराध्यायः २४.प्रवरमञ्जरी २५.जातिविवेकः २६.कालदीपः २७.पुराणसारः २८.कामिकम् २९.ज्ञानरत्नावलिः ३०.बालार्कोदयः (द्र०संस्कारसारः,उपक्रमः

दलपत्युदाहृतग्रन्थकाराः -

१.अनन्तभट्टः २.विज्ञानेश्वरः ३.भट्टहेमाद्रिः ४.माधवः ५.मेधातिथिः ६.गणेशः ७.सोमेश्वरः(तन्त्रवार्तिकव्याख्याता) ८.वादिभयंकरः

ग्रन्थकारस्य स्थानम्-

दलपतिर्दलाधीशो वा दक्षिणभारतस्थदेवगिरौ वसति स्म। अत एव तीर्थसारे दक्षिणभारतस्थितानां सेतुबन्ध-पुण्डरीक(पण्डरपुर) गोदावरी- कृष्णा-वेण्यादीनां तीर्थानां विवरणं विशेषेण करोति। यस्मादयं दाक्षिणात्यः, तस्मान्मातुलसुतापरिणयनं समर्थयते(द्र० संस्कारसारः प.सं.९) -

वस्तुतस्तु मातुलसुतापरिणयनं वेदाभिहिततया न दोष इति। मातुलकन्या दाक्षिणात्यैः परिणीयत इति तन्त्रवार्तिकादौ (मीमांसा १.३.४) व्यक्तम् ।

ग्रन्थकारस्य कालः -

माधवीयस्य मदनपारिजातस्य च प्रमाणतयोपन्यासान्नृसिंहप्रसादस्य कालः क्रिस्तोः परं चतुर्दशशतकादनन्तरमेव भवितुमर्हति। शंकरभट्टस्य द्वैतनिर्णये, नीलकण्ठस्य मयूखेषु च प्रमाणतया नृसिंहप्रसादस्य ग्रहणात् क्रिस्तोः परं १५७५तमवर्षात् (षोडश शतकात्) प्राचीनः। यदि रामचन्द्राचार्य पुत्रस्य नृसिंहस्य दीपिकाविवरणं कालनिर्णयव्याख्याया व्याख्यानं, तर्हि नृसिंहप्रसादे तदुल्लेखात् कालः क्रिस्तोः परं १५०० अथवा डा० भण्डारकरमतानुसारेण १४५० ए.सि. भवति। काशीस्थसंस्कृतकलाशालायां विद्यमाना श्रीनृसिंहप्रसादस्य मातृका १५६८-९तमे शकवर्षे (क्रि० १५११ -१२ लिखिता। ग्रन्थकारो निजामशाहस्य(१४९०-१५०८) सचिव इत्युक्तत्वेन, श्रीनृसिंहप्रसादस्य कालः १४९०तमक्रिस्तवर्षादारभ्य, 'वाराणसीमातृका(१५१२) कालात्प्राग्भावितुमर्हति।(विस्तरार्थं द्र० हिस्टरी आफ् धर्मशास्त्र भागः १, पी पी. ४०६-४१०)

अन्यद्विवक्षितं सर्वं टिप्पण्यादौ निवेशितमिति नेह प्रतन्यते। तदिदं धीरा विमृश्य, दोषान्दूरीकृत्य मामनुगृण्हन्त्विति सप्रश्रयं प्रार्थये।

तद्विद्वांसोऽनुगृण्हन्तु चित्तश्रोत्रैः प्रसादिभिः ।
सन्तः प्रणयिवाक्यानि गृह्णन्ति ह्ययनसूयवः॥ (भट्टपादः)

महीशूरपुरम् — सतामाश्रवः

ईश्वरसं० श्रावणकृ० ३० — सूर्यनारायणनागेन्द्रभट्टः

सङ्केतविवरणम्

अ.को.	अमरकोशः
उ.सू.	उणादिसूत्रम्
ऋ.सं.	ऋग्वेदसंहिता
ऐ.उ.	ऐतरेयोपनिषत्
कूर्मपु.	कूर्मपुराणम्
ग.स.,गणस.	गणपतिसहस्रनाम
छां.उ.	छान्दोग्योपनिषत्
त.प्र.	तत्त्वप्रदीपिका
तै.आ.	तैत्तिरीयारण्यकम्
तै.उ.	तैत्तिरीयोपनिषत्
-ब्रह्म.-ब्रह्मवल्ली,-भृगु.-भृगुवल्ली	
ना.पु.	नारदीयपुराणम्
पञ्चपा.	पञ्चपादिका
प.सं.	पत्रसङ्ख्या
पाद्मपु.	पाद्मपुराणम्
पू.मी.	पूर्वमीमांसा
बृ.उ.	बृहदारण्यकोपनिषत्
ब्र.सू.	ब्रह्मसूत्रम्
भ.गी.,गीता,	भगवद्गीता
भाग., भाग.पु., भा.पु., श्रीभाग.	श्रीभागवतमहापुराणम्
भार.,म.भा.	महाभारतम्
म.ना.उ.	महानारायणोपनिषत्
म.स्मृ.	मनुस्मृतिः
मत्स्यपु.	मत्स्यपुराणम्
मां.उ.	माण्डूक्योपनिषत्
मुं.उ.	मुण्डकोपनिषत
या.उ.	याज्ञिक्युपनिषत्
यो.सू.	योगसूत्रम्
रामता.उ.	रामतापिन्युपनिषत्
ल.ना.उ.	लघुनारायणोपनिषत्
लिङ्गपु.	लिङ्गपुराणम्
वा.	वार्तिकम्
वि.ध.पु.	विष्णुधर्मोत्तरपुराणम्
वि.पु.	विष्णुपुराणम्
वि.स.ना.	विष्णुसहस्रनाम
वै.सि.दी.	वैष्णवसिद्धान्तदीपिका
श्वे.उ.	श्वेताश्वतरोपनिषत्
ष.ब्रा.	षड्विंशब्राह्मणम्
सां.का.	साङ्ख्यकारिका
सु.र.भां.	सुभाषितरत्नभाण्डागारम्
सौ.ल.	सौन्दर्यलहरी
स्कं.पु.	स्कन्दपुराणम्
स्तो.	स्तोत्रम्

ॐ

श्रीनृसिंहसहस्रनामस्तोत्रम्

मार्कण्डेय उवाच -

एवं युद्धमभूद् घोरं रौद्रं दैत्यबलैः सह ।
नृसिंहस्याङ्गसम्भूतैर्नारसिंहैरनेकशः ॥ १ ॥
दैत्यकोटिर्हता तत्र केचिद् भीताः पलायिताः ।
तं दृष्ट्वाऽतीव संक्रुद्धो हिरण्यकशिपुः स्वयम् ॥ २ ॥
भूतपूर्वैरमृत्युर्म इति ब्रह्मवरोद्धतः ।
ववर्ष शरवर्षेण नारसिंहो भृशं बली ॥ ३ ॥
द्वन्द्वयुद्धमभूदुग्रं दिव्यवर्षसहस्रकम् ।
दैत्येन्द्रे साहसं दृष्ट्वा देवाश्चेन्द्रपुरोगमाः ॥ ४ ॥
श्रेयः कस्य भवेदत्र इति चिन्तापराऽभवन् ।
तदा क्रुद्धो नृसिंहस्तु दैत्येन्द्रप्रहितान्यपि ॥ ५ ॥
विष्णुचक्रं महाचक्रं कालचक्रं तु वैष्णवम् ।
रौद्रं पाशुपतं ब्राह्मं कौबेरं कुलिशासनम् ॥ ६ ॥
आग्नेयं वारुणं सौम्यं मोहनं सौरपार्वतम् ।
भार्गवादिबहून्यस्त्राण्यभक्षयत कोपनः ॥ ७ ॥
सन्ध्याकाले सभाद्वारे स्वाङ्के निक्षिप्य भैरवः ।
ततः खड्गधरं दैत्यं जग्राह नरकेसरी ॥ ८ ॥
हिरण्यकशिपोर्वक्षो विदार्यातीव रोषितः ।
उद्धृत्य चान्त्रमालानि नखैर्वज्रसमप्रभैः ॥ ९ ॥
मेने कृतार्थमात्मानं सर्वतः पर्यवैक्षत ।
हर्षिता देवताः सर्वाः पुष्पवृष्टिमवाकिरन् ॥ १० ॥

देवदुन्दुभयो नेदुर्विमलाश्च दिशोऽभवन् ।
नरसिंहमतीवोग्रं विकीर्णवदनं भृशम् ।। ११ ।।
लेलिहानं च गर्जन्तं कालानलसमप्रभम् ।
अतिरौद्रं महाकायं महादंष्ट्रं महारुतम् ।। १२ ।।
महासिंहं महारूपं दृष्ट्वा संक्षुभितं जगत् ।
सर्वदेवगणैः सार्धं तत्रागत्य पितामहः ।। १३ ।।
आगन्तुकैर्भूतपूर्वैर्वर्तमानैरनुत्तमैः ।
गुणैर्नामसहस्रेण तुष्टाव श्रुतिसम्मतैः ।। १४ ।।

ॐ नमः श्रीमद्दिव्यलक्ष्मीनृसिंहसहस्रनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, श्रीलक्ष्मीनृसिंहो देवता, अनुष्टुप् छन्दः, श्रीनृसिंहः परमात्मा बीजं, लक्ष्मीर्माया शक्तिः, जीवो बीजं, बुद्धिः शक्तिः, उदानवायुः बीजं, सरस्वती शक्तिः, व्यञ्जनानि बीजानि, स्वराः शक्तयः, ॐ क्ष्रौं ह्रीं इति बीजानि, ॐ श्रीं अं आं इति शक्तयः, विकीर्णनखदंष्ट्रायुधायेति कीलकम्, अकारादिति बोधकं, श्रीलक्ष्मीनृसिंहप्रसादसिद्ध्यर्थे श्रीलक्ष्मीनृसिंहसहस्रनामस्तोत्रमन्त्रजपे विनियोगः।

अथ हृदयादिन्यासः

ॐ श्रीलक्ष्मीनृसिंहाय नमः अङ्गुष्ठाभ्यां नमः। ॐ वज्रनखाय नमः तर्जनीभ्यां नमः। ॐ महारुद्राय नमः मध्यमाभ्यां नमः। ॐ सर्वतोमुखाय नमः अनामिकाभ्यां नमः। ॐ विकटास्याय नमः कनिष्ठिकाभ्यां नमः। ॐ वीराय नमः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासः।

अथ दिग्बन्धः

ॐ ऐन्द्रीं दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा। ॐ आग्नेयीं दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा। ॐ याम्यां दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा। ॐनैर्ऋतीं दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा।

ॐ वारुणीं दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा। ॐ वायवीं दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा। ॐ कौबेरीं दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा। ॐ ऐशानीं दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा। ॐ ऊर्ध्वां दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा। ॐ अधस्ताद्दिशं सुदर्शनेन बध्नामि नमश्चक्राय स्वाहा।

अथ ध्यानम्

सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्ये स्थितं
योगारूढमतिप्रसन्नवदनं भूषासहस्त्रोज्ज्वलम् ।
त्र्यक्षं चक्रपिनाकसाभयवरान् बिभ्राणमर्कच्छविं
छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे ।। १ ।।
उपास्महे नृसिंहाख्यं ब्रह्म वेदान्तगोचरम् ।
भूयो लालितसंसारच्छेदहेतुं जगद्गुरुम् ।। २ ।।

ब्रह्मोबाच -

(ॐ ह्रीं श्रीं ऐं क्ष्रौं)

ॐ नमो नारसिंहाय वज्रदंष्ट्राय वज्रिणे ।
वज्रदेहाय वज्राय नमो वज्रनखाय च ।। १ ।।
वासुदेवाय वन्द्याय वरदाय वरात्मने ।
वरदाभयहस्ताय वराय वररूपिणे ।। २ ।।
वरेण्याय वरिष्ठाय श्रीधराय नमो नमः ।
प्रह्लादवरदायैव प्रत्यक्षवरदाय च ।। ३ ।।
परात्परतरेशाय पवित्राय पिनाकिने ।
पावनाय प्रसन्नाय पाशिने पापहारिणे ।। ४ ।।
पुरुष्टुताय पुण्याय पुरुहूताय ते नमः ।

तत्पुरुषाय तथ्याय पुराणपुरुषाय च ॥ ५ ॥
पुरोधसे पूर्वजाय पुष्कराक्षाय ते नमः ।
पुष्पहासाय हासाय महाहासाय शार्ङ्गिणे ॥ ६ ॥
सिंहाय सिंहराजाय जगद्वश्याय ते नमः ।
अट्टहासाय रोषाय जलावासाय ते नमः ॥ ७ ॥
भूतावासाय भासाय श्रीनिवासाय खड्गिने ।
खड्गजिह्वाय सिंहाय खड्गावासाय ते नमः ॥ ८ ॥
नमो मूलाधिवासाय धर्मवासाय धन्विने ।
धनञ्जयाय धन्याय नमो मृत्युञ्जयाय च ॥ ९ ॥
शुभञ्जयाय सूत्राय नमः शत्रुञ्जयाय च ।
निरञ्जनाय नीराय निर्गुणाय गुणाय च ॥ १० ॥
निष्प्रपञ्चाय निर्वाणपदाय निबिडाय च ।
निरालम्बाय नीलाय निष्कलाय कलाय च ॥ ११ ॥
निमेषाय निबन्धाय निमेषगमनाय च ।
निर्द्वन्द्वाय निराशाय निश्चयाय निजाय च ॥ १२ ॥
निर्मलाय निधानाय निर्मोहाय निराकृते ।
नमो नित्याय सत्याय सत्कर्मनिरताय च ॥ १३ ॥
सत्यध्वजाय मुञ्जाय मुञ्जकेशाय केशिने ।
हरिकेशाय शेषाय गुडाकेशाय वै नमः ॥ १४ ॥
सुकेशायोर्ध्वकेशाय केशिसंहारकाय च ।
जलेशाय स्थलेशाय पद्मेशायोग्ररूपिणे ॥ १५ ॥
कुशेशाय च कूलाय केशवाय नमो नमः।
शुक्तिकर्णाय सुप्ताय रक्तजिह्वाय रागिणे ॥ १६ ॥

दीप्तरूपाय दीप्ताय प्रदीप्ताय प्रलोभिने ।
प्रच्छन्नाय प्रतोदाय प्रभवे विभवे नमः ।। १७ ।।
प्रभञ्जनाय पान्थाय प्रमाय प्रमिताय च ।
प्रकाशाय प्रतापाय प्रज्वलायोज्ज्वलाय च ।। १८ ।।
ज्वालामालास्वरूपाय ज्वलज्जिह्वाय ज्वालिने ।
महाज्वालाय कालाय कालमूर्तिधराय च ।। १९ ।।
कालान्तकाय कल्पाय कलनाय कृते नमः ।
कालचक्राय शक्राय षट्चक्राय च चक्रिणे ।। २० ।।
अक्रूराय कृतान्ताय विक्रमाय क्रमाय च ।
कृतिने कृत्तिवासाय कृतिघ्नाय कृपात्मने ।। २१ ।।
सङ्क्रमाय च क्रुद्धाय क्रान्तलोकत्रयाय च ।
अरूपाय सरूपाय हरये परमात्मने ।। २२ ।।
अजेयायादिदेवाय अक्षयाय क्षयाय च ।
अघोराय सुघोराय घोरघोरतराय च ।। २३ ।।
नमोऽस्त्वघोरवीर्याय ललद्घोराय ते नमः ।
घोराध्यक्षाय दक्षाय दक्षिणार्हाय शम्भवे ।। २४ ।।
अमोघाय गुणौघाय अनघायाघहारिणे ।
मेघनादाय मेघाय तुभ्यं मेघात्मने नमः ।। २५ ।।
मेघवाहनरूपाय मेघश्यामाय मालिने ।
व्यालयज्ञोपवीताय व्याघ्रदेहाय वै नमः ।। २६ ।।
व्याघ्रपादाय च व्याघ्रकर्मणे व्यापकाय च ।
विकटास्याय वीर्याय विष्टरश्रवसे नमः ।। २७ ।।
विकीर्णनखदंष्ट्राय नखदंष्ट्रायुधाय च ।

विष्वक्सेनाय सेनाय विह्वलाय चलाय च ।। २८ ।।

विरूपाक्षाय वीराय विशेषाक्षाय साक्षिणे ।

वीतशोकाय विस्तीर्णवदनाय नमो नमः ।। २९ ।।

विधानाय विधेयाय विजयाय जयाय च ।

विबुधाय विभावाय नमो विश्वम्भराय च ।। ३० ।।

वीतरागाय विप्राय विटङ्कनयनाय च ।

विपुलाय विनीताय विश्वयोने नमो नमः ।। ३१ ।।

चिदम्बराय चित्ताय विकृताय वियोनये ।

विह्वलाय विवाहाय नमो व्याहृतये नमः ।। ३२ ।।

विलासाय विकल्पाय महाकल्पाय ते नमः ।

बहुकल्पाय कल्पाय कल्पातीताय शिल्पिने ।। ३३ ।।

कल्पनाय सुरूपाय फणितल्पाय वै नमः ।

तटित्प्रभाय ताक्ष्र्याय तरुणाय तरस्विने ।। ३४ ।।

तपनाय तरक्षाय तापत्रयहराय च ।

तारकाय तमोघ्नाय तत्त्वाय च तपस्विने ।। ३५ ।।

तक्षकाय तनुत्राय तटिने तरलाय च ।

शतरूपाय शान्ताय शतधाराय ते नमः ।। ३६ ।।

शतपत्रायताक्षाय स्थितये शतमूर्तये ।

शतक्रतुस्वरूपाय शाश्वताय शतात्मने ।। ३७ ।।

नमः सहस्त्रशिरसे सहस्त्रवदनाय च ।

सहस्त्राक्षाय देवाय दिशाश्रोत्राय ते नमः ।। ३८ ।।

नमः सहस्त्रजिह्वाय महाजिह्वाय ते नमः ।

सहस्त्रनामधेयाय सहस्त्राक्षधराय च ।। ३९ ।।

सहस्त्रबाहवे तुभ्यं सहस्त्रचरणाय च ।
सहस्त्रार्कप्रकाशाय सहस्त्रायुधधारिणे ।। ४० ।।
नमः स्थूलाय सूक्ष्माय सुक्षीणाय नमो नमः ।
सुक्षुण्णाय सुभिक्षाय सुराध्यक्षाय शौरिणे ।। ४१ ।।
धर्माध्यक्षाय धर्माय लोकाध्यक्षाय वै नमः ।
प्रजाध्यक्षाय शिक्षाय विपक्षक्षयमूर्तये ।। ४२ ।।
कालाध्यक्षाय तीक्ष्णाय मूलाध्यक्षाय ते नमः ।
अधोक्षजाय मित्राय सुमित्रावरुणाय च ।। ४३ ।।
शत्रुघ्नाय अविघ्नाय विघ्नकोटिहराय च ।
रक्षोघ्नाय मदघ्नाय भूतघ्नाय नमो नमः ।। ४४ ।।
भूतपालाय भूताय भूतावासाय भूतिने ।
भूतवेतालघाताय भूताधिपतये नमः ।। ४५ ।।
भूतग्रहविनाशाय भूतसंयमिने नमः ।
महाभूताय भृगवे सर्वभूतात्मने नमः ।। ४६ ।।
सर्वारिष्टविनाशाय सर्वसम्पत्कराय च ।
सर्वाधाराय सर्वाय सर्वार्तिहरये नमः ।। ४७ ।।
सर्वदुःखप्रशान्ताय सर्वसौभाग्यदायिने ।
सर्वज्ञायाप्यनन्ताय सर्वशक्तिधराय च ।। ४८ ।।
सर्वैश्वर्यप्रदात्रे च सर्वकार्यविधायिने ।
सर्वज्वरविनाशाय सर्वरोगापहारिणे ।। ४९ ।।
सर्वाभिचारहन्त्रे च सर्वोत्पातविघातिने ।
पिङ्गाक्षायैकशृङ्गाय द्विशृङ्गायामरीचये ।। ५० ।।
बहुशृङ्गाय लिङ्गाय महाशृङ्गाय ते नमः ।

माङ्गल्याय मनोज्ञाय मन्तव्याय महानसे ।। ५१ ।।
महादेवाय देवाय मातुलिङ्गधराय च ।
महामायाप्रसूताय मायिने जलशायिने ।। ५२ ।।
महोदराय मन्दाय मन्ददाय मदाय च ।
मधुकैटभहन्त्रे च माधवाय मुरारये ।। ५३ ।।
महावीर्याय धैर्याय चित्रवीर्याय ते नमः ।
चित्रकर्माय चित्राय नमस्ते चित्रभानवे ।। ५४ ।।
मायातीताय मायाय महावीराय ते नमः ।
महातेजाय बीजाय तेजोधाम्ने च बीजिने ।। ५५ ।।
तेजोमयनृसिंहाय नमस्ते तेजसां निधे ।
महादंष्ट्राय तुष्टाय नमः पुष्टिकराय च ।। ५६ ।।
शिपिविष्टाय हृष्टाय पुष्टाय परमेष्ठिने ।
विशिष्टाय च शिष्टाय गिरिष्ठायेष्टदायिने ।। ५७ ।।
नमो ज्येष्ठाय श्रेष्ठाय तुष्टायामिततेजसे ।
अष्टाङ्गन्यस्तरूपाय सर्वदुष्टान्तकाय च ।। ५८ ।।
वैकुण्ठाय विकुण्ठाय केशिकण्ठाय ते नमः ।
कण्ठीरवाय लुण्ठाय निःशठाय हराय च ।। ५९ ।।
सत्त्वोद्रिक्ताय कृष्णाय रजोद्रिक्ताय वेधसे ।
तमोद्रिक्ताय रुद्राय ऋग्यजुस्सामगाय च ।। ६० ।।
ऋतध्वजाय रज्वाय मन्त्रराजाय मन्त्रिणे ।
त्रिनेत्राय त्रिवर्गाय त्रिधाम्ने च त्रिमूलिने ।। ६१ ।।
त्रिकालज्ञानरूपाय त्रिदेहाय त्रिधात्मने ।
नमस्त्रिमूर्तिविद्याय त्रितत्त्वज्ञानिने नमः ।। ६२ ।।

अक्षोभ्यायानिरुद्धाय अप्रमेयाय भानवे ।
अमृताय अनन्ताय अमितायामराय च ।। ६३ ।।
अपमृत्युविनाशाय अपस्मारविघातिने ।
अन्नदायान्नरूपाय अन्नायान्नभुजे नमः ।। ६४ ।।
आद्याय निरविद्याय विद्यायाद्भुतकर्मणे ।
सद्योजाताय सन्ध्याय वैद्युताय नमो नमः ।। ६५ ।।
अध्वातीताय अध्वाय वागतीताय वाग्मिने ।
वागीश्वराय गोपाय गोहिताय गवाम्पते ।। ६६ ।।
गन्धर्वाय गभीराय गर्जितायोर्जिताय च ।
पर्जन्याय प्रबुद्धाय प्रधानपुरुषाय च ।। ६७ ।।
पद्माभाय सुनाभाय पद्मनाभाय भासिने ।
पद्मनेत्राय पद्माय पद्मायाः पतये नमः ।। ६८ ।।
पद्मोदराय पूताय पद्मकल्पोद्भवाय च ।
नमो हृत्पद्मवासाय भूपद्मोद्धरणाय च ।। ६९ ।।
शब्दब्रह्मस्वरूपाय ब्रह्मरूपधराय च ।
ब्रह्मणे ब्रह्मरूपाय ब्रह्मनेत्राय ते नमः ।। ७० ।।
ब्रह्मादये ब्राह्मणाय ब्रह्मब्रह्मात्मने नमः ।
सुब्रह्मण्याय देवाय ब्रह्मण्याय त्रिवेदिने ।। ७१ ।।
परब्रह्मस्वरूपाय पञ्चब्रह्मात्मने नमः ।
नमस्ते ब्रह्मशिरसे तथाऽश्वशिरसे नमः ।। ७२ ।।
अथर्वशिरसे नित्यमशनिप्रमिताय च ।
नमस्ते तीक्ष्णदंष्ट्राय लोलायाललिताय च ।। ७३ ।।
लावण्याय लवित्राय नमस्ते भासकाय च ।

लक्षणज्ञाय लक्ष्याय लक्षणाय नमो नमः ।। ७४ ।।

लसद्दीप्ताय दीप्ताय विष्णवे प्रभविष्णवे ।

वृष्णिमूलाय कृष्णाय श्रीमहाविष्णवे नमः ।। ७५ ।।

पश्यामि त्वां महासिंहहारिणं वनमालिनम् ।

कीरिटिनं कुण्डलिनं सर्वगं सर्वतोमुखम् ।। ७६ ।।

सर्वतः पाणिपादोरुं सर्वतोक्षिशिरोमुखम् ।

सर्वेश्वरं सदातुष्टं सत्पथं समरप्रियम् ।। ७७ ।।

बहुयोजनविस्तीर्णं बहुयोजनमायतम् ।

बहुयोजनहस्ताङ्घ्रि बहुयोजननासिकम् ।। ७८ ।।

महारूपं महाचक्रं महादंष्ट्रं महाभुजम् ।

महानादं महारौद्रं महाकायं महाबलम् ।। ७९ ।।

आनाभेर्ब्रह्मणो रूपमागलाद्वैष्णवं तथा ।

आशीर्षाद्रुद्रमीशानं तदग्रे सर्वतश्शिवम् ।। ८० ।।

नमोस्तु नारायण नारसिंह नमोस्तु नारायण वीरसिंह ।

नमोस्तु नारायण क्रूरसिंह नमोस्तु नारायण दिव्यसिंह।। ८१ ।।

नमोस्तु नारायण व्याघ्रसिंह नमोस्तु नारायण पुच्छसिंह ।

नमोस्तु नारायण पूर्णसिंह नमोस्तु नारायण रौद्रसिंह ।। ८२ ।।

नमो नमो भीषण भद्रसिंह नमो नमो विह्वलनेत्रसिंह ।

नमो नमो बृंहितभूतसिंह नमो नमो निर्मलचित्तसिंह ।। ८३ ।।

नमो नमो निर्जितकालसिंह नमो नमः कल्पितकल्पसिंह ।

नमो नमः कामद कामसिंह नमो नमस्ते भुवनैकसिंह ।। ८४ ।।

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।

दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्।। ८५ ।।

आमी हि त्वा सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा मुनयः सिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ।।
रुद्रादित्या वसवो ये च साध्या विश्वे देवा मरुतश्चोष्मपाश्च ।
गान्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ति त्वां विस्मिताश्चैव सर्वे ।। ८७ ।।
लेलिह्यसे ग्रसमानस्समन्ताल्लोकान् समग्रान् वदनैर्ज्वलाद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णोः ।। ८८ ।।

भविष्णुस्त्वं सहिष्णुस्त्वं भ्राजिष्णुर्जिष्णुरेव च ।
पृथिवी ह्ययन्तरिक्षं त्वं पर्वतारण्यमेव च ।। ८९ ।।
कलाकाष्ठाविलिप्तस्त्वं मुहूर्तप्रहरादिकम् ।
अहोरात्रं त्रिसन्ध्यं च पक्षमासर्तुवत्सराः ।। ९० ।।
युगादिर्युगभेदस्त्वं सन्धिश्च युगसन्धयः ।
नित्यं नैमित्तिकं दैनं महाप्रलयमेव च ।। ९१ ।।
करणं कारणं कर्ता भर्ता हर्ता त्वमीश्वरः ।
सत्कर्ता सत्कृतिर्गोप्ता सच्चिदानन्दविग्रहः ।। ९२ ।।
प्राणस्त्वं प्राणिनां प्रत्यगात्मा त्वं सर्वदेहिनाम् ।
सुज्योतिस्त्वं परंज्योतिरात्मज्योतिः सनातनः ।। ९३ ।।
ज्योतिर्लोकस्वरूपस्त्वं ज्योतिर्ज्ञो ज्योतिषां पतिः ।
स्वाहाकारः स्वधाकारो वषट्कारः कृपाकरः ।। ९४ ।।
हन्तकारो निराकारो वेगाकारश्च शङ्करः ।
उकारादिहकारान्त ॐकारो लोककारकः ।। ९५ ।।
एकात्मा त्वमनेकात्मा चतुरात्मा चतुर्भुजः ।
चतुर्मूर्तिश्चतुर्दंष्ट्रश्चतुर्वेदमयोत्तमः ।। ९६ ।।
लोकप्रियो लोकगुरुर्लोकेशो लोकनायकः ।

लोकसाक्षी लोकपतिर्लोकात्मा लोकलोचनः ।। ९७ ।।
लोकाधारो बृहल्लोको लोकालोकमयो गुरुः ।
लोककर्ता महाकर्ता कृतावर्तः कृतागमः ।। ९८ ।।
अनादिस्त्वमनन्तस्त्वमभूतो भूतविग्रहः ।
स्तुतः स्तव्यः स्तवप्रीतः स्तोता नेता नियामकः ।। ९९ ।।
त्वं गतिस्त्वं मतिर्मह्यं पिता माता गुरुः सखा ।
सुहृदश्चात्मरूपस्त्वं त्वां विना नास्ति मे गतिः ।। १०० ।।
नमस्ते मन्त्ररूपाय अस्त्ररूपाय ते नमः ।
बहुरूपाय रूपाय पञ्चरूपधराय च ।। १०१ ।।
भद्ररूपाय योगाय योगरूपाय योगिने ।
समरूपाय योगाय योगपीठस्थिताय च ।। १०२ ।।
योगगम्याय सौम्याय ध्यानगम्याय ध्यायिने ।
ध्येयगम्याय धाम्ने च धामाधिपतये नमः ।। १०३ ।।
धराधराय धर्माय धारणाभिरताय च ।
नमो धात्रे विधात्रे च सन्धात्रे च धराय च ।। १०४ ।।
दामोदराय दान्ताय दानवान्तकराय च ।
नमः संसारवैद्याय भेषजाय नमो नमः ।। १०५ ।।
सीरध्वजाय शीताय वातायाप्रमिताय च ।
सारस्वताय संसारनाशकायाक्षमालिने ।। १०६ ।।
असिचर्मधरायैव षट्कर्मनिरताय च ।
विकर्माय सुकर्माय परकर्मविघातिने ।। १०७ ।।
सुशर्मणे मन्मथाय नमो वर्माय वर्मिणे ।
करिचर्मवसानाय करालवदनाय च ।। १०८ ।।

कवये पद्मगर्भाय भूगर्भाय घृणानिधे ।
ब्रह्मगर्भाय गर्भाय बृहद्गर्भाय धूर्जटे ।। १०९ ।।
नमस्ते विश्वगर्भाय श्रीगर्भाय जितारये ।
नमो हिरण्यगर्भाय हिरण्यकवचाय च ।। ११० ।।
हिरण्यवर्णदेहाय हिरण्याक्षविनाशिने ।
हिरण्यकशिपोर्हन्त्रे हिरण्यनयनाय च ।। १११ ।।
हिरण्यरेतसे तुभ्यं हिरण्यवदनाय च ।
नमो हिरण्यशृङ्गाय निस्सङ्गाय च सङ्गिने ।। ११२ ।।
भैरवाय सुवेषाय भीषणायान्त्रमालिने ।
चण्डाय रुण्डमालाय नमो दण्डधराय च ।। ११३ ।।
अखण्डतत्त्वरूपाय कमण्डलुधराय च ।
नमस्ते दण्डसिंहाय सत्यसिंहाय ते नमः ।। ११४ ।।
नमस्ते श्वेतसिंहाय पीतसिंहाय ते नमः ।
नीलसिंहाय सिंहाय रक्तसिंहाय ते नमः ।। ११५ ।।
नमो हारिद्रसिंहाय धूम्रसिंहाय ते नमः ।
मूलसिंहाय मूलाय बृहत्सिंहाय ते नमः ।। ११६ ।।
पातालस्थितसिंहाय नमः पर्वतवासिने ।
नमो जलस्थसिंहाय अन्तरिक्षस्थिताय च ।। ११७ ।।
कालाग्निरुद्रसिंहाय चण्डसिंहाय ते नमः ।
नमस्तेऽनन्तसिंहाय अनन्तगतये नमः ।। ११८ ।।
नमो विचित्रसिंहाय बहुसिंहस्वरूपिणे ।
अभयङ्करसिंहाय नारसिंहाय ते नमः ।। ११९ ।।
नमोऽस्तु सिंहराजाय नारसिंहाय ते नमः ।

सप्ताब्धिमेखलायैव सप्तसामस्वरूपिणे ।। १२० ।।
सप्तलोकान्तरस्थाय सप्तस्वरमयाय च ।
सप्तार्चीरूपदंष्ट्राय सप्ताश्वरथरूपिणे ।। १२१ ।।
सप्तवायुस्वरूपाय सप्तच्छन्दोमयाय च ।
स्वच्छाय स्वच्छरूपाय स्वच्छन्दाय च ते नमः ।। १२२ ।।
श्रीवत्साय सुवेषाय श्रुतये श्रुतिमौलये ।
शुचिश्रवाय शूराय सुभगाय सुधन्विने ।। १२३ ।।
शुभ्राय सुरनाथाय सप्रभाय शुभाय च ।
सुदर्शनाय सूक्ष्माय निरुक्ताय नमो नमः ।। १२४ ।।
सुप्रभाय स्वभावाय भवाय विभवाय च ।
सुशाखाय विशाखाय सुमुखाय मखाय च ।। १२५ ।।
सुनखाय सुदंष्ट्राय सुरथाय सुधाय च ।
साङ्ख्याय सुरमुख्याय प्रख्याताय प्रभाय च ।। १२६ ।।
नमः खट्वाङ्गहस्ताय खेटमुद्गरपाणये ।
खगेन्द्राय मृगेन्द्राय नागेन्द्राय दृढाय च ।। १२७ ।।
नागकेयूरहाराय नागेन्द्रायाघमर्दिने ।
नदीवासाय नग्नाय नानारूपधराय च ।। १२८ ।।
नगेश्वराय नागाय नमिताय नराय च ।
नागान्तकरथायैव नरनारायणाय च ।। १२९ ।।
नमो मत्स्यस्वरूपाय कच्छपाय नमो नमः ।
नमो यज्ञवराहाय नरसिंहाय ते नमः ।। १३० ।।
विक्रमाक्रान्तलोकाय वामनाय महौजसे ।
नमो भार्गवरामाय रावणान्तकराय च ।। १३१ ।।

नभस्ते बलरामाय कंसप्रध्वंसकारिणे ।
बुद्धाय बुद्धरूपाय तीक्ष्णरूपाय कल्किने ॥ १३२ ॥
आत्रेयायाग्निनेत्राय कपिलाय द्विजाय च ।
क्षत्राय पशुपालाय पशुवक्त्राय ते नमः ॥ १३३ ॥
गृहस्थाय वनस्थाय यतये ब्रह्मचारिणे ।
स्वर्गापवर्गदात्रे च तद्भोक्त्रे च ममुक्षवे ॥ १३४ ॥
शालग्रामनिवासाय क्षीराब्धिशयनाय च ।
श्रीशैलाद्रिनिवासाय शिलावासाय ते नमः ॥ १३५ ॥
योगिहृत्पद्मवासाय महाहंसाय ते नमः ।
गुहावासाय गुह्याय गुप्ताय गुरवे नमः ॥ १३६ ॥
नमो मूलादिवासाय नीलवस्त्रधराय च ।
पीतवस्त्राय शस्ताय रक्तवस्त्रधराय च ॥ १३७ ॥
रक्तमालाविभूषाय रक्तगन्धानुलेपिने ।
धुरन्धराय धूर्ताय दुर्धामाय धनाय च ॥ १३८ ॥
दुर्मदाय दुरन्ताय दुर्धराय नमो नमः ।
दुर्निरीक्ष्याय शिष्टाय दुर्दर्शाय द्रुमाय च ॥ १३९ ॥
दुर्भेदाय दुराशाय दुर्लभाय नमो नमः ।
दृप्ताय दृप्तवक्त्राय अदृप्तनयनाय च ॥ १४० ॥
उन्मत्ताय प्रमत्ताय नमो दैत्यारये नमः ।
रसज्ञाय रसेशाय आरक्तरसनाय च ॥ १४१ ॥
पथ्याय परितोषाय रथ्याय रसिकाय च ।
ऊर्ध्वकेशोर्ध्वरूपाय नमस्ते चोर्ध्वरेतसे ॥ १४२ ॥
ऊर्ध्वजिह्वाय सिंहाय नमस्ते चोर्ध्वबाहवे ।

परप्रध्वंसकायैव शङ्खचक्रधराय च ।। १४३ ।।
गदापद्मधरायैव पञ्चबाणधराय च ।
कामेश्वराय कामाय कामपालाय कामिने ।। १४४।।
नमः कामविहाराय कामरूपधराय च ।
सोमसूर्याग्निनेत्राय सोमपाय नमो नमः ।। १४५।।
नमः सोमाय वामाय वामदेवाय ते नमः ।
सामस्वनाय सौम्याय भक्तिगम्याय वै नमः ।। १४६।।
कूष्माण्डगणनाथाय सर्वश्रेयस्कराय च ।
भीष्माय भीकरायैव भीमविक्रमणाय च ।। १४७।।
मृगग्रीवाय जीवायाजितायाजितकारिणे ।
जटिने जामदग्न्याय नमस्ते जातवेदसे ।। १४८।।
जपाकुसुमवर्णाय जप्याय जपिताय च ।
जरायुजायाण्डजाय स्वेदजायोद्भिज्जाय च ।। १४९ ।।
जनार्दनाय रामाय जाह्नवीजनकाय च ।
जराजन्मविदूराय प्रद्युम्नाय प्रमोदिने ।। १५० ।।
जिह्वारौद्राय रुद्राय वीरभद्राय ते नमः ।
चिद्रूपाय समुद्राय कद्रुद्राय प्रचेतसे ।। १५१ ।।
इन्द्रियायेन्द्रियज्ञाय नमोऽस्त्विन्द्रानुजाय च ।
अतीन्द्रियाय सान्द्राय इन्दिरापतये नमः ।। १५२ ।।
ईशानाय च ईड्याय ईप्सिताय इनाय च ।
व्योमात्मने च व्योम्ने च नमस्ते व्योमकेशिने ।। १५३ ।।
व्योमाधाराय च व्योमवक्त्रायासुरघातिने ।
नमस्ते व्योमदंष्ट्राय व्योमवासाय ते नमः ।। १५४।।

सुकुमाराय रामाय शिशुचाराय वै नमः ।
विश्वाय विश्वरूपाय नमो विश्वात्मकाय च ॥ १५५ ॥
ज्ञानात्मकाय ज्ञानाय विश्वेशाय परात्मने ।
एकात्मने नमस्तुभ्यं नमस्ते द्वादशात्मने ॥ १५६ ॥
चतुर्विंशतिरूपाय पञ्चविंशतिमूर्तये ।
षड्विंशकात्मने नित्यं सप्तविंशतिकात्मने ॥ १५७ ॥
धर्मार्थकाममोक्षाय विमुक्ताय नमो नमः ।
भावशुद्धाय सिद्धाय साध्याय शरभाय च ॥ १५८ ॥
प्रबोधाय सुबोधाय नमो बुद्धिप्रियाय च ।
स्निग्धाय च विदग्धाय मुग्धाय मुनये नमः ॥ १५९ ॥
प्रियश्रवाय श्रव्याय स्रुक्स्रुवाय श्रिताय च ।
ग्रहेशाय महेशाय ब्रह्मेशाय नमो नमः ॥ १६० ॥
श्रीधराय सुतीर्थाय हयग्रीवाय ते नमः ।
उग्राय उग्रवेगाय उग्रकर्मरताय च ॥ १६१ ॥
उग्रनेत्राय व्यग्राय समग्रगुणशालिने ।
बालग्रहविनाशाय पिशाचग्रहघातिने ॥ १६२ ॥
दुष्टग्रहनिहन्त्रे च निग्रहानुग्रहाय च ।
वृषध्वजाय वर्ष्याय वृषाय वृषभाय च ॥ १६३ ॥
उग्रश्रवाय शान्ताय नमः श्रुतिधराय च ।
नमस्ते देवदेवेश नमस्ते मधुसूदन ॥ १६४ ॥
नमस्ते पुण्डरीकाक्ष नमस्ते दुरितक्षय ।
न्नमस्ते करुणासिन्धो नमस्ते समितिञ्जय ॥ १६५ ॥
न्नमस्ते नारसिंहाय नमस्ते गरुडध्वज ।

परप्रध्वंसकायैव शङ्खचक्रधराय च ।। १४३ ।।

गदापद्मधरायैव पञ्चबाणधराय च ।

कामेश्वराय कामाय कामपालाय कामिने ।। १४४ ।।

नमः कामविहाराय कामरूपधराय च ।

सोमसूर्याग्निनेत्राय सोमपाय नमो नमः ।। १४५ ।।

नमः सोमाय वामाय वामदेवाय ते नमः ।

सामस्वनाय सौम्याय भक्तिगम्याय वै नमः ।। १४६ ।।

कूष्माण्डगणनाथाय सर्वश्रेयस्कराय च ।

भीष्माय भीकरायैव भीमविक्रमणाय च ।। १४७ ।।

मृगग्रीवाय जीवायाजितायाजितकारिणे ।

जटिने जामदग्न्याय नमस्ते जातवेदसे ।। १४८ ।।

जपाकुसुमवर्णाय जप्याय जपिताय च ।

जरायुजायाण्डजाय स्वेदजायोद्भिज्जाय च ।। १४९ ।।

जनार्दनाय रामाय जाह्नवीजनकाय च ।

जराजन्मविदूराय प्रद्युम्नाय प्रमोदिने ।। १५० ।।

जिह्वारौद्राय रुद्राय वीरभद्राय ते नमः ।

चिद्रूपाय समुद्राय कद्रुद्राय प्रचेतसे ।। १५१ ।।

इन्द्रियायेन्द्रियज्ञाय नमोऽस्त्विन्द्रानुजाय च ।

अतीन्द्रियाय सान्द्राय इन्दिरापतये नमः ।। १५२ ।।

ईशानाय च ईड्याय ईप्सिताय इनाय च ।

व्योमात्मने च व्योम्ने च नमस्ते व्योमकेशिने ।। १५३ ।।

व्योमाधाराय च व्योमवक्त्रायासुरघातिने ।

नमस्ते व्योमदंष्ट्राय व्योमवासाय ते नमः ।। १५४ ।।

सुकुमाराय रामाय शिशुचाराय वै नमः ।
विश्वाय विश्वरूपाय नमो विश्वात्मकाय च ।। १५५ ।।
ज्ञानात्मकाय ज्ञानाय विश्वेशाय परात्मने ।
एकात्मने नमस्तुभ्यं नमस्ते द्वादशात्मने ।। १५६ ।।
चतुर्विंशतिरूपाय पञ्चविंशतिमूर्तये ।
षड्विंशकात्मने नित्यं सप्तविंशतिकात्मने ।। १५७ ।।
धर्मार्थकाममोक्षाय विमुक्ताय नमो नमः ।
भावशुद्धाय सिद्धाय साध्याय शरभाय च ।। १५८ ।।
प्रबोधाय सुबोधाय नमो बुद्धिप्रियाय च ।
स्निग्धाय च विदग्धाय मुग्धाय मुनये नमः ।। १५९ ।।
प्रियश्रवाय श्रव्याय स्त्रुक्स्त्रुवाय श्रिताय च ।
ग्रहेशाय महेशाय ब्रह्मेशाय नमो नमः ।। १६० ।।
श्रीधराय सुतीर्थाय हयग्रीवाय ते नमः ।
उग्राय उग्रवेगाय उग्रकर्मरताय च ।। १६१ ।।
उग्रनेत्राय व्यग्राय समग्रगुणशालिने ।
बालग्रहविनाशाय पिशाचग्रहघातिने ।। १६२ ।।
दुष्टग्रहनिहन्त्रे च निग्रहानुग्रहाय च ।
वृषध्वजाय वर्ष्याय वृषाय वृषभाय च ।। १६३ ।।
उग्रश्रवाय शान्ताय नमः श्रुतिधराय च ।
नमस्ते देवदेवेश नमस्ते मधुसूदन ।। १६४ ।।
नमस्ते पुण्डरीकाक्ष नमस्ते दुरितक्षय ।
नमस्ते करुणासिन्धो नमस्ते समितिञ्जय ।। १६५ ।।
नमस्ते नारसिंहाय नमस्ते गरुडध्वज ।

यज्ञध्वज नमस्तेऽस्तु नमस्ते भक्तवत्सल ।। १६७ ।।
धर्मनेत्र नमस्तेऽस्तु नमस्ते करुणाकर ।
पुण्यनेत्र नमस्तेऽस्तु नमस्तेऽभीष्टदायक ।। १६८ ।।
नमो नमस्ते जयसिंहरूप नमो नमस्ते वरसिंहरूप ।
नमो नमस्ते रणसिंहरूप नमो नमस्ते नरसिंहरूप ।। १६९ ।।
उद्वृत्तं गर्वितं दैत्यं निहत्याजौ सुरद्विषम् ।
देवकार्यं महत् कृत्वा गर्जसे स्वात्मतेजसा ।। १७० ।।
अतिरौद्रमिदं रूपं दुस्सहं दुरतिक्रमम् ।
दृष्ट्वा तु शङ्किताः सर्वा देवतास्त्वामुपगताः ।। १७१ ।।
एतान् पश्य महेशानं ब्रह्माणं मां शचीपतिम् ।
दिक्पालान् द्वादशादित्यान् रुद्रानुरगराक्षसान् ।। १७२ ।।
सर्वानृषिगणान् सप्त मातृगौरीं सरस्वतीम् ।
लक्ष्मीं नदीश्च तीर्थानि रतिं भूतगणानपि ।। १७३ ।।
प्रसीद त्वं महासिंह उग्रभावमिमं त्यज ।
प्रकृतिस्थो भव त्वं हि शान्तभावं च धारय ।। १७४ ।।
इत्युक्त्वा दण्डवद् भूमौ पपात स पितामहः ।
प्रसीद त्वम्प्रसीद त्वम्प्रसीदेति पुनः पुनः ।। १७५ ।।
मार्कण्डेय उवाच -
दृष्ट्वा तु देवताः सर्वाः श्रुत्वा तां ब्रह्मणो गिरम् ।
स्तोत्रेणापि च संहृष्टः सौम्यभावमधारयत् ।। १७६ ।।
अब्रवीन्नारसिंहस्तु वीक्ष्य सर्वान् सुरोत्तमान् ।
सन्त्रस्तान् भयसंविग्नान् शरणं समुपागतान् ।। १७७ ।।
भो भो देववराः सर्वे पितामहपुरोगमाः ।

शृणुध्वं मम वाक्यं च भवन्तु विगतज्वराः ।। १७८ ।।
यद्धितं भवतां नूनं तत् करिष्यामि साम्प्रतम् ।
एतन्नामसहस्त्रं मे त्रिसन्ध्यं यः पठेच्छुचिः ।। १७९ ।।
शृणोति वा श्रावयति पूजान्ते भक्तिसंयुतः ।
सर्वान् कामानवाप्नोति जीवेच्च शरदां शतम् ।। १८० ।।
यो नामभिर्नृसिंहाद्यैरर्चयेत् क्रमशो मम ।
सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।। १८१ ।।
सर्वपूजासु यत्प्रोक्तं तत्सर्वं लभते भृशम् ।
जातिस्मरत्वं लभते ब्रह्मज्ञानं सनातनम् ।। १८२ ।।
सर्वपापविनिर्मुक्तस्तद्विष्णोः परमं पदम् ।
मन्नामकवचं बद्ध्वा विचरेद्विगतज्वरः ।। १८३ ।।
भूतवेतालकूष्माण्डपिशाचब्रह्मराक्षसाः ।
शाकिनीडाकिनीज्येष्ठानीलीबालग्रहादिकाः ।। १८४ ।।
दुष्टग्रहाश्च नश्यन्ति यक्षराक्षसपन्नगाः ।
ये च सन्ध्याग्रहाः सर्वे चाण्डालग्रहसंज्ञकाः ।। १८५ ।।
निशाचरग्रहाः सर्वे प्रणश्यन्ति च दूरतः ।
कुक्षिरोगश्च हृद्रोगः शूलापस्मार एव च ।। १८६ ।।
ऐकाहिकं द्व्याहिकं च चातुर्थिकमथ ज्वरम् ।
आधयो व्याधयः सर्वे रोगा रोगाधिदेवताः ।। १८७ ।।
शीघ्रं नश्यन्ति ते सर्वे नृसिंहस्मरणात्सुराः ।
राजानो दासतां यान्ति शत्रवो यान्ति मित्रताम् ।। १८८ ।।
जलानि स्थलतां यान्ति वह्नयो यान्ति शीतताम् ।
विषाण्यप्यमृतायन्ति नृसिंहस्मरणात्सुराः ।। १८९ ।।

राज्यकामो लभेद्राज्यं धनकामो लभेद्धनम् ।
विद्याकामो लभेद्विद्यां बद्धो मुच्येत बन्धनात् ।। १९० ।।
व्यालव्याघ्रभयं नास्ति चोरसर्पादिजं तथा ।
अनुकूला भवेद्भार्या लोकैश्च परिपूज्यते ।। १९१ ।।
सुपुत्रान् धनधान्यं च पशूंश्च विविधानपि ।
एतत्सर्वं समाप्नोति नृसिंहस्य प्रसादतः ।। १९२ ।।
जलसन्तरणे चैव पर्वतारोहणेऽपि च ।
वनेऽपि विचरन् मर्त्यो दुर्गमे विषमे पथि ।। १९३ ।।
बिलप्रवेशने चापि नारसिंहं न विस्मरेत् ।
ब्रह्मघ्नश्च पशुघ्नश्च भ्रूणहा गुरुतल्पगः ।। १९४ ।।
मुच्यते सर्वपापेभ्यः कृतघ्नः स्त्रीविघातकः ।
वेदानां दूषकश्चापि मातापितृविनिन्दकः ।। १९५ ।।
असत्यस्तु तथा यज्ञनिन्दको लोकनिन्दकः ।
स्मृत्वा सकृन्नृसिंहं तु मुच्यते सर्वकिल्बिषैः ।। १९६ ।।
बहुनाऽत्र किमुक्तेन स्मृत्वा मां शुद्धमानसः ।
यत्र यत्र चरेन्मर्त्यो नृसिंहस्तत्र रक्षति ।। १९७ ।।
गच्छन् तिष्ठन् स्वपन् भुञ्जन् जाग्रन्नपि हसन्नपि ।
नृसिंहेति नृसिंहेति नृसिंहेति सदा स्मरन् ।। १९८ ।।
पुमान्न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ।
नारी सुभगतामेति सौभाग्यं च सुरूपताम् ।। १९९ ।।
भर्तुः प्रियत्वं लभते न वैधव्यं च विन्दति ।
न सपत्नीञ्च जन्मान्ते सम्यग्ज्ञानाद्द्विजो भवेत् ।। २०० ।।
भूमिप्रदक्षिणान्मर्त्यो यत्फलं लभते चिरात् ।

तत्फलं लभते नारसिंहमूर्तिप्रदक्षिणात् ॥ २०१ ॥

मार्कण्डेय उवाच -

इत्युक्त्वा देवदेवेशो लक्ष्मीमालिङ्ग्य लीलया ।
प्रह्लादस्याभिषेकं तु ब्रह्मणे चोपदिष्टवान् ॥ २०२ ॥
श्रीशैलस्य प्रसादे तु लोकानां च हिताय वै ।
स्वरूपं स्थापयामास प्रकृतिस्थोऽभवत्तदा ॥ २०३ ॥
ब्रह्माऽपि दैत्यं राजानं प्रह्लादमभ्यषेचयत् ।
दैवतैः सह सुप्रीतो ह्यात्मलोकं ययौ स्वयम् ॥ २०४ ॥
हिरण्यकशिपोर्भीत्या प्रपलाय्य शचीपतिः ।
स्वर्गराज्यात् परिभ्रष्टो युगानामेकविंशतिम् ॥ २०५ ॥
नृसिंहेन हते दैत्ये स्वर्गलोकमवाप सः
दिक्पालाश्च सुसम्प्राप्ताः स्वस्वस्थानमनुत्तमम् ॥ २०६ ॥
धर्मे मतिः समस्तानां प्रजानामभवत्तदा ।
एवं नामसहस्रं मे ब्रह्मणा निर्मितं पुरा ॥ २०७ ॥
पुत्रानध्यापयामास सनकादीन् महामतिः ।
ऊचुस्ते च ततः सर्वे लोकानां हितकाम्यया ॥ २०८ ॥
देवता ऋषयः सिद्धा यक्षविद्याधरोरगाः ।
गन्धर्वाश्च मनुष्याश्च इहामुत्रफलैषिणः ॥ २०९ ॥
अस्य स्तोत्रस्य पाठाद्धि विशुद्धमनसोऽभवन्
सनत्कुमारः सम्प्राप्तो भारद्वाजो महामतिः ॥ २१० ॥
तस्मादाङ्गीरसः प्राप्तस्तस्मात्प्राप्तो महाक्रतुः ।
जग्राह भार्गवस्तस्माद् अग्निमित्राय सोऽब्रवीत् ॥ २११ ॥
जैगीषव्याय स प्राह सोऽब्रवीच्च्यवनाय च

तस्मादवाप शाण्डिल्यो गर्गाय प्राह वै मुनिः ।। २१२ ।।
ऋतुञ्जयाय स प्राह जातूकर्ण्याय संयमी ।
विष्णुवृद्धाय सोऽप्याह सोऽपि बोधायनाय च ।। २१३ ।।
क्रमात्स विष्णवे प्राह स प्राहोद्दामकुक्षये
सिंहतेजाश्च तस्माच्च श्रीप्रियाय ददौ च सः ।। २१४ ।।
उपदिष्टोऽस्मि तेनाहमिदं नामसहस्त्रकम् ।
तत्प्रसादादमृत्युर्मे यस्मात्कस्माद्भयं न हि ।। २१५ ।।
मया च कथितं नारसिंहस्तोत्रमिदं तव ।
त्वं हि नित्यं शुचिर्भूत्वा तमाराधय शाश्वतम् ।। २१६ ।।
सर्वभूताश्रयं देवं नृसिंहं भक्तवत्सलम् ।
पूजयित्वा स्तवं जप्त्वा हुत्वा निश्चलमानसः ।। २१७ ।।
प्राप्स्यसे महतीं सिद्धिं सर्वान् कामान् वरोत्तमान् ।
अयमेव परो धर्मस्त्विदमेव परं तपः ।। २१८ ।।
इदमेव परं ज्ञानमिदमेव महद्व्रतम् ।
अयमेव सदाचारस्त्वयमेव सदा मखः ।। २१९ ।।
इदमेव त्रयो वेदाः सच्छास्त्राण्यागमानि च ।
नृसिंहमन्त्रादन्यच्च वैदिकं तु न विद्यते ।। २२० ।।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ।
कथितं ते नृसिंहस्य चरितं पापनाशनम् ।। २२१ ।।
सर्वमन्त्रमयं तापत्रयोपशमनं परम् ।
सर्वार्थसाधनं दिव्यं किं भूयः श्रोतुमिच्छसि ।। २२२ ।।

श्रीनृसिंहपुराणे नृसिंहप्रादुर्भावे ब्रह्मगीतं श्रीदिव्यनृसिंहसहस्त्रनामस्तोत्रम्

हरिः ॐ तत्सत् ।

।। श्रीः ।।

श्रीनृसिंहसहस्रनामभाष्यम्

[भक्तेः पुरुषार्थत्वम्]

ननु धर्मार्थकाममोक्षाश्चत्वार एव पुरुषार्थाः सर्वशास्त्रप्रसिद्धाः। तान्विहाय कथं भक्तिप्रतिपादकपुराणाभिहितधर्मानुष्ठेयता।

अत्राभिधीयते- भक्तिरपि पुमर्थः। तथा हि- ज्ञानसाधनसाधनभूताया अपि भगवद्भक्तेर्निरुपाधिकेच्छाविषयत्वेन दुःखतः पूर्वमर्थरूपत्वम्। तथा हि- केचिद् भागवताः साकार एव भगवति प्रेमलक्षणरसास्वादनलम्पटा भगवत्सेवयैवात्मानं कृतकृत्यं मन्यमाना इच्छाया निरङ्कुशत्वान्मोक्षमपि नेच्छन्ति।

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृण्हन्ति विना मत्सेवनं जनाः।। [भा.३.२९.१३]

इत्युक्तत्वात्। अतो भक्तिरेव पञ्चमः पुरुषार्थ इति केषाञ्चिदुद्गारः।

अपरे पापक्षयहेतुतयाऽन्तःकरणशुद्धिद्वारा ज्ञानसाधनतया मोक्ष साधनत्वमपीच्छन्ति।

[भक्तिलक्षणम्]

ननु का नाम भक्तिः। उपायपूर्वं भगवति मनःप्रणिधानं भक्तिः। उक्तं श्रीभागवते[३.२५.३२-३] -

देवानां गुणलिंगानामानुश्रविककर्मणाम्
सत्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ।
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ।
जरयत्याशु या कोशं निगीर्णमनलो यथा ।। इति

तत्र भगवति प्रेमातिशयेनैव निरुपाधिकसेव्यसेवकभावलक्षणा भक्तिः केभ्यश्चिद् भागवतेभ्यो रोचते। तदुक्तं प्रह्लादेन(भा.७.१०.६) -

अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः।। इति।

तथा च [भा.पु. १०.८१.३६] -

तस्यैव मे सौहृदसख्यमैत्री दास्यं पुनर्जन्मनि जन्मनि स्यात्।। इति।

तथाऽन्यैरपि -

नान्यद् वदामि न शृणोमि न चिन्तयामि
नान्यन्नमामि न भजेऽपि न चाश्रयामि।
मुक्त्वा त्वदीयचरणाम्बुजमादरेण
श्रीश्रीविलास पुरुषोत्तम देहि दास्यम्।। इति।

[भक्तेः पुरुषार्थत्वसमर्थनम्]

ननु सेवायाः क्लेशरूपत्वात् कथं पुमर्थरुपतेति वाच्यम्। तन्न - लोके हि प्रियत्वमप्रियत्वं च वस्तुनि न नियतम्। देशकालपुरुषभेदेन वस्तुनि प्रियत्वाप्रियत्वदर्शनात्। यथा शीतकाले हिमालयदेशे चन्दनाद्यनुलेपस्याप्रिय त्वेऽपि ग्रीष्मकालेऽपि तत्प्रचुरदेशे च तस्य प्रियत्वम्। परसमवेतस्य (अपुरुषार्थत्वेऽपि) स्वसमवेतस्य तस्य पुरुषार्थत्वम्। तथाऽन्यसेवाया अपुरुषार्थत्वेऽपि सर्वोत्तमसेवायाः पुरुषार्थत्वं भाग्याधिकान्प्रति घटते।

[भक्तिवृत्तिनिरूपणम्]

ननु श्रीभागवते देवानामित्यत्र वृत्तिर्भक्तिरित्युक्तम्। तत्र का वृत्ति र्भक्तिरिति निरूपणीयम्। उच्यते - अत्र भक्तिशब्देन भगवदालम्बनो रत्याख्यः स्थायीभावो विधीयते। न भजनमात्रम्, तस्य कीर्तनशब्देनोपात्तत्वात्। तदुक्तं प्रह्लादचरित्रे-

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम्।

तेषु तेषु च्युता भक्तिरच्युताऽस्तु सदा त्वयि।

या प्रीतिरविवेकानां विषयेष्वनपायिनी।

त्वामनुस्मरतः सा मे हृदयान्माऽपसर्पतु।। इति।

तथा जरयत्याशु या कोशमिति तु स्वयमेव भक्तिरपोष्यमाणामपि मुक्तिं बलाद् विबलमापादयतीति मनःपरिणाम एव रत्याख्यो भक्तिः।

तदत्र रहस्यम्- रागादिदोषनिबन्धनप्रवृत्तिभ्यः परावृत्तानां श्रुतिपुराण वैष्णवागमविहितश्रवणादिकर्मप्रवणानामिन्द्रियाणां किञ्चिदपि फलमनभि सन्धाय सकलभुवनसौभाग्यसारसर्वस्वमूर्तेः करमर्दनपरिचर्याप्रचयाद्यनपे क्षितविधिः स्वरस एव समुल्लसति, विषयान्तरेभ्यो व्यवच्छेद्यमाना वृत्ति र्भागवती भक्तिरिति। तत्र च बहिरिन्द्रियाणां श्रवणादिव्यतिरेकेण वृत्त्यन्तरा भावात् श्रवणादीनां चान्योन्यं भिन्नजातीयत्वात् मनोवृत्तेस्तु भावलक्षणायाः सर्वत्रैकरूपत्वात् मनोवृत्तिरेव भवतु मुख्यो भक्तिशब्दार्थः। श्रवणादिषु तु तदनुवेधादेव भक्तिशब्द इति।

भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते।

स्वभावगुणमार्गेण पुंसां भावो विभिद्यते।।[भा.३.२९,७]

इत्यनेनापि भक्तिभावयोरभेद एवावगम्यते। तथा नृसिंहपुराणेऽपि -

चकार एवं हि द्वयोर्बहुमानमतिर्नृपः।

पक्षपातेन तन्नाम्नि मृगे पद्मे च तादृशि।।

इति प्रेमातिशयस्यैव भक्तित्वं दर्शितम्।

ननु विष्णुपुराणे विहिताचरणं निषिद्धवर्जनं च भक्तिरित्युक्तम्-

न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे।

न हरि न च हन्ति किञ्चिदुच्चैः सितमनसं तमवेहि विष्णुभक्तिम्।। इति।

न, तस्योपलक्षणपरत्वात्। लोकेऽपि च भक्तिसेवनयोर्भेदो दृष्टः। समानेऽपि राजसेवाकर्मणि भक्तोऽयमभक्तोऽयमिति व्यपदेशः। तस्माद् भावो भक्तिः। सा च कीर्तनाङ्गम्। "यन्नामकीर्तनं भक्त्य" इति श्रुतेः। न च सा इच्छया सम्पादयितुं शक्येत्युपादेयत्वात् कालवदधिकारिविशेषणं भवति।

[भक्तिभेदः]

सा च भक्तिरनेकधा । तदुक्तम्[भा.७.५.२] -

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।। इति।

सा द्वेधा- वैदिकी, अवैदिकी च। वैदिकी द्वेधा- मिश्रा शुद्धा च। मिश्रा त्रेधा- कर्ममिश्रा, कर्मज्ञानमिश्रा, ज्ञानमिश्रा च। कर्ममिश्रा त्रेधा- तामसी, राजसी, सात्विकी च। तामसी त्रेधा- हिंसार्था, दम्भार्था, मात्सर्यार्था च। राजसी त्रेधा- विषयार्था, यशोर्था, ऐश्वर्यार्था च। सात्विकी त्रेधा- कर्मक्षयार्था, विष्णुप्रीत्यर्था विधिसिद्ध्यर्था च। कर्मज्ञानमिश्रा त्रेधा- अधमा, मध्यमा, उत्तमा च। ज्ञानमिश्रा -

मद्गुणश्रुतिमात्रेण मयि सर्वगुणा(हा)शये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ।।

इत्युक्तलक्षणैकैव।

शुद्धाऽपि(भा. ३.२९.१३) -

अहेतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।।
दीयमानं न गृण्हन्ति विना मत्सेवनं जनाः।
स एष भक्तियोगाख्य आत्यन्तिक उदाहृतः।।

इत्युक्तलक्षणेकैव ।

अवैदिकी भक्तिश्चतुर्विधा- कामजा, द्वेषजा, भयजा, स्नेहजा चेति। तदुक्तं श्रीभागवते -

अभिसन्धाय यो हिंसां दम्भं मात्सर्यमेव वा।
संरम्भी भिन्नदृग्भावं मयि कुर्यात्स तामसः।।
विषयानभिसन्धाय यशऐश्वर्यमेव वा।
अर्चादावर्चयन् यो मां पृथग्भावः स राजसः।।
कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः।। इति
[भा.३.२९.८-१०]

अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु वाऽन्येषु स भक्तः प्राकृतः स्मृतः।।
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः।।
सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः।।
[भा. ११.२.४७,४६,४५]

गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो। [भा.७.१.३]
इति।

[नामकीर्तनस्य वैधत्वादिविचारः]

अत्रेदं निरूपणीयम्- नामकीर्तनं वैधमवैधं वा। आद्येऽपि विधेरप्रवृत्त चेतनप्रवर्तकत्वात् चेतनस्य च चिती संज्ञान" इति चेतयतिधातूत्पन्नप्रकृष्ट बुद्धिवाच्यज्ञानपूर्वकनियोजनफलाभिलाषिपुरुषोपायवृत्तिम् अहमिच्छामीत्येवं

माकारव्यापाररूपभावनागोचरत्वाद् भावनायाश्च स्वकारणरूपात् स्वस्वरूपात् फलविध्यविरोधाच्च फलापेक्षितत्वात् प्रायश्चित्तं वा फलं प्रत्यवायपरिहारो वा विष्णुप्रीतिर्वा मुक्तिर्वेति चिन्त्यम्। नाद्यः, स्मार्तप्रायश्चित्तविध्यानर्थक्यप्रसंगात्। न द्वितीयः, अनिरुक्तेः। परिहारः किं प्रागभावो वा प्रध्वंसो वा। नाद्यः, तस्य स्वतो जायमानतया पुरुषप्रयत्नानपेक्षत्वात्। न द्वितीयः, अत एव "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" [ब्र.सू. ४.१.१३] इति ज्ञानकाण्डे चतुर्थेऽध्याये भगवता व्यासेनैव परमेश्वरज्ञानस्यैव पापक्षयद्वारा मुक्तिहेतुत्वा भिधानात् । तदुक्तम् -

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते [भ.गी.७.१] इति।

न तृतीयः, वर्णाश्रमधर्मस्यैव तद्धेतुत्वात्। न चतुर्थः, ज्ञानस्यैव मोक्षहेतुतया वेदशास्त्रप्रसिद्धत्वात्।

अत्रोच्यते - पापक्षयार्थमेव नामकीर्तनमपि। तथा चोक्तम् -

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः
अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः।।

तथा(द्र. स्कां.पु. १.२.३३.१९) -

कृते पापेऽनुतापोऽत्र यस्य पुंसः प्रजायते।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्।। इति।

[प्रायश्चित्तान्तरावैयर्थ्यम्]

ननु सुकरे नामकीर्तनलक्षणे प्रायश्चित्ते बहुप्रयाससाध्यः स्मार्तप्रायश्चित्त विधिर्व्यर्थ इति। न, दृश्यते सुकरदुष्करविधी वैद्यके। तत्र सुकरमपि कस्मैचित् स्वभावादेव न रोचते। तदर्थं दुष्करश्चिकित्साविधिः। तद्वदिहापि दुर्वारदुर्वासना वासितचेतसः प्रायेण पराङ्मुखा एव पुरुषोत्तमे पुरुषाः। तदर्थं संस्मरतः प्रायश्चित्तविधिः। तस्मात् सर्वप्रधानमेव पुरुषोत्तमकीर्तनं पापप्रध्वंसहेतुरिति।

भागवत एव [६. .११] -

कर्मणा कर्मनिर्हारो न ह्यात्यन्तिकमिष्यते।
अविद्वदधिकारत्वात् प्रायश्चित्तं विमर्शनम्।।

इति कर्मात्मकप्रायश्चित्तविधानपूर्वकम्,

केचित् केवलया भक्त्या वासुदेवपरायणाः।
अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः।। [६.१.१५]

इति ब्रह्मविद्यासमानस्कन्धतया केवलायाः कीर्तनादिलक्षणाया भगवद्भक्तेः प्रायश्चित्तत्वेनावतारणं युक्तम्। तथा -

सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः।। [६.२.१]
(एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम्।
यदा नारायणायेति जगाद चतुरक्षरम्।।
नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः।
अजामिलोऽपि येनैव मृत्युपाशादमुच्यत।। [६.३.२३] इति।

एतावताऽलमघनिर्हरणाय पुंसां सङ्कीर्तनं भगवतो गुणकर्मनाम्नाम्।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण उपैति मुक्तिम्।।

इत्यादिभिः केवलनामकीर्तनस्य कृत्स्नपापक्षयहेतुत्वं समर्थ्यते यद्यपि पर्याप्ति वचनोऽयमलंशब्दः। प्रथमाप्रयोगेण भवितव्यं अलं मल्लो मल्लायेतिवत्। इह तृतीयान्वयो दृश्यते। अतो निवारणवचनोऽयम् अलमतिप्रसंगेनेतिवत्।

ततश्चायमर्थः - भगवतो गुणकर्मनाम्नां सम्यक्कीर्तनमिति यत्, पुंसामघनिर्हरणायैतावताऽलम्। एतावन्नानुष्ठेयम् - पापक्षयस्यातितुच्छत्वाद् भगवत्कीर्तनस्यातिगरीयस्त्वात्। एतदेव विवृणोति - विक्रुश्य पुत्रमिति। आजन्माभ्यस्तमहापापोऽजामिलोऽपि पुत्रं विक्रुश्यैव हरिं कीर्तयित्वा, तदपि

न स्पष्टम्, अत्यन्तावस्थात्वेनं शिथिलत्वात् । तथापि दैवगत्या भगवन्नाम्न एव पुत्रनामत्वात् मुक्तिं समस्तानर्थनिवृत्तिलक्षणां निरतिशयानन्दरूपां प्राप्तः, नानर्थैकदेशस्य पापस्य निवृत्तिमात्रमिति पापक्षयार्थता। तथा श्रीनृसिंहपुराणेऽपि [८ ३०] -

इत्युदीरितमाकर्ण्य कृष्णवाक्यं यमेरितम्।
नारकाः कृष्णकृष्णेति नारसिंहेति चुक्रुशुः।

इत्यादिवाक्यैर्नरकनिवासिनां पातकिनां श्रीनिवासकीर्तनादेव नरकार्णवाद् उत्तीर्णानां श्रीवैकुण्ठगमनमुपवर्णयन्ति। तथा विष्णुपुराणेऽपि(२.६.३९) -

प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम्।।

इति कर्मात्मकप्रायश्चित्तापेक्षया कृष्णानुस्मरणस्योत्कृष्टत्वाभिधानात्। तथा स्कन्दपुराणेऽपि -

हरहरहरशब्दमादितो वै मुहुरभिधाय मुनीन्द्रवृन्दवन्द्यम्।
अपठदखिलमेव घोषतुल्यं सकलहिताय नमः शिवाय शब्दम्।।

इत्यादिना नरकनिवृत्तिः शिवपुरप्राप्तिश्चोक्ता। तथा विष्णुधर्मोत्तरेऽपि -

अथ पातकभीतस्त्वं सर्वभावेन भारत।
विमुक्तान्यसमारम्भो नारायणपरो भव।।

तथा -

गोविन्देति समुच्चार्य पदक्षपितकिल्बिषः।
क्षत्रबन्धुर्विशुद्धात्मा गोविन्दत्वमुपेयिवान्।।

इत्यादिना प्रायश्चित्तपराङ्मुखस्यापि क्षत्रबन्धोः पापक्षयो दर्शितः। ततः केवलमेव कीर्तनं कृत्स्नपापक्षयहेतुः। नान्यसमुच्चितम्, नतरामन्याङ्गभूतमिति रहस्यम्।

[पुराणानां विवक्षितस्वार्थत्वादिविचारः]

अत्रेदं विचारणीयम् - भगवन्नाममाहात्म्यप्रतिपादकपुराणवचनानां विवक्षितस्वार्थत्वं वा, अविवक्षितस्वार्थत्वं वा? आद्येऽपि स्वस्वप्राधान्येन वा, अन्यप्राधान्येन वा? प्रथमेऽपि प्रश्रयभक्तिज्ञानवैराग्याभ्यासदेशकाल विशेषादिसापेक्षत्वेन उत नैरपेक्ष्येण?

[मीमांसकमतम्]

तत्र केचिदतिसाहसिकास्तु अविवक्षितार्थत्वमेव मन्यन्ते। तथाहि - सर्वस्यापि वेदराशेः कार्य एवार्थे प्रामाण्यम्, तत्रैव शक्तितात्पर्ययोरवधारित त्वात्। तस्माद् विधिवाक्यस्यैव सर्वार्थे प्रामाण्यम्, न मन्त्रार्थवादोपनिषद् वाक्यानाम्। तेषां तु कथञ्चित् क्रतुविध्युपयुक्तत्वात् तदर्थत्वं जपार्थत्वं वाऽङ्गीकार्यम्। इतिहासपुराणयोस्तन्मूलत्वान्नतरां स्वार्थे प्रामाण्यमपि।

तत्र केचित्पण्डितम्मन्यास्तु - पुत्रस्ते जात इत्यादौ सिद्धेऽप्याचार्यैरेव शक्तितात्पर्ययोरवधारितत्वात् मन्त्रार्थवादयोरपि मानान्तरानधिगताविरुद्धार्था वेदकयोः स्वार्थे प्रामाण्यं सम्भवतीति मन्यन्ते।

[स्वाभिप्रायकथनम्]

अत्र वदामि - वेदवत् पुराणानामपि धर्मशास्त्रार्थाय प्रामाण्यमविशिष्टम्। न तु वेदस्य धर्मदेवताप्रतिपादकतया त्रिकाण्डरूपत्वात् धर्माधर्म ब्रह्मप्रामाण्यं युक्तम्, पुराणानाञ्चातद्रूपतया न धर्मे स्वार्थयोः(धर्माद्यर्थे?) प्रामाण्यं युक्तमिति चेन्न - पुराणानामपि, सर्वपुराणेषु वर्णाश्रमदेवतानां प्राधान्येन प्रतिपादनात्। तथा श्रीभागवतभारतादिषु त्रिकाण्डरूपतामपि स्पष्टां पश्यामः। तथा हि[भाग. १.१.२] -

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शुभदं तापत्रयोन्मूलनम् ।

श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्।। इति।

तथा[म.भा.] -

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्।।

इति कर्मब्रह्मणोरविशेषेण प्रतिपाद्यत्वप्रतिज्ञानात् प्रतिपादनाच्च। भविष्योत्तर मत्स्यपुराणादिषु च धर्मप्रतिपादनभागस्यैव भूयस्त्वाद्धर्मे प्रामाण्यं पुराणाना मविगीतमेव। तस्माद्यथा काण्डभेदेन नानार्थत्वं वेदानामविरुद्धं,तथा तद्भेदेन नानार्थत्वं पुराणानामप्यविरुद्धमिति रहस्यम्। उक्तप्रकारेण पुराणानां धर्मे तात्पर्यसद्भावेन प्रामाण्येऽपि पुराणानां प्रायेणार्थवादबहुलत्वात् नामकीर्तन विषयाणामर्थवादानामप्यविरुद्धम्(?), तथा तद्भेदेन नानार्थत्वं पुराणानामप्य विरुद्धमिति रहस्यम्।

[प्रायश्चित्तानामगतार्थता]

ननूक्तप्रकारेण पुराणानां धर्मे तात्पर्यसद्भावेन प्रामाण्येऽपि पुराणानां प्रायेणार्थवादबहुलत्वान्नामकीर्तनविषयाणामर्थवादानां प्रामाण्यं शास्त्रज्ञैर्दुस्साध्य मेव, स्मार्त प्रायश्चित्तविधिना विरोधात्। तथा हि - (यदि) स्मार्ता विधयः प्रमाणं,तर्ह्यर्थवादा अप्रमाणम्। यदि ह्यर्थवादा एव,न तर्हि स्मार्तविधय इति। विधिशेषतया ह्यर्थवादाः प्रमाणभावं भजन्ते। ते चार्थवादा विध्यप्रामाण्या-वेदकाश्चेत्तर्ह्यर्थवादा एव न भवेयुः। किञ्च शेषशेषिणोर्विरोधे शेषिण एव प्रधानतयाऽभ्यर्हिततया प्रामाण्यमङ्गीकरणीयमिति महद् दुर्घटमापन्नम्।

सत्यम्। **अन्येषाम् अनभ्यस्तमीमांसाशास्त्राणां पितृप्रियाणामस्ति सङ्कटम्, न तु निर्व्याजशुश्रूषितगुरुचरणस्य समभ्यस्तमीमांसाशास्त्रस्य सकलविद्वदभिमतस्य किञ्चित् सङ्कटम्।** यद्विधिशेषतयाऽर्थवादानां

प्रामाण्यम्, तद्विध्यप्रामाण्यापादकत्वे भवेदपि विरोधः। न त्वेतदस्ति, अन्यार्थवादप्रामाण्येनान्यविधिप्रामाण्यस्य दर्शनात्। यथा - श्येनेनाभिचरन् यजेत(ष.ब्रा. ३.८.२) इत्यत्र, यथा वै श्येनो निपत्यादत्ते(ष.ब्रा. ३.८.३ इत्याद्यर्थवादप्रामाण्येन गुणविध्यप्रामाण्यस्य दर्शनात्।

नन्वत्र गङ्गा गङ्गेति यो ब्रूयात" इत्यादिना सर्वपापक्षये तदर्थान्य प्रायश्चित्तविध्यानर्थक्यं श्येनाधिकरणो(पू.मी. १.४.५)क्तवैषम्येण तुल्यमिति चेन्न, "पूर्णाहुत्या सर्वान्कामानवाप्नोति इत्यनेनैव सर्वकामावाप्तौ ज्योतिष्टोम दर्शपूर्णमासाग्निहोत्रादीनामप्यानर्थक्ये प्राप्ते, सर्वत्वमाधिकारिकम् [पू.मी.सू. १.२.१६] इत्यनेन "कर्मणां महताम्" इत्युक्त्यनुसन्धानेन विरोधपरिहार सम्भवात् । अन्यथा सन्ध्योपासनेनैव "यद्रात्र्या पापमकार्षम्। मनसा वाचा हस्ताभ्याम् "[म.ना.उ] इत्यादिमन्त्रपर्यालोचनया समस्तपापक्षयेऽन्यस्मार्त प्रायश्चित्तविध्यानर्थक्यस्य तदवस्थत्वात्।

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम्।। (वि.पु. ६.२.१७)

इत्यादिना युगपरत्वेन कलौ कीर्तनस्याभिधानेऽप्यर्थवादत्वादेतस्याविधायक त्वमिति, एतर्हीहापि

प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् ।

इति तावदर्थबोधनात्तुल्यम्।

[नामसहस्त्रस्य पूर्ववृत्तान्तः]

श्रीमल्लक्ष्मीनृसिंहनामसहस्रमुपदेष्टुकामः पूर्ववृत्तान्तं कथयति। यद्वा जगदनुग्रहकारी जगतामभ्युदयाय निःश्रेयसार्थं प्रवृत्तिमान् श्रीभगवान् कलिमलाकलुषितान्तःकरणानां सर्वजनानां वैदिकेषु नित्यनैमित्तिककाम्येषु बहुद्रव्यव्ययायाससाध्यकर्मस्वसमर्थतयाऽवगतानां तदनुग्रहसामर्थ्यमाकलय्य

तदनुजिघृक्षया सुकरमखिलसुमनोभिलषितफलदानसमर्थं श्रीमत्सर्वोत्तमलक्ष्मी नृसिंहनामसहस्रकमुपदिदिक्षुः श्रोतॄणां सुखप्रतिपत्त्यर्थमाख्यायिकामुपनिबध्नाति - एवमिति। एति एवम्। इणशीभ्यां वन्[१।५२] इत्यौणादिकसूत्रेण सिद्धी रूपस्य कार्या।

एवं युद्धमभूद्घोरं रौद्रं दैत्यबलैः सह।
नृसिंहस्याङ्गसम्भूतैर्नारसिंहैरनेकशः।। १ ।। इति।

एवमिति। उक्तप्रकारेण दैत्येन्द्रबलैः श्रीनृसिंहाङ्गभूतैर्नारसिंहैरनेकैर्गणैः सह घोरं भयानकं युद्धमभूदित्यर्थः

कोटिसङ्ख्याका दैत्या हता इति भावः, सङ्ख्याया हननायोगात्। कोटिशब्दो वाऽपरिमितवाची। ततः किमित्याह - दैत्यकोटिर्हतेति। तत्र तस्मिन् सङ्ग्रामे दैत्यानां कोटिर्हता। केचित्तु भीताः सन्तः पलायिताः। ततः किमभूदिति चेत्तत्राह - तान् दृष्ट्वेति। तान् कांश्चिन्मारितान् स्वगणान् दृष्ट्वा, कांश्चित् पलायितान् दृष्ट्वा, अतीव अतिशयेन क्रुद्धः सन्, हिरण्यकशिपुः स्वयमन्यन्नैरपेक्ष्येण, स बली - बलमस्यास्तीति बली, अत इनिठनौ[पा.सू. ५.२.१२५]इतीन्। नरसिंहं लक्ष्यीकृत्य शरवर्षेण ववर्ष। शराणां वृष्टिं कृतवान् इत्यर्थः ।

कीदृगित्याह - मे इति। ब्रह्मवरोद्धतः ब्रह्मणो वरो दैत्यसम्प्रदानको 'ब्रह्मन्, को वरोऽस्तु, त्वद्याचितं दास्यामी'त्येवमाकारः। तेन उद्धतः, सगर्व इत्यर्थः । कथमिति- भूतपूर्वैरमृत्युरिति।

[हिरण्यकशिपोर्वरप्राप्तिः]

अयं तत्रेतिहासः - हिरण्यकशिपुः पूर्वं तपस्तेपेऽङ्गुष्ठाग्रेण। ततस्तु ब्रह्माऽऽगत्यासौ किमर्थं यतत इति विचार्य, भवतु यत्किञ्चित्, अनुकूलकर्मणि प्रतिकूलाचरणायोगात् सत्वानुकूलत्वेऽपि स्वपदप्राप्तेर्विघ्नरूपतया सम्भावितत्वा

त्स्वपदादिप्राप्त्यादि तस्य मा भूदिति विघ्नाचरण कामो वरदानविघ्नमाचरितुं वरं वृणीष्वेत्युक्तवान्। स चाकृतविकल्पतश्चैव वरं दत्तवानिति।

तत इति। ब्रह्मणा मह्यं वरो दत्त इति गर्वितः सन् ववर्षेत्यर्थः।

ननु भूतपूर्वैरमृत्युर्मे इति दत्तो वर इत्यर्थः। ततः किमित्याह

द्वन्द्वयुद्धमभूदुग्रं दिव्यवर्षसहस्रकम् इति।

अनेकानि शस्त्राणि निक्षिप्य तान्यकिञ्चित्कराणि ज्ञात्वा दिव्यवर्ष सहस्रपर्यन्तं द्वन्द्वयुद्धमभूदित्यर्थः। एवमनेनातिकोपिना दैत्येन्द्रेणानेकानि शस्त्राणि प्रेषितानि न किञ्चित्कराणि जातानीति पुनर्युद्धमपि प्रारब्धमिति साहसं दृष्ट्वा शक्रादयो देवा अत्र सङ्ग्रामे कस्योभयोर्मध्ये जयादिश्रेयो भवेदिति चिन्तापरा अभवन्नित्याह -

दैत्येन्द्रसाहसं दृष्ट्वा देवाश्चेन्द्रपुरोगमाः।

श्रेयः कस्य भवेदत्र इति चिन्तापराऽभवन्।। इति।

श्रेयो जयः। पुराणानाञ्च "पुराणं पञ्चमो वेदः" इति भारतेन वेदत्वाभिधानाच्छान्दसः सन्धिः। अन्यथा भवेदत्र इति लिङ्यपि चिन्त्यं स्यात् । अथवा ते देवा ययुस्तेषामेवं चिन्ताऽभवदित्यर्थो व्याख्येयः।

(अनन्तरवृत्तकथनम्)

नन्वेवंविधायां देवचिन्तायां वृत्तायां किं वृत्तमित्याह - तदेति। यदा तत्प्रतिक्षिप्तानि शस्त्राणि दृष्ट्वा देवानां चिन्ताऽभूत्, तदा नृसिंहः, ना चासौ सिंहश्च। नयतीति ना, नयतेर्डिच्च[उ.सू.२.१०१]इति ऋडि नृइति। अथ नृषु सिंहः, हिनस्तीति सिंह इति वर्णविपर्ययः। एतत्प्रेरितानि शस्त्राणि मय्यकिञ्चित्कराण्यपि मज्जयं द्रष्टुं समागतानामचिरेण स्वकार्यं साध्यमानं पश्यतां देवानां त्रासाय पीडायै वा भविष्यन्तीति क्रुद्धः कोपम्प्राप्तो दैत्येन्द्रप्रहितान्यपि, किमुत सैनिकप्रेषितानीत्यपरोऽर्थः। भार्गवादिबहून्यस्त्राण्यभक्षयतेत्यर्थः।

कानि तानीत्याह- विष्णुचक्रमित्यादिसार्धश्लोकेन ।

ननु देवत्रासकरास्त्रलक्षणेऽपि तेषां कार्यं नाभूदेवेत्याशङ्क्याह- ततः खड्गधरं दैत्यमित्यादि। ततस्तदनन्तरमसिपाणिदैत्यं नरकेसरी धृतपूर्वोत्तर नरसिंहाङ्गस्तं जग्राह गृहीतवान्। तत्प्रहितास्त्रभक्षणोत्तरकालमेव तमग्रही दित्यर्थः। तद्ग्रहणमात्रेणापि न कार्यं, गृहीतेनापि तेन विगृहीतप्रायेणान्या कार्यस्य कर्तुं शक्यत्वादित्याशङ्क्याह- सन्ध्याकाले सभाद्वारे इत्यादि मेने कृतार्थमात्मानं सर्वतः पर्यवैक्षतेत्यन्तम्।

[प्रह्लादवृत्तान्तः]

अत्रेतिहासः- तपश्चर्यासमये दिवारात्रौ मनुष्यात् पशोर्वा खड्गदण्डा दिना वा न मे मृत्युरिति ब्रह्मदत्तवरेणातिगर्वः, अतिबलेनातिबद्धसर्वदेवः, अतिदैवबलेन प्राप्तराज्यः, सिंहासन उपविश्य द्वीपान्तरागतराजस्वानुचरादि संसेवितसभायां सिंहासन उपविष्टः प्रह्लादं पुत्रमङ्क आरोप्य तञ्च ध्याननिष्ठं मूकं दृष्ट्वा गणकलेखकपण्डितानाहूयासौ बालो प्रगल्भः कार्य इति तेभ्यः शिष्यं दत्तवान्। ते तु तं तथैव गृहीत्वा, गृहीत्वा गताः ॐ नमः सिद्धाय" इति शिक्षितवन्तः। स तु "ॐ नमो नारायणाय" [लघुनारायणोपनिषत्] इति अष्टाक्षरादिमन्त्रमुक्तवान्। स तैरनेकधा ताडितोऽपि तथैवोक्तवान्। तैस्तु सन्ध्यासमये सभायामानीतः। तदनु दैत्यराजं प्रत्युक्तम् - असावस्मदुक्तं न पठतीति, नारायणमेव स्मरतीति। स तेनोक्तः - कस्ते नारायणः, क्व तिष्ठतीति। स उक्तवान् - सर्वभूतान्तरात्मा सर्वत्र च तिष्ठतीति। तदनु दैत्यराजेन सर्वत्रास्तीति चेत्तर्ह्यत्र स्तम्भेऽपि वर्तत इत्युक्ते तेन चाङ्गीकृते स दैत्यः कोपवशेन पुरोऽवस्थितं स्तम्भं चिच्छेद खड्गेन। तदैव निजभक्त कृपापूर्णस्तद्वचनसत्यत्वनिर्वाहार्थं तत्रैवावतीर्णः। अवतीर्य च हिरण्यकशिपुं स्वाङ्के निक्षिप्य नखैरुरो विदार्य सर्वतः पर्यवेक्षयन् पुरोवस्थितं दण्डवद्

भूमौ निपतितं दृष्ट्वा निजसेवकदर्शनकृपयाऽऽर्द्रचित्तस्तं जिह्वया लालया मासेतीतिहासं विवक्षितं **सन्ध्याकाल** इति। न चात्र श्रीभागवते सप्तमेन विरोधः, उक्तरीत्याऽविरोधात्।

किङ्कृते स्वात्मानं कृतार्थं मेन इत्याशङ्क्याह- सन्ध्याकाले सभाद्वारे। भैरवो भयानको हिरण्यकशिपुं स्वाङ्के निक्षिप्य तस्योरो विदार्या तिरोषतो महता कोपेनान्त्रमालानि विदार्य, छान्दसं नपुंसकत्वं, सर्वतः पर्यवैक्षत विलोकितवानित्यन्वयः।

ततस्ते देवाः किमकुर्वन्नित्याह- हर्षिता देवताइति। देवदुन्दुभयो नेदुः। दिशश्च विमला निर्मला अभवन्। सन्धिश्छान्दसः। ततस्ते किमित्याह- नृसिंहमिति।

[नामसहस्रकथनम्]

नृसिंहरूपमतितेजस्कं देदीप्यमानं विस्तीर्णवदनभूतमतिशयेन लालित जिह्वं गर्जन्तं विकटशब्दं कुर्वाणं कालानलसमप्रभं प्रलयाग्निसन्निभमतिरौद्र मतिभयानकं महाकायं स्थूलदेहं स्थूलादिदंष्ट्रं महाबलं सर्वापेक्षयोत्कटबलं महाजिह्वं दीर्घजिह्वं महारूपमतिविकटरूपं दृष्ट्वा जगत् मालिकाभूतसृष्टिः सङ्कुलितं दृष्ट्वा सर्वदेवगणैः सह पितामहो ब्रह्माऽऽगत्यानुत्तमैर्गणैः, न विद्यत उत्तमो येभ्यस्तेऽनुत्तमास्तैः, भूतवर्तमानागन्तुकैः श्रुतिसम्मितैर्वेदतुल्यै र्नामसहस्रेण तुष्टाव - स्तुतिं चकारेत्यर्थः।

(सहस्रनामस्तोत्रस्य जप्यमन्त्रत्वम्)

लक्ष्मीनृसिंहसहस्रनामस्तोत्रस्य जप्यमन्त्रतां दर्शयति - अस्य श्री लक्ष्मीनृसिंहसहस्रनामस्तोत्रमन्त्रस्येत्यादिना। ऋष्यादिस्मरणं विना मन्त्रैस्तु न भूयसे फलायालमिति तत्स्मरणमावश्यकम्।

ननु ऋष्यादिस्मरणेऽपि जपार्हताऽनुपपन्ना। जपो हि पुरश्चरणसदृशः।

पुरश्चरणं च मन्त्रसंस्कारकम्। यथाऽऽधानमग्नीनाम्। आधानसंस्कृतानामेवाग्नीनां क्रतौ विनियोग इव संस्कृतानामेव मन्त्राणामैहिकामुष्मिकफलसाधनेषु कर्मसु विनियोग इति पापक्षयफले नामकीर्तने सम्भवति न जपोपयोगिनामुपयोगः। तथा हि-

मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम्।
अव्यग्रत्वमनिर्वेदो जपसम्पत्तिहेतवः॥

इत्यादयः प्रत्याहारा जपमात्रोपयोगिनः ।

[जपकीर्तनयोर्भेदः]

अन्यो हि जपः, अन्यच्च कीर्तनमिति भिन्नविषयत्वं हि तयोः। मन्त्रोच्चारणं जपः, नामोच्चारणं कीर्तनमिति। कः पुनर्नाममन्त्रयोर्भेदः? विशिष्टदेवतावाचकन्तु पदमात्रं नामधेयम्, नानास्वरादिविशिष्टों देवता प्रकाशको वर्णसमुच्चयो मन्त्रः।

ननु कीर्तनेऽपि जपशब्दोऽस्तीति द्युजपो वायुदेवेति मुक्तिदमनुत्तममित्यादौ। सत्यम्, स त्वौपचारिक एव। तस्मान्नात्र जपोपयोग इति चेत्,

मन्त्ररूपत्वादेतस्य जप्यत्वम्। मन्त्ररूपता च ॐकारादितया चतुर्थीयुक्ततया च स्फुटोपलभ्यते। प्रणवश्छन्दसामिव" इत्यादौ मन्त्रस्यैव प्रणवादित्वाभिधानात्। ततो मन्त्ररूपतया तेभ्योऽस्य विशेषः।

[मन्त्राणामपि सार्थकत्वम्]

ननु विषाघहरणार्थमन्त्रेषु पचहरछिन्धीत्यादिष्वर्थानादरदर्शनात् अन्यत्र गङ्गागङ्गेति यो ब्रूयादित्यर्थवादात् गङ्गादिपदानामप्यनर्थकानामेवं पापक्षयहेतुत्वात् कथं मन्त्रतयाऽर्थांदरः।

अतिलघीय इदं वचः। सत्यपि तत्र मन्यते मन्त्र इति व्युत्पत्त्या मन्त्रत्वव्यपदेशे तेषां दृष्टैकप्रयोजनमात्रार्थत्वेनार्थानादरात्। अन्यनाममन्त्राणां

च पापक्षयलक्षणाददृष्टैकफलत्वेनार्थानादरेऽपि एतस्य दृष्टादृष्टरूपचेतन पुरुषापेक्षितैहिकामुष्मिकफलसाधनतया सर्वार्थसाधनाभिधत्वात् युक्त एवात्रा र्थादरोऽपीति विशेषेण जपार्हत्वात् जपत्वं तद्भावात्।

[श्रीनृसिंहसहस्रनामस्तोत्रमन्त्रस्य विशेषः]

नन्वन्यस्यापि सहस्रनामरूपत्वाविशेषान्मन्त्रत्वे कथमेतस्यैव मन्त्र विशेषतया जप्यत्वमिति चेदित्थमत्र परितोषोऽस्तु सर्वहृदि।

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।

यानि तेषामशेषाणां कृष्णानुस्मरणं परम् । [वि.पु. २.६.३९]

इत्यादिनिरवद्यस्य सर्वेषामात्मभूतस्य सदानन्दस्य श्रीकृष्णनाथस्यानुस्मरणं पुनः पुनश्चिन्तितं विजातीयप्रत्ययनिरोधे सजातीयप्रत्ययवाहीकरणलक्षणं निदिध्यासनं वा यद्यपि श्रेयस्करम्, तथाऽपि द्वादशाक्षरश्रीवासुदेवविद्याया अन्यादृशत्वम्। सत्सु वाऽन्येषु मन्त्रेषु श्रीमन्मन्त्रराजविद्यायाः पूर्वोत्तर तापनीयाभिहितविशेषाया अन्यादृशत्वम्। तथा सत्स्वन्येषु सहस्रनामस्तोत्रेषु चतुर्थ्यन्ततया मन्त्रभूतस्यास्य स्पष्टो विशेषः।

[अर्थपूर्वकजपे फलविशेषः]

ननु नामस्मरणमात्रेण कृतकृत्यताया उक्तत्वात्तस्य चाविदितार्थेनापि कर्तुं शक्यत्वात्किमुर्थमेतावान्व्याख्यादर इति चेन्न - ज्ञात्वा कर्म समारभेद् (दीप्तशास्त्रम्)इति स्मृतेः, यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति[छां.उ. १.१.१ इति श्रुतेश्च ज्ञात्वाऽनुष्ठितस्य फलविशेष साधनत्वात्। यथा-

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।

यानि तेषामशेषाणां कृष्णानुस्मरणं परम्।। [वि.पु. २.६.३९]

तथा [भाग. ६.१.१]-

सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः।।

तथा[म.भा.शान्ति.४६.१२३] -

एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय।

इत्यादिभिः कृष्णानुस्मरणमात्रस्य भक्तिविश्वासयोः सदसद्भावेऽप्यनावृतस्य महापातकादिप्रकीर्णकान्तपातकक्षयहेतुत्वेऽपि आवृतस्य चानागतानेकपातकाश्लेषहेतुत्वेऽपि ज्ञानार्थकृष्णपदानुस्मरणस्य मोक्षहेतुत्वं कस्मादिति।

ब्रह्मविद्यात्वात्। तथा हि - कृषति विलापयति विदारयति संसाराटवीमिति वा, कृषत्यात्मसात्करोति ज्ञानिनमिति वा, कृष्णः परमात्मा सदानन्दरूपो वा।

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः।

इति व्यासवचः[म.भा.उद्यो. ६९.५]। स्मृतिश्च, तथा च स्मृतिः

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्याभिधीयते।। इति।

ततश्चैकनामस्मरणमप्यशेषाघहरम्, किमुत सहस्रनामस्मरणमित्ययमर्थो यथाशास्त्रं यथामति च निरूप्यते।

[ध्याननिरूपणम्]

ध्यानपूर्वं ध्यानमाह - अथ ध्यानमिति। तत्र ध्यानं नाम मनसो निर्विषयता। यथा

मूर्तिप्रत्ययसान्तत्यमन्यानन्तरितं धिया।
ध्यानं तत्रातिनिर्बन्धो मनसश्चपलाश्च नः। इति।

तथा- देशबन्धश्चित्तस्य धारणा। तत्र प्रत्यैकतानता ध्यानम्। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः यो.सू.३.१-३]इति। तत्र ध्यान सिद्धये ध्येयं ज्ञेयम्, तेन विना तदसम्भवात्। तत्र योगान्तरापहानार्थं भगवज्जन्मकर्मानुसन्धानं ज्ञातव्यम्। अभेदभावनया विक्षिप्तादिचित्तभूमिका जयार्थमेकाग्रतासम्पादनार्थं च द्वाविंशतिभगवदधिष्ठानानि ज्ञेयानि। एवम्प्रकारेणानुसन्धातुः परम्परया महाश्रेष्ठत्वाभिधानात्। तच्च श्रीभागवते तृतीयस्कन्धे एकोनत्रिंशेऽध्याये कपिलेन देवहूतिं प्रत्युक्तम् [३.२९ २७-३३]-

अथ मां सर्वभूतेषु भूतात्मानं कृतालयम्।
अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा।।
जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे
ततः सच्चित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः।।
तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः
ततो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः।।
रूपभेदविदस्तत्र ततश्चोभयतोदतः
तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात्।।
ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः।।
अर्थज्ञात् संशयच्छेत्ता ततः श्रेयान् स्वधर्मकृत्।
मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः।।
तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः।
मय्यर्पितात्मनः पुंसो मयि सन्यस्तकर्मणः।।
न पश्यामि परं भूतमकर्तुः समदर्शनात्। इति

ततः श्रीलक्ष्मीपतिः स्वयं ज्ञेयः। तत्र श्रीसर्वोत्तमभजनकामेन

समाध्यर्थमुपास्यस्वरूपं ज्ञातुं व्युत्थानदशाया योगान्तरायपरिहारार्थमिष्ट निरतिशयानन्दप्राप्त्यर्थं भगवज्जन्मकर्मानुसन्धानं कर्तुं विष्णोरवताररूपाणि ज्ञातव्यानि।

[अवतारचातुर्विध्यम्]

तत्रावताराश्चतुर्विधाः - स्वल्पयुगमन्वन्तरकल्पभेदात्।

तत्र स्वल्पावतारास्तु द्वितीयस्कन्धे सप्तमाध्याये(श्लो०३९) ब्रह्मणा नारदं प्रत्युक्ताः -

सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः।
अन्ते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः।। इति।

(युगावताराः)

युगावतारास्तु कृत-त्रैत-द्वापर-कलियुगेषु शुक्ल-रक्त-पीत-कृष्णाः।

(मन्वन्तरावताराः)

मन्वंन्तरावतारास्तु - स्वायम्भुवे यज्ञः, स्वारोचिषे विभुः, औत्तमे सत्यसेनः, तामसीये हरिः, चाक्षुषीयेऽजितः, रैवतीये वैकुण्ठः, वैवस्वते वामनः, सावर्णीये सार्वभौमः, दक्षसावर्णीये ऋषभः, ब्रह्मसावर्णीये विष्वक्सेनः, धर्मसावर्णीये धर्मसेतुः, भद्रसावर्णीये स्वधामा, देवसावर्णीये योगेश्वरः, इन्द्रसावर्णीये बृहद्भानुः। एतेऽष्टमस्कन्धे प्रथम-पञ्चम-त्रयोदशाध्यायेषु, इति मन्त्रोपनिषदं[८ १.१७], गजेन्द्रो मोचितो येन [८ १.३०], पत्नी विकुण्ठा शुभ्रस्य कूर्मरूपेण मन्दरः [८ ५ १०], अत्रापि भगवज्जन्म [८ १३.६] इत्यत्रोक्ताः।

(कल्पावताराः)

तत्र कल्पावतारास्तु तत्तत्कामनया ज्ञेयाः। मार्गविघ्नोपशान्तये वराहः। लोकापवादनिरासार्थं यज्ञराजः। सत्त्वादिरोषहान्यर्थं कपिलः। अलब्धभूमिकत्व

निवृत्त्यर्थं दत्तात्रेयः। कामशान्त्यर्थं चतुःशतप्रमादः। ...हानार्थं ऋषभः। देवहेलनकृतदोषनिवृत्त्यर्थं हयग्रीवः। लोपसर्गदानार्थं मत्स्यः। नरकहेतुहानार्थं कूर्मः। अरण्यभयहानार्थं नारसिंहः। आर्तिभयहानार्थं हरिः। स्थलोपसर्गहानार्थं वामनः। अकर्मण्यनालस्यहानाय हंसः। दुर्जनोपसङ्ग्रहहानार्थं मन्वन्तरेशः। व्याधिनाशार्थं धन्वन्तरिः। अविरतिहानार्थं मोहिनी चिन्त्या। अद्रिकूटापसर्ग हानार्थं परशुरामः। प्रवासे दुःखहानार्थं दाशरथी रामः। सर्वेष्टसिद्ध्यर्थं श्रीकृष्णः। अशेषसन्देहनिरासार्थं व्यासः। तददर्शननिवृत्त्यर्थं बुद्धः। कलिदोष हानार्थं कल्की ध्येयः। एवं प्रथमस्कन्धे तृतीये ध्याये, प्रथमस्कन्धे सप्तमाध्याये, तृतीयमृषिसर्गं च[१ ३.८] इत्यादिना, शास्त्रे भविष्यति काले भगवान् युगान्तेत्यंतेनाभिहितास्ते तत एव ज्ञेयाः।

नन्ववताराणामापाततो नामतः कथनेऽपि न तत्त्वतो ध्येयावगमः। उच्यते - त्रिविधमुपास्यम्, त्रिगुणं द्विगुणमेकगुणं च। त्रिविधश्चोपासकः - त्रिगुणः द्विगुण एकगुणश्च। तत्त्रैगुण्योपासनार्थं निर्विण्णस्य मुमुक्षोः समीहितसिद्ध्दौ सम्यञ्चोपायमुदीक्षमाणस्य विश्वरूपधारणाख्यप्रथमभूमिकोपासनार्थं पुरुषरूपं ज्ञेयम्।

तत्रायमाशयः - विष्णुस्तावदुपास्यः। स च सामान्यविशेषावरुद्धत्वाद् द्विविधः। विशेषोऽपि द्विविधः - निराकारः साकारश्च। साकारश्चतुर्धा - पुरुषो ब्रह्मा रुद्रो विष्णुरिति। तत्रानवच्छिन्ने वस्तुन्यवच्छेदक उपाधिराकारः। तद्रहितो निराकारः। तत्सहितः साकारः। तत्र समाभ्यां रजस्तमोभ्यां युक्ते ताभ्यामधिके सत्त्वे प्रतिफलितं चैतन्यं पुरुषः। तमोपेक्षया बहुना रजसा युक्ते ततोऽधिके सत्त्वे प्रतिफलितं चैतन्यं विष्णुः। अगोचरस्य गोचरत्वे हेतुः प्रकृतिगुणः सत्त्वम्। गोचरस्य बहुरूपत्वे हेतुः प्रकृतिगुणो रजः। गोचरस्य तिरोहितत्त्वे प्रकृतिगुणस्तमः। ते च ब्रह्मरुद्रविष्णुपुरुषाः प्रत्येकमाधिदैविका

दिभेदाः। ते च सृष्टिस्थितिसंहारेषु क्रमान्निमित्तकारणभावं भजन्ते। यथा कुलालो घटस्य। उपादाने समवायिकारणं घटस्येव मृत्। असमवायि कारणं तु निमित्तान्तर्गतमेव। गोचरत्वे प्रीतिविषयत्वे निर्विशेषचैतन्यं हेतुः। तथा च श्रुतिः - तस्य भासा सर्वमिदं विभाति [मुं.उ.] इति।

(विष्णोः पञ्चात्मकत्वम्)

ततश्चायं शास्त्रार्थः - उत्पत्तिविनाशस्थित्यर्थं ब्रह्मरुद्रविष्णुरूपाणि त्रीणि, उपादानार्थं चैकः, गोचरत्वार्थमन्यश्चेति पञ्चात्मको विष्णुः। तत्र श्रीभागवतानुसारेण तेषां लक्षणान्यभिधीयन्ते।

(सामान्यलक्षणम्)

तत्र सामान्यलक्षणं तु ग्रन्थादावेव "अहमेवासमेवाग्रे" इत्यादिना दर्शितम्।

(निराकारलक्षणम्)

निराकारलक्षणं तु द्वितीयस्कन्धे द्वितीयाध्याये(श्लो०१७-१९) शुकेन राजानं प्रत्युक्तम् -

न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे।
न यत्र सत्वं न रजस्तमश्च न वै विकारो न महत् प्रधानम्।।

इति तटस्थस्य।

परं पदं वैष्णवमामनन्ति तद् यन्नेति नेतीत्यतदुत्सिसृक्षवः।
विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे।।

अस्योपास्तावधिकार्यपि तत्रैवोक्तः -

इत्थं मुनिस्तूपरमेद् व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः।

(पुरुषलक्षणम्)

पुरुषलक्षणं त्वेकादशस्कन्धे चतुर्थाध्याये निमिं प्रति द्रमिडेनोक्तम् -

भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन्
स्वांशे निविष्टः पुरुषाभिधानमवाप नारायण आदिदेवः।।

(विष्णुरूपम्)

तत्र शुद्धसत्वविष्णुरूपं च श्रीभागवते प्रथमस्कन्धे द्वितीयाध्याये सूतेन शौनकं प्रत्युक्तम्[श्लो० २] -

सत्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते।
स्थित्यादये हरिविरिंचिहरेतिसंज्ञाः श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः।। इति।

तथा दशमस्कन्धे द्वितीयाध्याये ब्रह्माद्यैः कृष्णम्प्रत्युक्तम्[श्लो०३]-

सत्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेय उपायनं वपुः।
वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते।। इति

तथा -

तस्मिंल्लब्धपदं चित्तं त्यक्त्वावयविनि स्थितम्।
विलक्ष्यैकत्रसंयुज्यादङ्गे भगवतो मुने।

इदं च तटस्थलक्षणम्।

[विष्णोः स्वरूपलक्षणम्]

स्वरूपलक्षणं तु [४.४] -

यत्काय एष भुवनत्रयसन्निवेशो यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि।
ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्वादिभिः स्थितिलयोद्भव आदिकर्ता।

इति ब्रह्मरुद्रविष्णूनां लक्षणानि। एकादशस्कन्ध(४.५) एवाभ्यधायि -

आदावभूच्छतधृती रजसाऽस्य सर्गे विष्णुः स्थितौ क्रतुपतिर्निजधर्मसेतुः।
रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु।।

[पुरुषस्वरूपम्]

पुरुषस्वरूपं चाष्टमस्कन्धे विंशेऽध्याये शुकेनाभ्यधायि[श्लो०२१-२२]-

तद्वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम्।
भूः खं दिशो द्यौर्विवरा: पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत।।
काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत्।
ददर्श विश्वं त्रिगुणं गुणात्मको भूतेन्द्रियार्थाशयजीवयुक्तम्।। इति।

[कृतार्थतासिद्धिक्रमः]

अत्रेदं रहस्यम्- स्थूलसूक्ष्मक्रमेण बुद्धयोऽर्थमवगाहं गाहन्त इति प्रथमं निर्विण्णमुमुक्षुणा समीहितसिद्ध्यपेक्षितोपायापेक्षणात्मके भगवद्रूपे धारणाख्य प्रथमभूमिकोपासनार्थं त्रिगुणात्मकं पुरुषरूपं ज्ञात्वा त्रिगुणात्मकेन प्रथमत्रिगुणात्मके भगवद्रूपे मनः प्रणिधाय तत्वस्थचेतःसिद्धिगुणात्मकेनाधि कारिणा द्वितीयभूमिकोपासनार्थं ब्रह्मरुद्ररूपे ज्ञात्वा धारणाद्वयाभ्यासबला ज्जितरजस्तमस्केन मुमुक्षुणा शुद्धसत्त्वेनाधिकारिणा सत्त्वजयप्रयोजनशुद्ध सत्त्वधारणात्मकतृतीयभूमिकार्थं विष्णुरूपं ज्ञेयमिति पुरुषरूपमुपास्यम्, ब्रह्मरुद्ररूपमुपास्यतरम्, शुद्धसत्त्वविष्णुरूपमेवोपास्यतममिति पूर्वं त्रिगुणा त्मके भगवद्रूपे मनः स्थिरीकृत्य तत्र स्थिरं सद् द्विगुणात्मके स्थिरीकृत्य ततः परं सोमशून्यमनःशून्यव्योमनिवेशद्वारा सबीजसमाधिविसर्जनपूर्वं वृत्तिहीनान्तः करणस्य स्वरूपस्थपरिणामद्वारा बहिर्मुखपरिणामविच्छेदेनान्तर्मुखत्वेन प्रति लोमपरिणत्या स्वकारणे लयं विधाय, मनश्च कूर्मनाडीतो निर्गुणे परमसूक्ष्मे ब्रह्मणि निवेश्य, निर्बीजसमाध्यवलम्बनेन नित्यनिरतिशयानन्दलाभेन ध्यान कृतकृत्यो भवति। ततः पराचीयावस्थानं देहप्राप्तिश्चेति वक्तुमशक्या अलेख्या चेत्युपरम्यते।

[ध्यानश्लोकार्थः]

तदिदं ध्येयस्वरूपं श्लोकेनाह- सत्यज्ञानसुखेति। अत्र लक्ष्मीनृसिंहं भज इत्यन्वयः। भज सेवायाम्। लक्ष्मीयुक्तो नृसिंहः लक्ष्मीनृसिंहः। लक्षेर्मुट्

चेति[उ.सू. ३.१६] लक्ष्मीशब्दसाधुता। लक्ष्मीनृसिंहादिशब्दस्तु ब्रह्मस्वरूप भूतचैतन्यतात्पर्यवान् स्वरूपचैतन्यलक्षकः। सत्यज्ञानसुखस्वरूपममलम्। अनृतजडदुःखभ्रान्तिव्यावृत्तिमात्रप्रयोजनं तत्पदलक्ष्येऽखण्डे ब्रह्मणि पर्यव स्यति। अखण्डो हि वाक्यार्थ इति स्थितिः। अपर्यायशब्दानामेकप्रातिपदिका र्थमात्रपर्यवसायित्वमखण्डार्थत्वम्(द्र. त.प्र. पु. १८६-२०२)।

यद्वा- अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वम्। प्रकृष्टप्रकाश श्चन्द्र इत्यादिलक्षणवाक्येषु सम्भवान्नासम्भवसम्भवः। संसर्गप्रमितिजनकेषु गवानयनादिवाक्येष्वभावान्नातिव्यापकताऽपि व्यापिनी। ततो युक्तिमती लक्ष्ये ब्रह्मणि वृत्तिः स-चादिशब्दानाम्। न च लक्ष्योपस्थितिश्चैकेनैव शब्देनेति पदान्तरवैलक्षण्यमिति शङ्क्यम्, उक्तोत्तरत्वात्। प्रकृते च समासे नैकपद मयाशङ्कानुदयेऽपि, तत्वमसि [छां.उ. ६.१६.१३], सोऽयं देवदत्तः इत्यादि वाक्येष्वपि नाक्षेपो युक्तिक्षमः। आद्ये जीवब्रह्मतादात्म्यबोधनपरत्वमखण्डा र्थस्येष्टमेव। द्वितीये प्रत्यभिज्ञायामधिगतमेकत्वं परस्मै प्रतिपाद्यत इति पद त्रयस्यैकस्मिन्नेव देवदत्ते पर्यवसानमवसीयत इति तत्स्पष्टं तद्देशकालयो रेतद्देशकालयोस्तदवच्छिन्नयोर्वा देवदत्तरूपयोर्नैक्यं प्रत्यभिजानाति। किं तर्हि? सोऽयमित्यवच्छिन्नरूपद्वयोपलक्षितं प्रत्यभिज्ञागोचरं यं भावमाचरति, प्रत्यभिज्ञातं चार्थं परस्मै विशिष्टाभिधायिपदाभ्यां स्वार्थैकदेशपरित्यागेनैक देशलक्षणया प्रतिपादयति।

ततश्चायं शास्त्रार्थः - अन्नप्राणमनोबुद्ध्यानन्दात्मकपञ्चकोशैस्तादा त्म्यादात्मविस्मृत्या प्राप्तसंसारेण पुरुषेण वर्णाश्रमधर्मानुष्ठानपुरस्सरसाकार भक्त्या शुद्धसत्वविरक्तेन जातब्रह्मजिज्ञासेन तत्वदर्शिन आचार्यादुपदेशं प्राप्य, तत्वमसि[छां.उ. ६.८.७], अहं ब्रह्मास्मि[बृ.उ. १.४.१], प्रज्ञानं ब्रह्म[ऐ.उ. ३.३], अयमात्मा ब्रह्म(मां.उ. २) इति महावाक्येषु सर्वज्ञत्वादि

तत्पदवाच्यं विरुद्धमंशं परित्यज्य कर्तृत्वादि त्वम्पदवाच्यं विरुद्धमंशं परित्यज्य, अविरुद्धमंशं चैतन्यांशं जनम्, 'अखण्डसच्चिदानन्दरूपपरब्रह्मरूपचैतन्यांशं जहदजहल्लक्षणया जीवपरमात्मतादात्म्यरूपमवगम्य कृतकृत्यताऽनुभूयते। तत्र यः पापक्षयकामनया सर्वोत्तमार्पणबुद्ध्या यन्नित्यनैमित्तिककर्मानुष्ठानं तेन श्रीविष्णोरेवारूपा भक्तिः, तया प्रेमलक्षणा भक्तिः, तया कामकर्माघच्छेदः, तेनान्तःकरणशुद्धिः, तया साधनचतुष्टयसम्पत्तिर्जायते। तेन प्रकृतिपुरुषविवेकः सत्वपुरुषान्यताख्यातिरूपः, तेन प्रत्यक्षीकृतप्रत्यक्षश्रुतिमूलयोगशास्त्रोक्तयोगोपाय साध्ययोगः, तेन वेदान्तशास्त्रश्रवणं जायते, तेन च युक्तिसम्भावितत्वानुसन्धानं मननं जायते, तेन मनननिदिध्यासनाभ्यां निस्सन्दिग्धेऽर्थे योगाभ्यासबलेनाष्टादश मर्मस्थानेषु स्थापितस्य मनस एकतानत्वं जायते, तेन च विजातीयप्रत्यय तिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणरूपनिदिध्यासनं जायते, ततो ध्यातृध्याने परित्यज्य निवातदीपवच्चित्तसमाधिर्जायते, तेन च वासनाजाले निश्शेषं प्रविलापिते समूले चोन्मूलिते पुण्यपापकर्मसमुच्चये वाक्यप्रतिबद्धं सत् प्राक् परोक्षावभासिते सत्यज्ञानानन्दैकरूपश्रीलक्ष्मीपरिचरणारविन्दानुस्मरणपूर्वं श्रीसर्वो त्तमानुसन्धानपूर्वं तन्निजस्वरूपदर्शनेन परमनिरतिशयानन्दाभिव्यक्तिर्जायते इत्यनु भाविन एवात्र साक्षित्वमनुभवन्तु।

तदास्तां तावदप्रकृतं, प्रकृतमनुवर्तामहे - क्षीराब्धिमध्यस्थितं योगारूढं, सप्तमीसमासः। अतिप्रसन्नवदनम्, इदमितरयोगिभ्यो वैलक्षण्यं सूचयति। ते ह्याधुनिकयोगिनः प्रबलनिरुद्धपवनवेगाः कुण्डलिनीसञ्चारमार्गश्रितान्तःकरणाः प्रायेण क्लेशवशात्क्रोधमुखा भवन्ति, नायं तथेति।

उत्तरार्धं सर्वरूपतामावेदयति।

[द्वितीयध्यानश्लोकविचारः]

उपास्महइत्यादिद्वितीयोऽपि ध्यानश्लोकस्तात्पर्यतो व्याख्यातप्राय एव।

विस्तरतो ध्येयस्वरूपं व्यासादिभिः द्वितीयतृतीययोः प्रतिपादितम्। शङ्करा चार्यैश्च भाष्यादिषु। अनन्ताचार्यैस्तु प्रतिभातिविलासेन स्मृतिमीमांसाया ज्ञानकाण्डे निरूपितम्, ततो ज्ञेयम्।

[सहस्रनामात्मकग्रन्थस्यैकमन्त्रता]

सहस्रनामात्मकग्रन्थस्यैकमन्त्रतां दर्शयति - ॐ ह्रीं इत्यादिना। यथा एकस्यैव वेदराशेरवान्तरऋग्यजुस्सामाथर्वणभेदेऽपि विध्यर्थवादमन्त्रनामधेय भेदेऽप्यवान्तरतत्तत्कार्यकरत्वेन भेदेऽपि ग्रहणकर्मतया वैकत्वम्, तथा सहस्रनाम्नां भेदेऽप्येकमन्त्रत्वमिति।

* प्रथमशतकम् *

ॐ नमो नारसिंहायेत्यसावष्टाक्षरमन्त्रः श्रीमन्नृसिंहमन्त्रेषु स्पष्टः। अष्टाक्षरद्वादशाक्षरनारायणवासुदेवमन्त्रसाधारण्यात्। अयमर्थः- भक्तमुपासक मवतीत्योम्ब्रह्म। ॐइत्येकाक्षरं ब्रह्म सर्वमन्त्राधिदैवतम्" इत्युक्तेः। अवतेष्टिलोपश्चेति(उ.सू. १.१४२) मन्प्रत्यये प्रकृतेरसम्भवेन मन्प्रत्यये सामर्थ्यादेव प्रत्ययटिलोपे मकारव्यञ्जनसांशावस्थाने अवतेः ज्वरत्वर स्रिव्यविमवामुपधायाश्चेति[पा.सू. ६.४.२०] वोपधयोरूठौ कृत्वा दीर्घसान्तां च कृत्वा सार्वधातुकेति गुण ऊठि उगुणे च ॐइति रूपसिद्धिः कार्या। तस्य च कृन्मेजन्तः[पा.सू. १.१.३९] इत्यव्ययसञ्ज्ञा। तच्चाव्ययं तच्चतुर्थीयुक्तम्। ततश्च रक्षकाय नमोऽस्त्वित्यन्वयः। रक्षक इत्युक्त्या भयाभावः सूचितः। नारसिंहेत्याश्चर्यार्थम् - पुरुषव्याघ्रोऽपि येन विदारितः, किम्पुनरन्ये।

यद्वा - क्वचिन्मनुष्यैर्मृगा हन्यन्ते, क्वचिच्च मृगैर्मनुष्या इति महच्चित्रमिदमेक एव विरुद्धदेहधारितया भक्तरक्षणार्थं प्रवृत्त इति भावः।

ततश्च ॐ उपक्रमे, नारसिंहाय नमोऽस्तु इति सम्बन्धः । ॐइत्यनुमितौ प्रोक्तं परमे चाप्युपक्रमे इति वचनात्।

यद्वा - परब्रह्मस्वरूपाय नारसिंहायेदं जीवितं देहं वा मनः प्रयच्छामि नमःशब्दस्य दानेऽपि प्रयोगात्। इदं शारीरत्वादि त्वय्येवार्पयामीति भावः। "गुर्वादिभजने दाने नमः स्यात् क्वाप्यनादरे इति वचनात्। त्वय्यर्पितशरीर वाङ्मनसस्य न कस्माच्चिदपि भयमिति भावः।

यद्वा - भजनार्थो नमश्शब्दः, क्षमापनार्थो वा।

[नमश्शब्दसार्थक्यम्]

ननु कथं नमश्शब्दप्रयोगः? मन्त्रत्वायेति चेत्- न, मन्त्रत्वस्य स्वाहान्ततया वौषडन्ततया वा सम्भवात्। तथोक्तमत्यभियुक्तैः - "स्वाहान्तो वौषडन्तो वा मन्त्रः कर्माङ्गम्" इति। सत्यम्, तथैव दृश्यते गोपाल-राम-कृष्णादिषु मन्त्रादिषु। तथाऽपि प्रसादनार्थाय नमश्शब्दः

ननु नमस्काराभिधायी नमश्शब्दोऽस्तु। माऽस्तु स पूर्वं, रामकृष्णादि मन्त्रवत् नारसिंहाय नम इति वक्तुं शक्यत्वात्। सत्यमेतत् । महाशत्रौ क्रुद्धस्य नृसिंहस्य प्रसादनं क्षमापनं विना दर्शनमेव न भवतीति नयसादनार्थं पूर्वं नमउक्तिः। इतरथा वैरिसम्बन्धसमये यः कश्चिद् वैयात्याय नारसिंहेति नामग्रहण पूर्वकमागच्छेत्। तदा तमपि क्रोधशेषवशेनैव विदारयेदिति युक्ततमा पूर्वं नमउक्तिः। तुभ्यं नमस्कारः प्रह्वीभूतोस्मि, नमः प्रह्वीभावः, अतो न मयि क्रोधवशाद्विकारः कार्यः, प्रणिपातातिरिक्तक्षमापनहेतोरभावादिति।

नारसिंहायेत्यस्यार्थः - नृणाति नरः। नृ नये, पचाद्यच्। हिनस्तीति सिंहः, पृषोदरादित्वात्साधुः। यद्वा - सिव्यति सिंहः। षिवेर्हे नुमागमे सिंह इति रूपसिद्धिः। नरस्य सिंहस्य अवयवा यस्मिन्देहे तन्नारसिंहम्, तद् यस्यासौ नारसिंहः परमात्मा। मत्वर्थीयोऽच्। पूर्वदेहोऽन्यपदार्थः। अपरत्र तु अस्येति

परमात्मा व्यापकः। यश्चैक एवानेकदेहेषु व्यापकतया तिष्ठतीति सर्वगत्व सर्वास्तित्वे समसूचिषाताम्।

[नृसिंहस्य सर्वगत्वादिसमर्थनम्]

ननु कथं निर्गुणस्यामूर्तस्य सर्वोत्तमस्य मनुष्यसिंहशरीरधारितया सर्वगत्वास्तित्वे अभिधीयेते। सत्यम्, अशरीर एव परमात्मेति। तथा च श्रुतिः - अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः(छां.उ. ८.१२.१ इति। वावेत्यव्ययम्। तथाऽपि देहसम्बन्धेनैव विष्ण्वाद्यभिधानाङ्गीकारात्।

विष्ण्वाद्युत्तमदेहेषु प्रविष्टो देवताऽभवत्।
मर्त्याद्यधमदेहेषु प्रविष्टो मानुषोऽभवत्।

इति सरस्वतीवचनात्। अन्यथा पारमार्थिकनिर्गुणत्वाशरीरत्वस्वीकारे उपासकत्वमुपास्यत्वम्, नमःकर्तृत्वे नमस्यत्वे चैकभेदनिमित्तकं नैव भवेत्, वाङ्मनसागोचरस्यानमस्यत्वात्। "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" [तै.उ. ब्र.व. ४] इति वचनात्। देवस्य ततो युक्तं भक्ष्यभक्षकनृपञ्चास्यदेहावष्टब्धस्यापि निजभक्तवचसः सत्यत्वविधानाय सर्वगत्वं सर्वास्तित्वञ्च।

[प्रकारान्तरम्]

अथवा- नरसिंहस्यावयवा यत्र स्वरूपे तन्नारसिंहम्। यद्वा- नरश्चासौ सिंहश्च नरसिंहः, नरसिंह एव नारसिंहः, तस्मै। स्वार्थिकेऽणीष्टसिद्धिः। नमोऽस्त्वित्यध्याहारः, क्रियाध्याहारेण विना वाक्यापरिसमाप्तेः। नमःस्वस्ति स्वाहास्वधालंवषड्योगाच्च[पा.सू. २.३.१६] इति स्मृतेश्चतुर्थी। चतुर्थ्या शब्दान्तरयोगेऽपि भावेऽपि सात्विककर्मद्योतनाय नमःशब्दः। तदुक्तं शङ्कराचार्यैः - सात्विकं तु कर्म स्तुतिनमस्कारादि लक्षणम्" इति। ॐ नम् इति महामन्त्रत्वं ख्यापयति। ॐ इति ब्रह्मस्वरूपत्वम्,

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः [भ.गी., १७.२३पू]

इति भगवद्वचः स्पष्टयति। ततश्च धृतमानुषसिंहवेषोऽपि परब्रह्मस्वरूप इत्युक्तम्।

[नरसिंहशब्दस्य जीवेश्वरपरत्वादिविचारः]

अत्रायं निष्कर्षः - असौ जीवो वा, ईश्वरो वा । आद्ये प्राज्ञादिशब्दैरेव व्यपदेश्यः, न नारसिंहादिशब्दैः। अथेश्वरश्चेत् तर्हि प्राज्ञतैजसविश्वादिशब्दैरेव व्यपदेश्यः। तथा तस्य देहसम्बन्धे माया वा निमित्तम्, अविद्या वा। आद्ये ईश्वर शब्दव्यपदेश्यः, मायाप्रतिफलितचैतन्यस्यैवेश्वरशब्दाभिधेयत्वात्। द्वितीये जीवतया व्यपदेश्यः, अविद्याप्रतिफलितचैतन्यस्यैव जीवशब्दाभिधेयत्वात्। ततश्चेश्वरस्य देहसम्बन्धे प्राज्ञादिहिरण्यगर्भवैश्वानरादिशब्दैरेव व्यपदेशः। जीवस्य देहसम्बन्धे सुषुप्त्याद्यवस्थाश्रयतया प्राज्ञतैजसविश्वशब्दव्यपदेशः। तत्रेश्वरस्य शरीरत्रयोत्पत्ति रीदृशी वक्तव्या- अवक्तव्यत्वापन्ना मायालक्षणा प्रकृतिः कारणशरीरम्। तत्राभिमानी प्राज्ञ इत्युच्यते। तत्र तमःप्रधानप्रकृतेरीश्वराज्ञया भूतानि जातानि। "आत्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। (तै.उ. ब्रह्म. १) इति श्रुत्यभिहितक्रमेणापञ्चीकृतभूताकारपरिणता ज्ञानात् क्रमाद्बुद्धीन्द्रियाणि श्रोत्रत्वगक्षिरसनघ्राणसंज्ञानि जातानि। अपञ्चीकृत भूतसत्वांशप्रधानाज्ञानादन्तःकरणं च मनोबुद्धिरहङ्कारश्चित्तमिति सङ्कल्पा त्मक-बोद्धव्यात्मकाभिमानात्मक-चेतनात्मकवृत्तिभेदाच्चतुर्भेदं जातम्। केचिद् विमर्शकनिश्चयात्मकवृत्तिभेदात् मनोबुद्धिरिति द्विभेदमाचक्षते। अपञ्चीकृतभूत रजोंऽशाकारपरिणताज्ञानात् कर्मेन्द्रियाणि पादपायूपस्थाख्यानि जायन्ते। तेषाञ्चे न्द्रियत्वं बुद्धिवृत्तिहेतुत्वात्। प्राणापानव्यानोदानसमाना इति पञ्चवायवश्च। एतदीश्वरस्य सूक्ष्मं शरीरम्। प्राज्ञस्तत्राभिमानी तैजसत्वं प्रतिपद्यते। ईशश्च हिरण्यगर्भताम्। ईशः समष्टिः सर्वेषां स्वात्मतादात्म्यबोधनात् इति वचनात्

इतरे जीवा व्यष्टिज्ञाः। तदभावादीशः तेषां स्थूलदेहोत्पत्तये भूतानि पञ्चीकृतभूतैर्विरचय्य तत्र भुवनानि भोग्यादीनि जनयति। तदेतद् विराट्संज्ञं स्थूलशरीरमीश्वरस्य। तत्र हिरण्यगर्भो वैश्वानरोऽभवदिति सङ्क्षेपः। विशेषाच्च जगदीश्वरस्य सविशेषं रूपं ब्रह्ममीमांसायां तृतीयेऽध्याये द्वितीये चरणे तत्वम्पदार्थशोधनके "न स्थानतोऽपि परस्योभयलिंङ्गं सर्वत्र हि" [ब्र.सू. ३.१] इत्याद्यधिकरणचतुष्टये निरूपितं ज्ञेयम्। तथा द्वितीयाध्याये तृतीयचरणे निरूपितं ज्ञेयम्।

(जीवशरीरादिनिरूपणम्)

जीवशरीरोत्पत्तिरीदृशी - आत्माज्ञानलक्षणकारणदेहाभिमाने सुषुप्त्य वस्थायां जीवः प्राज्ञतां लभते। षोडशकलसूक्ष्मदेहाभिमाने स्वप्नावस्थायां स जीवस्तैजसतां लभते। देवमनुष्यतिर्यगादिस्थूलदेहाभिमाने जागरावस्थायां स जीवो विश्वतां लभतइति सङ्क्षेपः। तथा विशेषाज्जीवस्वरूपमपि त्वम्पदार्थ शोधनरूपेण ब्रह्ममीमांसायां तृतीयेऽध्याये द्वितीयचरणे "सन्ध्ये सृष्टिराह हि (ब्र.सू. ३.२.१ इत्याद्यधिकरणचतुष्टये निरूपितम्। तथा (द्वितीयेऽ)ध्याये तृतीये चरणे "चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भाव भावित्वात्"(ब्र.सू. २.३.१६ इत्याद्यधिकरणचतुष्टये निरूपितं ज्ञेयम् ।

[नारसिंहव्यपदेशसार्थक्यम्]

किंच नारसिंहस्तु देहः, अन्यपदार्थतया देहस्यैव प्राधान्यप्रतीतेः नारायणोऽङ्गमिति नारायणादिशब्दानामपि देहवाचित्वादिति। ततश्च ईश्वरत्वे प्राज्ञादिशब्दैर्व्यपदेशः। जीवत्वे पुनः प्राज्ञादिशब्दैरेवेति नारसिंहशब्द व्यपदेशोऽयुक्त इति।

तत्राभिधीयते - परब्रह्मैवायं श्रीमन्नृसिंहः, परमार्थतो नेश्वरो नापि जीवः। एतस्य ब्रह्मस्वरूपता च पूर्वोत्तरतापनीयश्रुतिसिद्धा। नारसिंहपदमपि

परब्रह्मस्वरूपं चैतन्यमेव लक्षयति, महावाक्यादौ लाक्षणिकस्यैव शब्दार्थत्वस्वीकारात्। तत्र बहुव्रीहिगर्भबहुव्रीह्याश्रयणात् नोक्तोपालम्भः। देहसम्बन्धे च लीलैव हेतुः, माया वा। तत्र स्वाश्रयमव्यामोहयन्ती विपरीत कारिणी माया, स्वाश्रयं व्यामोहयन्ती बिपरीतकारिण्यविद्येति तयोः स्पष्टो भेदः। नीहारेणेत्यादिश्रुतिरपि स्पष्टं भेदमेवाचष्टे। देहवाचिशब्दस्य स्वरूप लक्षकत्वे तत्सत्यत्वे च सनकादिप्रह्लादादिप्रत्यक्षं प्रमाणम्। सहस्रशीर्षा, विश्वतश्चक्षुः इत्याद्यनेकाः श्रुतयोऽपि प्रमाणभावं भजन्त इति परब्रह्मैव श्रीमन्नृसिंह इत्यास्तां तावदप्रकृतम्, प्रकृतमनुवर्तामहे ।

वज्रदंष्ट्राय - वज्ररूपा दंष्ट्रा यस्यासौ वज्रदंष्ट्रः, अभेद्यदंष्ट्र इत्यर्थः। वज्रेति यात्येव न प्रतिहन्यते कदाचिदपीति वज्रम् आयुधविशेषः ऐन्द्रः। ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवम्रेरामालाः [उ.सू. २.२८] इत्युणादिसूत्रेण रन्नन्तानां साधुत्वम्। दंष्ट्रेति "दाम्नीशसयुयुजस्तुतुद सिसिचमिहपतदशनहः करणे ष्ट्रन्"(पा.सू. ३.२.१८२)इति सूत्रेण दंश दशने" इत्येतस्माद्धातोः दंश्यतेऽनया सा दंष्ट्रेति। अनित्यत्वान्नखित्वान्ङीप्, मत्वर्थीयोऽच्। यद्वा - वज्रो हीरः, तेन तुल्या दंष्ट्रा यस्येति। मणिवेधकं रत्नं हीरक उच्यते, सहसाऽविनाशित्वात्। तथा च कोशः - "वज्रोऽस्त्री हीरके पवौ [अ.को. ३.३.१८५] इति।

वज्रिणे - वज्रो यस्यास्तीति वज्री। अत इनिठनौ"[पा.सू. ५.२. १२५] इतीनिप्रत्ययः। वज्रायुध इत्यर्थः यद्वा- वज्रवदन्यास्त्ररत्नवेधकमायुधमस्येति वज्री।

वज्रदेहाय - वज्रतुल्यो देहो यस्येति । यद्वा - वैरिदेहवेधकं वज्ररूपं देहं यस्येति वज्रदेहः, तस्मै। यद्वा - वज्रेण हीरकेणोरुतेजस्यं वपुर्यस्येति वज्रदेह इन्दुधवलर्मित ध्यान उक्तः।

वज्राय - व्रजत्येव न प्रतिहन्यते कदाचिदपीति वज्रः। न कदाचि दप्यरीन् दृष्ट्वा श्रुत्वा वा भयेनैव तथैव तिष्ठतीति। तथा कथञ्चिद् गतो वाऽप्यनाप्योऽप्युद्यमपराङ्मुखो यातीत्यर्थः। मत्वर्थीयोऽप्रत्ययः।

वज्रनखाय - वज्ररूपाणि नखानि यस्येति वज्रनखः। नहेर्हलोपश्च षण्" [उ०५।२३] इत्यौणादिकसूत्रेण खन् प्रत्ययः।

[पौनरुक्त्याशङ्कानिरासः]

नन्वेकमेव वस्त्वनेकैर्नामभिः स्तूयते चेत्तर्ह्यर्थाभेदात्पौनरुक्त्यमिति चेन्न, अर्थपौनरुक्त्येऽपि शब्दानामपुनरुक्तत्वात्। अतो घटकलशशब्दादौ प्रवृत्तिनिमित्तैक्येऽपि पौनरुक्त्याभावोऽवसीयते। अर्थपौनरुक्त्यस्यातीवादोष त्वञ्च "सहशाखया प्रस्तरं प्रहरति" इत्यत्र प्रतिपत्त्यर्थं वा, अर्थकर्म वेति सन्दिह्य, द्वितीययाऽर्थकर्मत्वप्राप्तावपि द्रव्योपदेशेन तदर्थसूत्रयोः सक्त्वधि करणसूत्राभ्यां भिन्नाक्षरनिवेशाभ्यामर्थपौनरुक्त्यप्राप्तावपि बहुकृत्वोऽपि पथ्यं वेदितव्यम्। तस्मात् "न पुनरुक्तता महान्दोषः" इति भगवता भाष्यकारेण चतुर्थाध्याये[पू.मी. ४.२.१ -१३] परिहृतम्। दृश्यते च लोककाव्ययोः श्रीपति माधवादिशब्दानां वृत्त्यनेकत्वाभावेऽपि पौनरुक्त्याभावः। क्वचित्तु शब्द भेदेऽपि वृत्तिभेदेनार्थभेदात् पौनरुक्त्याभावः। यथा हरिगङ्गामात्रश्वादि शब्दानाम्। तस्मान्नात्र पौनरुक्त्याशङ्काऽपि।

वासुदेवाय - अत्र प्रसिद्धोऽर्थः वसुदेवस्यापत्यं वासुदेव इति। ऋष्यन्धकवृष्णिकुरुभ्यश्च"[पा.सू.४.१.११] इत्यण्प्रत्यय इञो बाधकः। नायमर्थः प्रकृतानुपयोगित्वात्। श्रीनृसिंहसहस्रनामप्रस्तावे देवकीसुतवासुदेव नाम्नः प्रस्तावस्यातीवायुक्तत्वात्। युगस्वल्पकल्पमन्वन्तरावतारनाम्नामपि अत्रैव वक्ष्यमाणत्वेऽपि अपत्यार्थतद्धितान्तनामधेयस्य सुतरां प्रकृतानुप योगित्वम्।

ततश्चायमर्थः - वसति वासयति आच्छादयति जगन्माययेति वासुः। दीव्यतीति देवः, स एव देवो वासुदेवः। अथवा - सर्वेषु भूतेषु साक्षितया साक्षात् स्वाध्यस्तविश्वक्षणकर्तृतया वसतीति वासुः, वासुश्चासौ देवश्च वासुदेवः। अथवा - सर्वाणि भूतान्यस्मिन् वसन्तीति वासुः, दीव्यतीति देवः। वासुश्चासौ देवश्च वासुदेवः। अथवा - सर्वाणि भूतानि स्वस्मिन्वासयतीति वासुः, दीव्यतीति देवः। निवासार्थाद् वसेर्बहुलग्रहणसामर्थ्यात् ड़ुतुप्रत्ययः। अथवा - वसतिकृतिषु वसुः देवो धनं वा। सृहित्रप्यसिवसिहनिक्ष्णिघृतिबन्धि मनुभ्यश्च उनिच्चेति उः। वसुश्चासौ देवश्च। अथवा - वसुभिर्दीव्यतीति वसुदेवः, स्वार्थिकोऽण्प्रत्ययः। अथवा- वसुभिः क्रीडतेऽसौ वासुदेवः। अथवा - वसूनि क्रीडन्त्यस्मिन्नसौ वसुदेवः देव इति पचाद्यच्।

वन्द्याय - पूज्यायेत्यर्थः। वन्द्यो नमस्यः।

वरदाय - वरं ददातीति वरदः, आतोऽनुपसर्गे क [पा.सू.३.२.३] इति कः। तस्मै वरदाय। यद्वा - वरां गां दक्षिणां ददातीति वरदः। यद्वा - अभिमतं वरं भक्तेभ्यो ददातीति वरदः।

(१०) **वरात्मने** - वररूप आत्मा स्वरूपं यस्यासौ वरात्मा। आप्नोते र्व्याप्त्यर्थात् मनिन्प्रत्यये आत्मेतिं रूपम्। स्वयं तद्रूपः सन्नपेक्षितं भक्तेभ्यो ददातीत्यर्थः।

वरदाभयहस्ताय - वरदाभये मुद्रे हस्तयोर्यस्यासौ वरदाभयहस्ताय। हसत्यरीनिति हस्तः। हसतेस्तन्प्रत्यये हस्त इति रूपम् (द्र. उ.सू. ३.८६)। प्रह्लादाय वरदमुद्रा, तत्सेवकानाञ्चाभयमुद्रेति भावः

वराय - वरो देयं, तद्यस्यास्त्यसौ वरदस्तस्मै। यस्मै यद्यद्दातव्यं तत्र तत्सर्वं तत्सामर्थ्यं वा तस्य वर्तत इत्यर्थः। अथवा - उपासनाविशेषेणात्मान मेव भक्तेभ्यः प्रयच्छतीत्यर्थः।

ननु वरदश्चेत्स्वयं स्वस्मादेव प्राप्तव्यं स्यात्, न पुनः स एव प्राप्तव्य इत्याशङ्क्याह - **वरदात्मन** इति।

वररूपिणे - वरं रूपं यस्यासौ वररूपी। अत इनिठनौ" [पा.सू. ५.२.१२५] इतीन्प्रत्ययः। वैरिवधाय धृतभयानकरूपोऽपि भक्तेभ्यः प्रसन्न वरदं रूपमङ्गीकृतवान् इत्यर्थः।

वरेण्याय - व्रियते वरेण्यः। वृञ एण्यः [उ.सू. ३.९८] इत्यौणादिक एण्यप्रत्ययः। भक्तैरपेक्षिताय। अपेक्ष्य इति भावः।

वरिष्ठाय - अतिशयेन उरुः वरिष्ठः। अतिशायन इष्ठन्प्रत्ययः(द्र. पा.सू. ५.३.५५)। ततश्च प्रकर्षस्य प्रकृत्यर्थे विशेषणत्वात् प्रकृत्यर्थे वर्तमानात् प्रातिपदिकात् तद्विधेः स्वार्थिकप्रत्ययानाञ्च सर्वप्रकृत्यर्थविशेषण द्योतकत्वात् इष्ठिनि प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थ स्फवर्बंहिगर्वर्षित्रब्द्राघि वृन्दाः[पा.सू. ६.४.१५७] इति सूत्रेण वरिष्ठ इति रूपसिद्धिः

श्रीधराय - श्रयन्त एतां सर्वे जना इति श्रीः। क्विब्वचिप्रच्छ्यायत स्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च[वा. ३.२.१७८]। धृ धारणे, धरति ध्रियते वा धरः। श्रियो धरः, श्रीधरः। अन्यथा, कर्मण्यण्[पा.सू. ३.२.१] श्रियन्धर इति वा स्यात्। तस्मै श्रीधराय। लक्ष्मीसहितायेत्यर्थः।

प्रह्लादवरदाय - प्रह्लादाय वरं ददातीति प्रह्लादवरदः। तस्मै प्रह्लादवरदाय। तद्वचनमेव सत्यं कर्तुं प्रवृत्तत्वात् तद्वरदत्वमिति भावः।

प्रत्यक्षवरदाय - प्रत्यक्षेभ्यो वरं ददातीति प्रत्यक्षवरदः। स्वभक्तानु ग्रहेण स्वभक्तप्रत्यक्षवर्तमानानां स्थितानामभयलक्षणं वरं ददातीति भावः। यद्वा - प्रत्यक्षं वरं ददातीति प्रत्यक्षवरदः, तस्मै। प्रत्यक्षमिति - अक्ष्णोराभि मुख्यं प्रत्यक्षम्। लक्षणेनाभिप्रती आभिमुख्ये[पा.सू. २.१.१४] इति समासः।

यद्वा - अक्षि अक्षि प्रतीति वीप्सायां समासः। प्रतिपरसमनुभ्योऽक्ष्णः(द्र. पा.सू. ५.४.१०७) इति सूत्रेण प्रत्यक्ष अतिष्वचि कृते, यस्येति च(पा.सू. ६.४.१४८) इति भसंज्ञायां, तस्य लोपः(पा.सू. १.३.९) इति वर्णलोपे इष्टसिद्धिः।

परात्परतरेशाय - अर्थस्तु अतिशयेन परः, परतरः, तस्मै। पाराय पारः मर्यादारूपायेत्यर्थः। क्वचित् परम्पराय तीर्थाय" इति पाठः स्पष्टार्थः। प्राप्तव्यपराकाष्ठाभूतायेत्यर्थः।

(२०) **पवित्राय** - अनेन पुनाति यो वा पुनाति ऋषिदेवता वा तत् पवित्रम्। पुवः संज्ञायाम्[पा.सू. ३.२.१८५], कर्तरि चर्षिदेवतयोः[पा.सू. ३.२.१८६] इति इत्रप्रत्यये रूपसिद्धिः। "ऋषौ करणे देवतायां कर्तरि च पुवः इत्रः स्यात" [सि.कौ. पु. २८३] इत्यर्थः।

पिनाकिने - पिनह्यते पिनाकः। स विद्यते यस्यासौ पिनाकी। अत इनिठनौ[पा.सू.५.२.१२५] इति इनिः। क्वचिद् **विपाशिने** इति पाठः। तत्रायमर्थः - विशिष्टाः पाशाः विपाशाः। ते वर्तन्ते यस्येति विपाशी। अथवा - विगताः पाशाः अविद्याख्याः येषां ते विपाशाः। ते सन्त्यत्रासौ विपाशी। यद्वा - विगताः पाशा अविद्याख्या यस्यासौ विपाशी। अविद्याख्यपाश रहितायेति भावः।

पावनाय - पावयतीति पावनः, तस्मै। पावनाय पवित्रकर्त्रे।

प्रसन्नाय - प्रसीदति प्रसन्नः, तस्मै। क्रोधरहिताय, प्रसादवत इत्यर्थः।

पाशिने - पाशो यस्यास्तीति पाशी, तस्मै पाशिने। इनिः। स्वमायया जगद्वश्यकारिणे।

ननु मायाख्यपाशाश्रयत्वे ह्येतद्भजनस्याकिंचित्करता भवेत् , अत आह - **पापहारिणे**। पापहरणे हेतुः, तच्छीलो वा पापहारी। ताच्छील्ये हेतौ वा णिनिः। पाति पीयते वा दुर्जनैः पापम्। पानीविषिभ्यः प [उ.सू. ३.२] इत्यौणादिकः प्रत्ययः। क्वचित् **पाशहारिणे** इति पाठः। तत्रार्थः - पाशः

कामकर्मादिदूषितमलिनसत्वाख्यं विषं हरतीति पाशहारी, तस्मै। तदुक्तम् -

यन्नामकीर्तनं भक्त्या विलायनमनुत्तमम्।
मैत्रेयाशेषपापानां धातूनामिव पावकः।। [वि.पु. ६.८.२०]
अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव।। [वि.पु. ६.८.१९]
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम्।। [वि.पु. २.६.३९]

पुरुष्टुताय - अनेकैर्बहुप्रकारैः स्तुतः पुरुष्टुतः तस्मै। अनेकस्तुताये त्यर्थः। यद्वा - पुरुष्टुतः। प्रणतीति पुरुः, धर्मो राजा वा। पृ-भिदि-व्यधि-गृधि-धृषिभ्यः[उ.सू. १.२३] इति कुः। ष्टु स्तृतौ, निष्ठाक्तः

पुण्याय - पुण्याय पापहरणशीलाय। अत एव पुण्यवान् श्रवण कीर्तनादिपुण्यजनक इत्यर्थः। पुण्यं फलापूर्वं, तद्यस्यास्ति स पुण्यः। मत्वर्थीयोऽच्। यद्वा - पुनाति पूयते वाऽनेन, तत्पुण्यम्। पूञो यण्णुक् ह्रस्वश्च[उ.सू. ५.१५] इति उणादिसूत्रेण पूञो णुकि यदागमे ह्रस्वे च इष्टसिद्धिः।

पुरुहूताय - पुरु प्रभूतं हूतं यज्ञेष्वाह्वानं यस्य सः, तस्मै। यज्ञेश्वर रूपायेत्यर्थः।

तत्पुरुषाय - स चासौ पुरुषश्च तत्पुरुषः। ते असौ पुरुषः। अन्येषामपि (पा.सू. ६.३.१३७) इति वा दीर्घः।

(३०) **तथ्याय** - तथा साधुस्तथ्यः। तथेति सप्तम्यन्तात् ,तत्र साधुः [पा.सू. ४.४.९८] इति यत्प्रत्यये तथ्य इति रूपम्। यथार्थायेत्यर्थः।

पुराणपुरुषाय - पुरि शेतेऽसौ पुरुषः। पुरं शरीरम्। तत्स्पष्टयति भारतीयं वचः -

नवद्वारं पुरं पुण्यमेतैर्भावैर्व्यवस्थितम्।

भाव्ये शेतेऽयमात्मा यत् ततः पुरुष उच्यते।।

यद्वा - पुरुषु तत्कर्मशालिषु तत्त्वेन सीदति पुरुषः। पुरुःक्तरि। यद्वा - रूपाणि फलानि सिनोति ददातीति पुरुषः। यद्वा - पुरूणि भुवनानि संहारकाले स्यति अन्तं करोतीति पुरुषः। यद्वा - पृणति पुरुषः। यद्वा - पृणति पूर्यते वा पुरुषः। पुरः कुषन् उ० ४.७४] इत्यौणदिकः प्रत्ययः। अथवा - पूरयति व्याप्नोति जगदिति पुरुषः। य इमं च लोकं च परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति(बृ.उ.३.७.१ इति श्रुतेः। पुराऽपि नवो नेदानीमिति पुराणः। बहुकालीनो नेदानीन्तन इत्यर्थः। पूरयति जगत् पृणति पुरुषः। पुराणश्चासौ पुरुषश्च पुराणपुरुषः। तस्मै नमोऽस्त्विति शेषः।

पुरोधसे - पुरो दधातीति पुरोधाः। हितादेशं करोतीति यावत्। वहिहाधाञ्भ्यश्छन्दसि [उ. ४.२३०] , पुरसि चेति धाञोऽसि इष्टसिद्धिः।

पूर्वजाय - पूर्वं जायतेऽसौ पूर्वजः। सर्वाद्यायेत्यर्थः।

पुष्कराक्षाय - पुष्णातीति पुष्करम्। पुष्करोपमिते अक्षिणी यस्यायौ पुष्कराक्षः , तस्मै। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (पा.सू. ५.४.११३) इति षच्। अथवा- हृदयपुण्डरीके भवनानि विषयताप्राप्तेः स्वरूपेण प्रकाशत इति पुष्कराक्षः, तस्मै पुष्कराक्षाय।

पुष्पहासाय - मुकुलतया वर्तमानपुष्पार्धानां हासवत् प्रपञ्चरूपेण विकासो यस्यासौ पुष्पहासः। तस्मै पुष्पहासाय।

हासाय - हासवद्हासः प्रसन्नः तस्मै।

महाहासाय - हासो हास्यं वदने यस्यासौ महाहासः। महती चराचरात्मिका सृष्टिर्यस्येत्यर्थः।

निश्वसितमस्य वेदाः वीक्षितमस्य पञ्चभूतानि।

विस्मितमस्य चराचरमस्य(च) सुप्तं महाप्रलयः।।(भामती श्लो. २) इत्युक्तत्वात् हसनं हस्रः। हह विधाभ्यश्छन्दस्यसुन् सुच् इति औणादिकेने ष्टसिद्धिः।

शार्ङ्गिणे - शृङ्गविकारं धनुरस्यास्तीति पूर्वेण सम्बन्धः।

सिंहाय - ननु पूर्वं शार्ङ्गिण इत्युक्तम्। इदानीं सिंहायेति वदति। न सिंहस्य धनुःकार्यकरत्वमिति चेत् न, विक्रमशालित्वात् सिंहवत् सिंहः। यद्वा - भीमो भीमसेनः, भामा सत्यभामेतिवत् नृशब्दलोपेन सिंहो नृसिंहः। उभयावयवारब्धशरीरत्वात् मनुष्याङ्गे धनुर्धारित्वं युक्तमित्यर्थः। तदुक्तं ध्याने- त्र्यक्षं चक्रपिनाकसाभयवरान् बिभ्राणमिति ।

(४०) **सिंहराजाय** - हिनस्तीति सिंहः। सिंहानां राजा सिंहराजः इति। राजाहस्सखिभ्यष्टच् (पा.सू. ५.४.९१)। अत्र सिंहानां राजः सिंहराज इति विग्रहं कुर्वाणा महाभाष्यटीकाद्यनभिज्ञा इत्युपेक्षणीयाः

जगद्वश्याय - जगद् वश्यं यस्यासौ जगद्वश्यः। एष उ एव साधुकर्म कारयितृत्वेन जगद्वश्यतां नयति। अथवा - जगतो भक्त्या वशं गच्छतीति यावत्।

नाहं वसामि वैकुण्ठे योगिनां हृदये रवौ,
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ।।

इति भगवद्वचनात् ।

अट्टहासाय - अद्भुतहासायेत्यर्थः ।

रोषाय - क्रोधरूपायेत्यर्थः। यद्वा - रोषायतीति रोषः। हिंसार्थरुषेरच् प्रत्ययः। वैरिहिंसक इत्यर्थः सम्पद्यते।

जलावासाय - जल आवासो यस्यासौ जलावासः, तस्मै जलावासाय। जलपर्यङ्कशायिन इत्यर्थः।

भूतावासाय - एत्यावसन्त्यस्मिन्नित्यावासः। भूतानामावासो भूतावासः। आवास उत्पत्तिस्थानम्। आत्मन आकाशः सम्भूतः। आकाशाद् द्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी।" [तै.उ. ब्रह्म] इति श्रुतेः। अथवा - भूतेष्वावसतीति भूतावासः।

यो मां सर्वेषु भूतेषु स्थितमात्मानमीश्वरम्।
हित्वार्चां भाजने मोहात् भस्मन्येव जुहोति सः।

इति वचनात्। अथवा- भवन्तीति भूतानि। भूताः बालग्रहादयः पृथिव्यादीनि। तेषामावासो भूतावासः। तस्मै भूतावासाय।

भासिने - दीप्तिमते इत्यर्थः। भासाय - भा विद्यते यस्मिन्निति भासः, तस्मै भासाय। अथ भासृ दीप्तौ, अस्मात् कर्तरि क्विप्। भासते भाः। भासं धर्मं वा सिनोतीति भासः। अन्येभ्योऽपि दृश्यते (पा.सू. ३.२.१७८) इति इः। सकारलोपश्छान्दसः।

श्रीनिवासाय - अनपायिनी अविश्लिष्टा यस्य वक्षसि श्रीर्लक्ष्मी र्निवसति सः, तस्मै श्रीनिवासाय ।

खड्गिने - खड्गमस्यास्तीति खड्गी। अत इनिठनौ[पा.सू. ५.२.१२५] इति इनिः। खड्गधरायेत्यर्थः

खड्गजिह्वाय - खड्गवत्तेजस्विनी जिह्वा यस्येति सः, तस्मै। असिसदृशजिह्वायेत्यर्थः। लेढि जिह्वा। यद्वा- लिहत्यनया रसान् जिह्वा। शेवयह्वजिह्वाग्रीवाप्वमीवाः (उ.सू. १.१५५) इति वै निपात्या उणादिसूत्रेण।

(५०) **सिंहाय** - हिनस्तीति सिंहः। पृषोदरादित्वात् साधुत्वम्।

खड्गावासाय - खड्गे वासो यस्य। खड्गा वा सन्त्यस्मिन्नसौ, खड्गावासाय। ससामर्थ्यप्राप्तये तेऽपि तत्रैव सन्तीति। न तु खड्गादिना ससमर्थभावः।

मूलाधिवासाय- मूलेऽधिवासो यस्यासौ मूलाधिवासः। मूलं प्रकृतिः। कारणे लय इत्यर्थः। तदुक्तम् - सत्त्वरजस्तमोगुणानां साम्यावस्था प्रकृतिरिति। अथवा - मूले आधारचक्रे स्वाधिष्ठानाख्ये तदधो वा आवासो यस्य समाध्यवस्थायां स्थितिर्यस्यासौ मूलाधिवासः। तदुक्तम् - महीं मूलाधारे [सौ.ल.] इति।

धर्मवासाय - धर्मे वसतीति धर्मवासः, धर्मसाक्षीत्यर्थः। अथवा - धर्म एव वासो यस्यासौ धर्मवासः। यद्वा - स चासौ वासाश्च धर्मवासाः। तद्यथाऽस्तीति धर्मवासः, तस्मै धर्मवासाय। वस्ते शरीरम् वासः। वसेर्णित् [उ.सू. ४ २१७] इत्यसुनि णिति चौणादिकरूपसिद्धिः।

धन्विने - धनतीति धनुः। अर्तिपृवपियजितनिधनितपिभ्यो नित् [उ.सू. २ ११] इत्युसिप्रत्यय औणादिकः। धनुरस्यास्तीति धन्वी, व्रीह्यादित्वादिनिः (द्र. पा.सू. ५.२.११६)। तस्मै धन्विने, धनुष्मत इत्यर्थः।

धनञ्जयाय - दिग्विजये प्रभूतं धनम् अजयदिति धनञ्जयः। तस्मै धनञ्जयाय। अथवा धनं जयतीति धनञ्जयः, तस्मै धनञ्जयाय। संज्ञायां भृतॄवृजिधारिसहितपिदमः [पा.सू. ३.२.४६] इति खच्। अत्र सूत्रे सुपि कर्मणि चेति [पा.सू. २.२.१] सम्बाध्यत इति ज्ञेयम्। तथैवाभ्यधायि प्रसादकारैः।

धन्याय - धने निमित्ते संयोग उत्पातो वा धन्यः, तस्मै। बलादिभ्यो यत् [पा.सू.५.२.१३६] इति रूपसिद्धिः।

मृत्युञ्जयाय - मृत्युं जयतीति मृत्युञ्जयः। तस्मै, जितमृत्यव इत्यर्थः। संज्ञायाम् - [पा.सू. ३.२.४६] इति खच्।

शुभञ्जयाय- शुभं जयतीति शुभञ्जयः, तस्मै शुभञ्जयाय। संज्ञायाम् - (पा.सू. ३.२.४६) इत्येव खच्।

सूत्राय- सीव्यत्यनेन सूत्रम्। षिवु तन्तुसन्ताने। अस्मात्, सर्वधातुभ्यः ष्ट्रन्(उ.सू. ४.१५८), सिविमुच्योष्टेरू च (उ.सू. ४.१६२) इत्यौणादिकसूत्रेण वा ष्ट्रनि टेरोरादेशे सूत्रशब्दनिष्पत्तिः। ततश्च सूत्रात्मने। यथा मालास्थनानाजातीयपुष्पेषु एकमेव सूत्रं तिष्ठति तथाऽयमपि सर्वदेहावच्छिन्नकामकर्माद्यविद्यावच्छिन्नचैतन्यरूपजीवेषु शरीरेषु सूत्रात्मतया तिष्ठतीति भावः। यद्वा - तन्यते तन्तुः। तत्सन्तानमभिवृद्धिः परं परमात्मिका। तत्रायमेव कारणमिति भावः। सूचयति भक्तश्रेष्ठानामभीष्टानिष्टमिति सूचयतेष्ट्रन्प्रत्ययः।

(६०) **शत्रुञ्जयाय**- शत्रुं जयतीति शत्रुञ्जयः। अथवा- शत्रूणां जयो यस्यासौ शत्रुञ्जयः, तस्मै शत्रुञ्जयाय।

निरञ्जनाय- निर्गतमञ्जनं मायोपाधिर्यस्मात्स निरञ्जनः, तस्मै निरञ्जनाय।

नीराय - निरन्तरान् शत्रून् ईरयतीति नीरः, तस्मै नीराय। यद्वा- नीरवान् नीरः, नीरं यथा यत्र क्वापि नीयते यस्यापि जीवनाय, तथाऽयमपि नीयत इति भावः। यद्वा- नीयते नीरः। स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्[उ.सू. २.१] इति रक्प्रत्ययः।

निर्गुणाय- निर्गता गुणाः सत्वादयो यस्मात्। अथवा- गुणेभ्यो निर्गतः निर्गुणः। तस्मै निर्गुणाय गुणरहिताय, सत्वरजस्तमोभिरस्पृष्टायेत्यर्थः।

ननु सर्वथा चेद्गुणसम्बन्धरहितः, तर्हि नमस्यादिकमप्यशक्यमिति आशंक्याह - **गुणाये**ति। गुणाः सत्वादयो यस्मिन् वर्तन्ते। अनादित्वादच्। सत्वावच्छिन्नं चैतन्यं ब्रह्म, तमोवच्छिन्नं चैतन्यं रुद्र इत्यङ्गीकारात् पूर्वं पूर्वं गुणराहित्यम्, अत्र तत्साहित्यं इति न विरोधः। निर्गुणत्वं गुणत्रयपराभूत त्वम्, इतरत् गुणसम्बन्धमात्रमिति।

निष्प्रपञ्चाय- निर्गतः प्रपञ्चो यस्मात्स निष्प्रपञ्चः। प्रपञ्चोऽविद्या तत्कार्यं वा। यद्वा - मिथ्याभूतात् प्रपञ्चान्निष्क्रान्तः निष्प्रपञ्चः। प्रपञ्च मिथ्यात्वञ्च प्रपञ्चो मिथ्या दृश्यत्वात् शुक्तिरजतवत् स्वप्नवद्वा, प्रपञ्चो मिथ्या अनिर्वचनीयत्वात् अविद्याकार्यत्वादित्याद्यनुमानैरवसेयम्। ततश्च प्रपञ्चरहितायेत्यर्थः।

निर्वाणपदाय - निर्वाणं मोक्षः, तदेव पदं निर्वाणपदं, तस्मै। निर्वाणानां पदं (वा)।

निबिडाय - घनीभूतायेत्यर्थः।

निरालम्बाय - आलम्ब आश्रयः, निर्गत आलम्बः यस्य स निरालम्बः निराश्रयः, तस्मै आलम्बनरहितायेत्यर्थः।

नीलाय- नीलवन्नीलः, नीलो मेघः, नीलवर्णाय मेघवर्णायेत्यर्थः।

(७०) **निष्कलाय**- निर्गताः कला अवयवा यस्मात्स निष्कलः निरवयव इत्यर्थः।

ननु निरवयवतया निष्कलश्चेत्कथं नृसिंहत्वादिना व्यपदिश्यत इत्याशंक्याह - **कलायेति**। मायिकावयवायेत्यर्थः। यद्वा - कलयति आकलयति जगदिति कलः सर्वज्ञ इत्यर्थः। यद्वा- कल्यतेऽसौ कलः। कलयत्यसौ जगदिति कलः।

निमेषाय - निमिषति निमेषः, तस्मै निमेषाय।

निबन्धाय - निबन्धः शास्त्रं, तद्रूपः। अथवा - नितरां स्वमायया जगद् बध्नाति इति निबन्धः। अथवा - निर्गतोऽविद्याख्यसम्बन्धो यस्येति निबन्धः। अथवा - दुष्टानां नितरां बन्धो यस्मादसौ निबन्धः। अथवा - भक्तानां निवारितो बन्धो येनासौ निबन्धः। बन्धो मायावरणम्।

निमेषगमनाय - निमेषेण क्षणार्धेन भक्तकार्याय दुष्टान् प्रति गमनं

यस्यासौ, [तस्मै] निमेषगमनाय ।

निर्द्वन्द्वाय - निर्गतं द्वन्द्वं सुखदुःखशीतोष्णादि वा यस्मादसौ निर्द्वन्द्वः। यद्वा - निष्क्रान्तो द्वन्द्वात् सुखदुःखादेरिति निर्द्वन्द्वः। तस्मै दुःखरहितायेत्यर्थः। जन्ममृत्युरहिताय वा।

निराशाय - निर्गता आशा यस्मादसौ निराशः। अथवा - आशाया निष्क्रान्तो निराशः। अथवा - आशा दिशा तस्या अतिक्रान्तः, विराड्रूप इत्यर्थः।

निश्चयाय - चयान्निर्गतो निश्चयः। निश्चयो निर्णय इति वाऽर्थः। तथा च कोशः - समौ निर्णयनिश्चयाविति।

निजाय - भक्तकार्याय नितरां जायते प्रादुर्भवतीति निजः। अन्येष्वपि दृश्यते (पा.सू. ३.२.१०१))इति डः।

निर्मलाय- निर्गतो मलो यस्मात् असौ निर्मलः। निष्क्रान्तो मलात् निर्मलः। कामकर्माद्यविद्यादिमलः।

(८०) **निधानाय** - निधनविदिनोप्याय?। यद्वा - निधीयतेऽनेनेति निधानं यन्नियतास्मय? तस्मै।

निर्मोहाय - निर्गतो मोहो यस्मात् असौ निर्मोहः। तस्मै निर्मोहाय। मोहोऽज्ञानम् अज्ञानरहितायेत्यर्थः।

निराकृते - ते तुभ्यं नमोऽस्तु इत्यध्याहारः। निर्गता आकृतिराकारो यतः स तस्मै। अवच्छेदक उपाधिराकारः, स चाविद्याबुद्ध्यहङ्कारादिरूपः। तद्रहितो निराकारः। आकृतिरहितायेत्यर्थः।

नित्याय- नियतभावो नित्यः, अविनाशिने इति यावत् । -नेर्ध्रुवेत्यपि साधुः (द्र. पा.सू. ४.२.१०४)।

सत्याय- सत्यवदनलक्षणधर्मरूपतया सत्यः। तत्र साधुरिति। सत्यं ज्ञानमनन्तम्[तै.उ. ब्रह्म. १], आनन्दं ब्रह्म(बृ.उ. ३.९.३४) इति श्रुतेः।

अथवा - मूर्तामूर्तात्मकत्वात्सत्यः। सच्चत्यच्चाभवत् [तै.उ.ब्रह्म. ६] इति श्रुतेः।

सत्कर्मनिरताय - सतां कर्मणि नितरां रतः सत्कर्मनिरतः। यद्वा - सच्च तत्कर्म च सत्कर्म, तत्र निरतः। तस्मै सत्कर्मनिरताय।

सत्यध्वजाय - सत्यं ध्वजः प्रतिज्ञा यस्य। सत्यप्रतिज्ञायेत्यर्थः।

मुञ्जाय - मुञ्ज इव मुञ्जः, पिङ्गलवर्ण इत्यर्थः।

मुञ्जकेशाय - मुञ्जाकाराः केशा यस्यासौ मुञ्जकेशः, तस्मै मुञ्जकेशाय।

केशिने - कश्च ईशौ च केशाः ब्रह्मविष्णुमहेश्वरा यस्मिन्वर्तन्तइति केशी। अत इनिठनौ (पा.सू. ५.२.१२५) इति इनिः। तस्मै (केशिने)। सत्वरजस्तमोवच्छेदेन स एव त्रिमूर्तिरूप इत्यर्थः।

(९०) **हरिकेशाय** - हरिताः केशा यस्यासौ हरिकेशः तस्मै। अथवा - हरिश्च कश्च ईशश्च हरिकेशाः। (हरिकेशाः)वर्तन्ते यत्रेति। तस्मै हरिकेशाय।

शेषाय- शेषो विद्यते पर्यङ्कतया यत्र शेषः। मत्वर्थीयोऽच्प्रत्ययः। क्वचित् **केशाये**ति पाठः। तत्रायमर्थः - कस्य ईशः केशः, को ब्रह्मा तन्नियन्तेति यावत्।

गुडाकेशाय - गुडाकाया ईशः तस्मै, योगनिद्रास्वामिन इत्यर्थः।

सुकेशाय- सुष्ठु सम्यञ्चः केशा यस्य सः सुकेशः, तस्मै सुकेशाय।

ऊर्ध्वकेशाय - ऊर्ध्वं केशा यस्य ऊर्ध्वकेशः, तस्मै। यद्वा- कश्च ईशश्च, केशाभ्यामूर्ध्वम्, उपरि स्वामितया स्थित इत्यर्थः। रजस्तमोभ्या मसंस्पृष्टं सत्वमधिकम्, तत्प्रतिफलितं चैतन्यम् अन्योन्यसंस्पृष्टरजस्तमः प्रतिफलितचैतन्यात् अधिकमिति भावः। यद्वा - प्रीतिप्रकाशात्मकं सत्त्वं

प्रीतिविषादात्मकरजस्तमोभ्यामुत्कृष्टमिति ताभ्यां तद् अधिकमिति यावत्।

केशिसंहारकाय - केशिसंहारं करोतीति केशिसंहारकः। केशी दैत्यविशेषः।

जलेशाय - जलस्य ईशः जलेशः। यद्वा - जले शेत इति जलेशः, जलशायिन इत्यर्थः।

स्थलेशाय - स्थलस्य ईशः, स्थले शेत इति वा।

पद्मेशाय - पद्यते भृङ्गैरिति पद्मम्। पद्मं विद्यते यस्याः, तस्या ईशः, पद्मेशः। लक्ष्मीशायेत्यर्थः।

उग्ररूपिणे- उग्रं रूपं यस्यासावुग्ररूपः, तस्मै। दुष्टानतिशेत इति यावत्।

(१००) **कुशेशाय** - कुशे शेते असौ कुशेशः। तस्मै कुशेशाय।

इति श्रीमन्महाराजाधिराजश्रीदलपतिराजविरचिते नृसिंहप्रसादे व्रतसारे श्रीनृसिंहसहस्रनामभाष्ये नाम्नां प्रथमं शतम् ।

श्रीनृसिंहार्पणमस्तु।।

द्वितीयशतकम्

कूलाय - कूलं पारो मर्यादेति यावत्। धर्मादीनां श्रीनृसिंह एव मर्यादेत्यर्थः। कुलति आवृणोति इति कूलः। कुल आवरणे, अतः अच् प्रत्ययः। सर्वानावृणोतीति भावः। अथवा - **कुल्याये**ति पाठः। कुले भवः कुल्यः। भवार्थे यत्। गङ्गादितीरेषु कृततीर्थादितीर्थेषु प्रतिष्ठित इत्यर्थः।

केशवाय - सूर्यादिसङ्क्रान्ता अंशवः केशाः अस्य केशवः। केशाद्वोऽन्यतरस्याम् [पा.सू. ५.२.१०९] इति वप्रत्ययः। तदुक्तं श्रीभागवते (? महाभारते शान्ति.३५०.४८) -

अंशवो ये प्रकाशन्ते ममैते केशसंज्ञिताः।
सर्वज्ञाः केशवं तस्मात्समाहुर्द्विजसत्तम।। इति।

अथवा - कश्च अश्च ईशश्च केशा ब्रह्मविष्णुशिवाख्याः शक्तयः। ताः सन्त्यत्रासौ केशवः। त्रयः केशिनामानः(द्र. ऋ.सं. १.१६४.४४), केशवो वसुधातले(द्र. वि.पु. ५.१.६१)इति शक्तावपि प्रयोगात्।

तथा हरिवंशे (२७९.४७) -

को ब्रह्मेति समाख्यातः ईशोऽहं सर्वदेहिनाम्।
आवां तवांशसम्भूतौ तस्मात् केशवनामवान्।। इति।

शुक्तिकर्णाय- शुक्तिवत्कर्णौ यस्यासौ शुक्तिकर्णः तस्मै शुक्तिकर्णाय।

सुप्ताय - प्रलयकारिणे। अथवा - आत्मांज्ञानलक्षणदेहाभिमाने सर्वप्रकारज्ञानोपसंहारे बुध्देः कारणात्मनाऽवस्थानं सुप्तिः। तदवस्थाभिमानेन प्राज्ञावस्थायेत्यर्थः।

रक्तजिह्वाय - रक्ता जिह्वा यस्यासौ रक्तजिह्वः, तस्मै।

रागिणे- रागोऽस्यास्तीति रागी। अत इनिठनौ पा.सू. ५.२.११] इति इनिः। पुनः पुनः विषयानुरञ्जनेच्छा रागः। साभिलाषायेत्यर्थः।

दीप्तरूपाय - दीपी दीप्तौ" इत्येतस्माध्दातोः कर्तरि क्तः।

दीप्ताय - स्पष्टम्।

प्रदीप्ताय - अत्युग्राय।

(११०) **प्रलोभिने** - प्रकर्षेण लोभोऽस्यास्तीति प्रलोभी। सर्वविषयाभिलाषा युक्तायेत्यर्थः। अथवा भक्तविषयः सर्वात्मना लोभो वर्तत इत्यर्थः।

प्रच्छन्नाय- गुप्ताय। अथवा- प्रच्छन्नवदेव तिष्ठतीति प्रच्छन्नः,तस्मै।

प्रतोदाय- वैरिणां प्रकृष्टस्तोदो व्यथा यस्मात् असौ प्रतोदः, तस्मै।

प्रभवे - प्रकर्षेण भवतीति प्रभुः समर्थः। सर्वकर्मसु सामर्थ्यातिशय

योगित्वात् सामर्थ्यम्। ज्ञानैश्वर्यादिगुणसम्पन्नतया प्रभुः।

विभवे - विशेषेण भवतीति विभुः। विप्रसम्भो ड्वसंज्ञायाम् [पा.सू. ३.२.१८०] इति डुप्रत्ययः। तस्मै विभवे।

प्रभञ्जनाय - प्रकर्षेण भञ्जति भङ्गं करोतीति प्रभञ्जनः। अत्युत्कटपरभङ्गकारिणे।

पान्थाय - मार्गगायेत्यर्थः।

प्रमाय - प्रकृष्टा मा यस्यासौ प्रमः, तस्मै। सत्यज्ञानायेत्यर्थः।

प्रमिताय - प्रमा सञ्जाता यस्यासौ प्रमितः, तस्मै। **अप्रमितायेति** क्वचित्पाठः। तत्रायमर्थः - प्रमायेति ज्ञानवत्तोक्ता, प्रमितायेति ज्ञानविषयता। ततश्च प्रमाज्ञानमित इत्युक्तौ वृत्तिरूपज्ञानविषयतोक्ता स्यात्। तद्विषयत्वे च वृत्तिविषयतया सोपाधिकताया जडत्वं स्यात्। सर्वोपाधिविनिर्मुक्ततयैव हि स्वप्रकाशत्वात्। तदुक्तम्-

"सर्वोपाधिविनिर्मुक्तं ब्रह्म ज्योतिरिति गीयते" इति।

अथाहं ब्रह्मास्मीति निरुपाधि ब्रह्मेति विषयीकुर्वाणाया वृत्तेः अजडत्वं, तर्हि द्वैतापत्तिः। अथोक्तप्रकारेण साक्षात्काररूपापि न विषयीकरोति तर्हि अनिर्मोक्षः, महावाक्यज्ञानाभावादिति। अत आह - अप्रमितायेति। वृत्तिरूपोपाधेः स्फुरणेऽपि तद्विषयत्वाभावेन न सोपाधिकता। तस्याजडत्वात् न सदद्वैतव्याकोप इति। तदुक्तम्- सत्वं विशुद्धं श्रयते भवांस्थितौ (भा.पु. १०.२.३४) इति।

प्रकाशाय - प्रकाशयति इति प्रकाशः, तस्मै। जगदेकभासकाय। यस्य भासा सर्वमिदं विभाति" इति श्रुतेः। यद्वा - प्रकाशाय अतिप्रसिद्धायेत्यर्थः। तथा च कोशः - प्रकाशोऽतिप्रसिद्धे च (अ.को. ३.३.२१९) इति। प्रकाशते असौ प्रकाशः। प्रकाशनं वा प्रकाश इति।

प्रतापाय - प्रतापोऽस्यास्तीति प्रतापः, तस्मै। प्रतापयुक्तायेत्यर्थः। यद्वा-

प्रकर्षेण तापयति सन्तापयति शत्रूनिति प्रतापः। यद्वा - शत्रूणां प्रकर्षेण तापो यस्मादसौ प्रतापः, तस्मै।

(१२०) **प्रज्वलाय** - प्रकर्षेण ज्वलयति प्रकाशयति प्रज्वलः, तस्मै।

उज्वलाय -

ज्वालामालास्वरूपाय - ज्वालानां माला स्वरूपं ज्वालामालास्वरूपं यस्य स तस्मै। ज्वालासन्ततिरूपायेत्यर्थः।

ज्वलज्जिह्वाय - ज्वलन्ती देदीप्यमाना जिह्वा यस्यासौ ज्वलज्जिह्वः तस्मै।

ज्वालिने - जिह्वाज्वलने ज्वाला यस्यास्तीति ज्वाली। व्रीह्यादित्वादिनिः। ज्वलतीति ज्वाला। ज्वल दीप्तावित्येतस्माज्ज्वलितिवसन्तेभ्यो णः [पा.सू. ३.१.१४]। अनुपसर्गादेव णो विधेः प्रज्वल उज्ज्वल इत्यादौ सोपसर्गात् शविधिः। ज्वालारूपायेत्यर्थः।

महाज्वालाय - महाज्वाला यस्येति। ज्वल दीप्ताविति, ज्वलितिवसन्तेभ्यो णः [पू.सू.३.१.१४०] इति णः।

कालाय - कलयति सर्वाणि भूतानीति कालः, तस्मै कालाय। अथवा - कल सन्ताने कलयति गणयति दिनादिरूपतया सर्वप्राणिजातमिति कालः तस्मै कालाय। यद्वा- वैरिणां मन्युः कलयतीति कालः, तस्मै।

कालमूर्तिधराय - धरतीति धरः, कालस्य मूर्तिः कालमूर्तिः, कालमूर्तेर्धरः कालमूर्तिधरः, तस्मै कालमूर्तिधराय।

कालान्तकाय - कालस्य अन्तकः कालान्तकः। कालः सर्वान्तं करोति। असौ अस्याप्यन्तं करोतीति भावः

कल्पाय - कल्परूपाय। यद्वा- कल्पयतीति कल्पः, कल्पते कल्पः। अथवा- सत्यस्यासौ कल्पः, तस्मै।

(१३०) **कलनाय** - कलनमस्यास्ति व्यापारतयेति कलनः, तस्मै।

कृते नमः - करोतीति कृत्, तस्मै कृते।

कालचक्राय - करोतीति चक्रम्, क्रियते वा चक्रम्। करोतेर्द्वे चक्रं निति? औणादिकप्रत्यये रूपसिद्धिः। कलयति कालः, कालस्य चक्रं कालचक्रं, तस्मै कालचक्राय।

शक्राय - वैरिपराभवं भक्तानुग्रहाय कर्तुं शक्नोतीति शक्रः, तस्मै। स्फायितञ्चीति(उ०सू० २.१३) रक्प्रत्ययान्तनिपातः।

षट्चक्राय - षट्चक्राणि यस्यासौ षट्चक्रः, तस्मै षट्चक्राय। आधारे आधारचक्रं, लिङ्गदेशे स्वाधिष्ठानं, नाभौ मणिपूरं, हृदि अनाहतं, कण्ठे विशुद्धिचक्रं, भ्रूमध्ये आज्ञाचक्रं - एतानि षट्चक्राणि सुषुम्नाद्वारा कुण्डलिनीसंचारमार्गः। अन्यान्यपि चक्राणि अनुभविनां विदितानि दृश्यन्ते। तथैवं दशचक्राणि। तत्राद्यानि भक्तानुग्रहाय दर्शितानीति तद्रूप इति। सहन्ते षट्, सहेशशूलुक्क्विप् इति उणादिसूत्रेण सहेः शशादेशे प्रत्ययस्य लुकि क्विपि च रूपसिद्धिः। सहते इति इडापिङ्गळापूरितपवनक्षुब्धजाठरदण्डाहतभुजङ्गतुल्य त्रस्तकुण्डलिनीशक्तिः पृथिव्यादिभूतमनःपवनविजयप्रवृत्तकुण्डलिनी शक्तिः सञ्चारयति। या हि निरपराधा अन्यपुरुषत्रस्ता सती क्रोधवशात् समर्थस्वभर्तरि याति। तत्सञ्चारे पृथिव्यपि कम्पमाना सोढुमशक्तेति भावः।

चक्रिणे - चक्रमस्यास्तीति चक्री। चक्रं द्वादशारमष्टारं षडरं वा।

अक्रूराय - न क्रूरोऽक्रूरः। क्रूरो भयानकः। नायं भक्तेषु तथेति भावः।

कृतान्ताय - कृतस्य अन्तः कृतान्तः। सर्वसंहारकारिणे इत्यर्थः।

विक्रमाय - विक्रमते जगत्सर्वमिति विक्रमः, तस्मै। अथवा - विना क्रमतीति विक्रमः। गरुडेण गच्छतीत्यर्थः। अथवा - विशेषेण क्रमतीति विक्रमः। तस्मै विक्रमाय। अथवा - विविधः क्रमः पादन्यासो यस्येति विक्रमः तस्मै।

(१४०) **क्रमाय** - क्रमयतीति क्रमस्तस्मै। जगदाक्रमयतीति भावः।

कृतिने - कुशलायेत्यर्थः। तथा च "कृती कुशल इत्यपि" [अ.को. ३.१.५]।

कृत्तिवासाय - कृत्तिर्वासो यस्येति कृत्तिवासाः। कृत्तिश्चर्म।

कृतिघ्नाय - कृतिं परव्यापारं तत् फलं वा हन्तीति कृतिघ्नः। परदुष्टव्यापारफलनाशकायेत्यर्थः।

कृपात्मने - कृपा आत्मा स्वरूपं यस्य स तस्मै। कृपारूपायेत्यर्थः।

सङ्क्रमाय- सर्वभूतेष्वात्मतया सङ्क्रमो यस्य। यद्वा- सङ्क्रमतीति सङ्क्रमः तस्मै।

क्रुद्धाय - कोपयुक्ताय।

क्रान्तलोकत्रयाय - क्रान्तं लोकत्रयं येनासौ क्रान्तलोकत्रयः। तस्मै क्रान्तलोकत्रयाय।

अरूपाय - न विद्यते रूपं यस्यासौ अरूपः, तस्मै अरूपाय। अथवा - एन रूप्यतेऽसौ अरूपः। एन विष्णुना रूप्यमाण इति यावत्। अनेन अत्वावच्छिन्नविष्णुरूपेण अत्वगुणचैतन्यरूपसर्वशक्त्यवस्थितत्वं लभ्यते इति भावः।

ननु अरूपश्चेत्कथं नृसिंहत्वादिना स्तोतव्यो नमस्यश्चेत्याशङ्क्याह - **सरूपायेति**। सरूपेण वर्तते असौ सरूपः। रूपं सत्वादिगुणः। अथवा- सरूपेषु वर्तते इति सरूपः। तथा च [ऋ०]श्रुतिः - रूपं रूपं प्रतिरूपो बभूवेति।

हरये - अघानि पापानि तत्फलानि वा हरतीति हरिः। अथवा- अघं मायावरणं हरतीति हरिः। हृपिषिरुहिवृतिविदिछिदिकीर्तिभ्यश्च[४.११] इत्यौणादिकसूत्रेण हरतेरिन्प्रत्यये रूपसिद्धिः। तस्मै हरये इति। (ननु)

पापादिहरणशीलत्वं तीर्थादीनां अन्यदेवानां चास्ति। अतस्तीर्थादीनामपि हरिशब्दवाच्यता स्यात्। सत्यम्। हरिरिव हरिः सिंहः, तद्वदनतया नृसिंह एकदेशलक्षणयोच्यते। भीमो भीमसेनः, सत्या सत्यभामेति यावत्। अतः श्रीनृसिंहस्येव हरिशब्दवाच्यत्वाद्धरिरिति नाम। तथेति महाकविः -

करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तवम्।

हरे हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया। [माघ. १.३९] हरिशब्दवाच्य इति।

(१५०) **परमात्मने**- परमश्चासावात्मा चेति परमात्मा, कार्यकारण विलक्षणो नित्यशुद्धस्वभावः तस्मै। अथवा - परमुत्कृष्टं मायाशक्त्या आप्नोति परमात्मा। अथवा - परमादत्ते इति परमात्मा। अथवा - संहारकाले जगदत्तीत्यात्मा। अथवा - जीवरूपेण विषयानत्तीत्यात्मा। तदुक्तम् [लिङ्गपु. ७०.१६] -

यदाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यश्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते।। इति।

सातिभ्यां मनिन्मनिणौ [४.१५२] इत्यौणादिकसूत्रेण अततेः मनिण्प्रत्यये रूप मात्मेति। अथवा - परैर्मीयत इति परमः, परमश्चासावात्मा च परमात्मा। अथवा - परेषां मा ज्ञानं यस्य सः परमः। अथवा - परेषां ज्ञानं यस्मादसौ परमः। यद्वा - भक्तानां परं मा ज्ञानं यस्मादसौ परमः, स चात्मेति। परेषां मा ज्ञानं यस्येति परमः, वैरिकुटिलज्ञानवान्।

ननु सर्वव्याख्यानैरपि शैवगणेशसौरभक्तैरपि शिवगणेशसूर्यप्रभृतयोऽपि परमात्मशब्देनाभिधातुं शक्यन्ते। अतः कथं श्रीलक्ष्मीनृसिंहनामेति चेत्, सत्यमेव तत्। तथापि शिवसूर्यगणेशब्रह्माद्यपेक्षया सर्वोत्कृष्टेऽयोनिजे निजपरमधामभूते ईश्वरादीनामपि परमविश्रान्तिभूमौ लक्ष्मीनृसिंहे परे ब्रह्मणि अनेकजन्मान्तरा भ्यासवशात् प्रह्लादवन्निरुद्धबुद्धिः श्रीमन्नृसिंहनाममयेन कौतुकेन व्याचष्टे -

परमात्मन इति। परा उत्कृष्टा मा लक्ष्मीर्यस्यासौ परमः, परमश्चासावात्मा चेति परमात्मा, तस्मै। सर्वशक्त्या सर्वात्मना सर्वोत्कृष्टा मा लक्ष्मीः श्रीमन्नृसिंह एव वर्तते, नान्यत्रेति। न हि लक्ष्मीपतितया रुद्रब्रह्मादयः कदाचिद् व्यपदिश्यन्ते। अतः परमत्वं सर्वोत्तम एवेति भावः। श्रीनारायणस्तु नावतारः, परपुरुषश्रीनृसिंहरूपत्वात्। अत एव लक्ष्मीनारायणव्यपदेशस्तत्र। अथवा- परे मा यस्मात् असौ परमः, परे रजस्तमोवच्छिन्न चैतन्यरूपपरब्रह्मरुद्रापेक्षया शुद्धसत्वावच्छिन्नचैतन्यरूपतया परे उत्कृष्टे विष्णौ मा लक्ष्मीर्विद्या वा यतः स परमः। स चासावात्मेति परमात्मा तस्मै परमात्मन इति पदच्छेदः। विष्णोः परा उत्कृष्टा मा लक्ष्मीर्मोक्षलक्ष्मीर्यतो लक्ष्यतेऽसौ परमः। यद्यपि त्रयो देवास्तत एवोत्पन्नाः, तथापि शुद्धसत्वावच्छिन्नचैतन्यरूपविष्णोरेव मोक्षदातृत्वम्, न तु शिवादीनाम्।

आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात्।
ज्ञानं महेश्वरादिच्छेन्मुक्तिमिच्छेज्जनार्दनात्।

इति वचनात् ज्ञानं महेश्वरादिजं मुक्तिसाधनं विवक्षितम्। न तु मुक्तिरेव, अन्यथा पृथग्ग्रहणायोगादिति भावः।

अजेयाय - न जेयः, तस्मै अजेयाय। केनापि जेतुं न शक्यत इति भावः।

आदिदेवाय - आदिः कारणं कारणभूतो देवः। अथवा - सर्वभूतान्यादीयन्तेनेनेत्यादिः। दीव्यतीति देवः, आदिश्चासौ देवश्च आदिदेवः तस्मै। उपसर्गे घोः किः (पा.सू. ३.३.९२) इति किः।

अक्षयाय - न विद्यते क्षयो यस्यासौ अक्षयः, तस्मै। नाशरहितायेत्यर्थः। अथवा - न क्षीयत इत्यक्षयः, तस्मै अक्षयायेति।

क्षयाय - वैरिणः क्षयं प्रापितवानिति क्षयः। अन्यनाशरूपायेत्यर्थः।

क्षि क्षये अस्मात् ण्यन्तात् अच्प्रत्यये क्षय इति रूपम्। वैरिक्षयकारीत्यर्थः। क्वचिज्जयायेति पाठः। ततश्च **अक्षयाय जयाय** चेति पाठः। तत्रायमर्थः - ननु यद्यपि न क्षयं प्राप्नोति तथापि परैः पराभूतमेव तिष्ठेत्। अत आह - **जयाय** चेति। जयतीति जयः। "एरच्"[पा.सू.३.३.५६] इत्यच्प्रत्ययः। **क्वचिदक्षराय** चेति पाठः। तत्रायमर्थः - न क्षरतीत्यक्षरः कूटस्थः। क्षरतीति क्षरः सर्वभूतरूपः। तथा चाह भगवान् सर्वज्ञः -

द्वाविमौ पुरुषो लोके क्षरश्चाक्षर एव च।

क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते।। [भ.गी. १५.१७]

इति भगवदुक्तेः न क्षरतीत्यक्षरोऽविनश्वरः। अश्नुते व्याप्नोतीति क्षरः। अश्नुते अश्नाति वाऽक्षरो मुक्तिस्थानम्, अशेरन्निति प्रत्ययः। तदुक्तं महाभाष्ये-

अक्षरं त्वक्षरं विद्यादश्नोतेर्वा सरोऽक्षरम्।

इति। अयमर्थः - अश्नाति त्रींल्लोकानित्यक्षरः। यद्वा - क्षरति सञ्चरति क्षरः। अक्षरः ध्रुव इत्यर्थः।

अघोराय - घोरः क्रूरः। न घोरोऽघोरः। प्रसन्नः इत्यर्थः।

नन्वघोरश्चेत् कथं वैरिवधायावतीर्ण इत्यत आह- **सुघोरायेति**। शोभनो घोरः। क्रूरः इत्यर्थः। ननु प्रसन्नश्चेन्न क्रूरः, क्रूरश्चेन्न प्रसन्न इति। सत्यम्। आपेक्षिके हि प्रसन्नत्वाप्रसन्नत्वे। भक्तान्प्रति अक्रूरत्वेऽपि दैत्यान् अभक्तान्प्रति क्रूर एवेति भावः।

ननु यः कश्चित्प्रसन्नः कदाचित्केनचिन्नान्यत्र स क्रूरतां भजते। कथम्? प्रसादेनैव क्रोधस्यापनयात्। अतः कथं भक्ताभक्तयोः प्रसादक्रोधावित्यत आह - **घोरघोरतराय** चेति। अतिशयेन घोरो घोरतरः। घोरादपि घोरो घोरघोरतरः। अथवा- घोरया हिंसायां घोरतरः क्रूरतरः। घोरघोरतरः भक्तकार्याय प्रवृत्तोऽपि यत्र प्रसादवानपि अभक्तशिरोमणौ महाशत्रौ अतिक्रुद्ध इति भावः।

अघोरवीर्याय - नन्वत्यन्तभयानकश्चेद् भक्तेष्वप्युग्रः स्यात्। अत आह- अघोरवीर्यायेति।। अघोरं वीर्यं यस्यासावघोरवीर्यः। अघोरमहिंसकम्, वीरस्य कर्म भावो वा वीर्यं, यच्छ्रीनृसिंहस्य सामर्थ्यम्, तत्तथा न भवतीति भावः। अनेकजन्मार्जितसेवाप्रत्यक्षीकृतप्रह्लाददर्शनायैवाविर्भूतत्वे तदनुग्रह एव तात्पर्येणान्यत्र तात्पर्यार्थः, प्रासङ्गिकतद्वधाचरणादिति भावः। नमोऽ**स्त्वमोघोवीर्यायेति** क्वचित्पाठः। तत्रायमर्थः - न मोघम् अमोघम्, अमोघं फलमिति यावत्। अमोघं वीर्यं यस्यासावमोघवीर्यः, तस्मै अमोघवीर्याय।

नन्वमोघवीर्यश्चेद्वैरिहिंसायामेव तात्पर्यं स्यात्, अत आह -

ललद्घोराय। ललन्ती घोरा यस्यासौ ललद्घोरः। लीलायमाना घोरा हिंसा। लीलयैव वैरिहिंसां करोतीत्यर्थः।

(१६०) **घोराध्यक्षाय**- घोराणि क्रूरादीनि भूतादीनि वश्यतया यस्य स तस्मै

दक्षाय - समर्थायेत्यर्थः।

दक्षिणार्हाय- दक्षिणा हविः अर्हतीति दक्षिणार्हः, तस्मै। जगद्गुरुत्वादिति भावः।

शम्भवे- शं सुखं भवति यस्मादसौ शम्भुः, तस्मै शम्भवे। निरतिशयानन्दरूपाय निरतिशयानन्दरूपतया तच्चिन्तनान्निरतिशयानन्ददायिने। अथवा - शं शान्तिं भावयत्युत्पादयतीति शम्भुः। डुप्रकरणे, मितड्वादीनामुपसङ्ख्यानमिति डुप्रत्ययः[३.२.१८० । यद्वा- शं सुखं भक्तेभ्यो भावयतीति शम्भुः, तस्मै।

अमोघाय - न मोघोऽमोघः। तस्मै अमोघाय। यद्वा - न विद्यते मोघं निष्फलं कर्म यस्येत्यमोघः, तस्मै।

गुणौघाय- गुणानामोघः समूहः यस्मादसौ गुणौघः। तस्मै गुणौघायेति

अनघाय - न विद्यतेऽघं पापं यस्मिन्नसानवद्यः, तस्मै अनवद्याय।

पापरहितायेत्यर्थः।

अघहारिणे - अघं हरतीत्यघहारी, तस्मै। पापहरणशीलायेत्यर्थः। ताच्छील्ये णिनिः।

मेघनादाय - मेघस्य नादो मेघनादः। मेघनादवन्नादो यस्येति मेघनादः। यद्वा - मिहति सिञ्चतीति मेघः। तन्नादवन्नादो यस्येति मेघनादः, तस्मै।

मेघाय - मिहति सिञ्चतीति मेघः। स्वामृतवृष्ट्या जगत्सिञ्चतीति भावः।

(१७०) **मेघात्मने**- मेघवदात्मा यस्यासौ मेघात्मा। कामवर्षितया मेघरूपता। अथवा मेघात्मने - मेघानाप्नोतीति मेघात्मा। अथवा - मेघानादत्त इति मेघात्मा। यद्वा - मेघानत्तीति मेघात्मा, तस्मै।

मेघवाहनरूपाय - मेघो (वाहनं यस्य) तत् मेघवाहनम्, मेघवाहनं रूपं यस्यासौ मेघवाहनरूपः तस्मै।

मेघश्यामाय - मेघ इव श्यामो मेघश्यामः, तस्मै।

मालिने - माला विद्यते यस्यासौ माली, तस्मै। व्रीह्यादित्वादिनिः।

व्यालयज्ञोपवीताय - व्याल एव यज्ञसूत्रं यज्ञोपवीतं यस्यासौ व्यालयज्ञोपवीतः, तस्मै व्यालयज्ञोपवीतधारिण इत्यर्थः। व्यडनं हन्तुमुद्यमो यस्यास्तीति व्यालः। डलयोरभेदः। यजेः, यजयाचयतविच्छप्रच्छरक्षो नङ् पा.सू.३.३.९०) इति (यज्ञशब्द)निष्पत्तिः। उपवीतमिवे ञः। निष्ठायां रूपम्।

व्याघ्रदेहाय - व्याघ्रदेहो यस्यासौ व्याघ्रदेहः, तस्मै व्याघ्रदेहाय। व्याजिघ्रन्हन्तीति व्याघ्रः। व्याजिघ्रौजातौ कन्() इत्यौणादिकसूत्रेणेष्टसिद्धिः।

व्याघ्रपादाय - व्याघ्रस्य पादाविव पादौ यस्येति व्याघ्रपादः, तस्मै। अत्र "पादस्य लोपोऽहस्त्यादिभ्यः" [पा.सू. ५.४.१३८] इति पादान्तलोपे प्राप्तेऽपि छन्दस्त्वात्पादान्तलोपाभावः। अन्यथा व्याघ्रपाद इत्येव स्यात्। उपमितं

व्याघ्रादिभिः सामान्याप्रयोगे" [पा.सू.२.१.५६] इति समासः।

व्याघ्रकर्मणे - व्याघ्रस्येव कर्म यस्य स व्याघ्रकर्मा। तस्मै व्याघ्र कर्मणे। क्रियत इत्यस्मिन्नर्थे करोतेः कर्मणि मनिन्। सर्वधातुभ्यः [४.१४] इत्यौणादिकसूत्रेण मनिन्प्रत्यये रूपं कर्मेति।

व्यापकाय - स्वस्वरूपेण जगद् व्याप्नोतीति व्यापकः सार्वत्रिकायेत्यर्थः।

विकटास्याय - विकटमास्यं यस्यासौ विकटास्यः। नराङ्गत्वे सिंहास्यत्वं विकटमिति भावः।

(१८०) **वीर्याय** - वीर्यं सामर्थ्यं यस्यासौ, नमस्तस्मै। उत्पत्तिकारणमविद्या रूपं वीर्यमस्येति वीर्यः। अर्शादित्वादच्प्रत्ययः तस्मै। यद्वा- वीरस्य कर्म वीर्यमुच्यते। वीर्यं बलं प्रभावश्च वीरकर्म प्रकीर्तितम् इति वचनात्। सामर्थ्यवत इत्यर्थः। यद्वा- उत्सादने वीर्यं सामर्थ्यमस्येति स तस्मै।

विष्टरश्रवसे - श्रवः कीर्तिः, विष्टरो विस्तारः यशसो यस्यासौ स विष्टरश्रवाः, तस्मै विष्टरश्रवसे।

विकीर्णनखदंष्ट्राय - विकीर्णा अन्यविसदृशा महत्यो विस्तीर्णा वाऽन्यसत्त्वेभ्यो नखदंष्ट्रा यस्यासौ, तस्मै।

नखदंष्ट्रायुधाय - नखानि च दंष्ट्राश्च नखदंष्ट्राः, नखदंष्ट्रा एवायुधानि यस्यासौ नखदंष्ट्रायुधः, तस्मै। नह्यते नखः। नहेर्हलोपश्च खन्नित्युणादिसूत्रेण[५.२३] रूपसिद्धिः दंष्ट्रेति। दंश्यतेऽनया सा दंष्ट्रा। दंशेष्ट्रन्प्रत्ययः।

विष्वक्सेनाय - विश्वव्यापिनी सेना यस्यासौ विष्वक्सेनः। यद्वा - विष्वक्समन्तात्सेनासहितैरिन्द्रादिभिर्वर्तमाना देवादिसमूहा यस्य स विष्वक्सेन

ईश्वरः। सर्वलोकादीश्वर इति यावत्।

सेनाय - इनेन सूर्येण सह वर्तमानः सेनः। सूर्याध्यक्षायेत्यर्थः।

विह्वलाय - स्पष्टः। क्वचिद् **विकलाये**ति पाठः। तत्रायमर्थः - विशिष्टाः कला यस्यासौ विकलः। मृत्स्याद्यवतारास्तस्य कलाः। यथाश्रुताः चतुष्षष्टिकलास्तस्य कला इति भावः।

चलाय- चलतीति चलः, तस्मै चलाय। क्वचिद् **बलाये**ति पाठः। बलं विद्यते यस्यासौ बलः।

विरूपाक्षाय - विरूपाणि विषमाण्यक्षीणि यस्यासौ विरूपाक्षः, तस्मै विरूपाक्षाय। त्रिनेत्रायेत्यर्थः। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" [पा.सू. ५.४.११३]।

वीराय - विशेषेण शत्रूनीरयतीति वीरः। गच्छतीति वा वीरः। अथवा- शूरवीर विक्रान्तौ। वीर इति यावत्।

१९०) **विशेषाक्षाय** - विशेषे अक्षिणी यस्येति विशेषाक्षः। बहुव्रीहाविति षच्।

साक्षिणे- साक्षादव्यवधानेन स्वरूपबोधेन पश्यति सर्वमिति साक्षी।

वीतशोकाय - वीतः शोको दुःखं येनासौ वीतशोकः, तस्मै वीतशोकायेति। अस्पृष्टमोहशोकायेत्यर्थः।

विस्तीर्णवदनाय- विस्तीर्णं वदनं यस्यासौ विस्तीर्णवदनः, तस्मै। पञ्चानन इत्यर्थः।

विधानाय - विधीयतेऽनेनेति विधानं शास्त्रम्। विधानं विद्यते आज्ञारूपेण यस्यासौ विधानः, तस्मै। विधीयते इष्टसाधनतया बोध्यते कर्तव्यमिति यावत्। तदुक्तम्-

श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते ।
आज्ञाभङ्गी मम द्रोही मम भक्तो न मे प्रियः ।। इति ।

विधेयाय - विधिविषयायेत्यर्थः। विधिविषयो हि विधेयम्। विधिश्च विधायकं शास्त्रम्। ततश्च त्वमेव शास्त्रविषय इति भावः। कृतिरूपः पुरुषप्रयत्नरूपो वा सर्वधात्वनुगतः प्रयत्नो यथा, तथाऽयमप्यन्तर्यामितया सर्वानुस्यूतः व्यापारतया करोत्यर्थकरणरूपः। तदुक्तं भगवता व्यासेन महाभारते -

विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोत्थः।

नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्वपि सर्वधातून्।। इति।

विजयाय - विशेषेण जयो यस्य स विजयः। विजयरूपाय।

जयाय - जयतीति जयः। परजिदित्यर्थः।

विबुधाय - विशेषेण बुधः विबुधः, तस्मै विबुधाय। यद्वा- बुध्यते बुधः, तस्मै विबुधाय।

विभावाय - विशेषेण सम्भावयतीति विभावः। अथवा- विशेषेण भाव्यते यः स विभावः। अथवा- भवनं भाव उत्पत्तिः। विशेषेण भावः उत्पत्तिः यस्मादिति विभावः। यद्वा - विशेषेण भवत्यस्माद् विश्वमिति विभावः। यद्वा- विशेषेण त्रैगुण्योपासनादिप्रकारेण भक्तैर्भाव्यते इति विभावः। यद्वा - भक्तेभ्यो विशेषेणेष्टं फलं भवतीति विभावः। यद्वाऽभिमतमर्थ मुत्पादयतीति विभावः। यद्वा- विगतो भाव उत्पत्तिर्यस्मात्स विभावः, तस्मै।

नन्वच्प्रत्ययान्तो भावशब्दः स वाच्परजण्यन्तानामिति अण्यन्ता नामेवेति कथं भावशब्दनिष्पत्तिः(?)। शुद्धो धात्वर्थ इति चेत्, धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते" इति, "भावप्रधानमाख्यातम्" [निरुक्तम् १.१.१०]इति वचनेन भावयतीति व्युत्पत्तियोगात्। अत्राभिधीयते - नादौ नोद्यं एरण्यन्तानामिति एकदेशिमततया जयमङ्गलायां शङ्कराचार्यैरभिहितत्वात्। अत एव भावार्थाः कर्मशब्दाः[पू०मी०२.१.१]इति सूत्रमाख्यातमिति। निरुक्त

मपि ण्यन्ताद् भवतेरच्प्रत्ययोत्पादनेन भट्टाचार्यैर्भावार्थे(र्थाधिकरणे)न[पू०मी० २.१.१]बहुधा व्याख्यातमित्यलमनेन ग्रन्थगौरवापादकभाषणेन।

(२००)**विश्वम्भराय**- विश्वं बिभर्तीति विश्वम्भरः। संज्ञायाम्भृतॄवृजिधारिसहितपिदमः[पा.सू.३.२.४६] इति खच्। अत्र सूत्रे कर्मणि सुपि चानुवर्तत इति भावः।

इति श्रीमन्महाराजाधिराजश्रीदलपतिराजविरचिते
नृसिंहप्रसादे व्रतसारे श्रीनृसिंहसहस्रनामभाष्ये
नाम्नां द्वितीयं शतं विवृतम् ।

* तृतीयशतकम् *

वीतरागाय - वीतो रागो येनासौ वीतरागः। इच्छामात्रं पुनःपुनर्विषयानुरञ्जनेच्छा वा रागः। विषयालाभे इच्छोत्पत्तिः। आत्तसकलकामतया वीतरागत्वमुचितम्।

विप्राय - विविधं दातारं पातीति विप्रः। ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवमेरामालाः(उ.सू. २.२८) इति रन्नन्तानां साधुत्वम्। ब्राह्मणरूपाय। वर्णानां ब्राह्मणोऽस्म्यहम्() इति भगवद्वचनात्।

विटङ्कनयनाय - विसदृशनयनाय।

विपुलाय - समृद्धाय।

विनीताय - विशेषेण नीतो विनीतः, नीतिमान् नम्रो वा विनीतः, तस्मै विनीताय।

विश्वयोनये - विश्वस्य योनिः कारणं, तस्मै।

चिदम्बराय - चिदेव अम्बरं यस्यासौ चिदम्बरः, तस्मै चिदम्बराय।

चित्ताय - चित्तात्मकत्वाच्चित्तरूपः, तस्मै। चित्तरूपायेति ।

क्वचित् **विदम्बराय वित्तायेति** पाठः। वेदनं वित्, विदेवाम्बरं यस्यासौ विदम्बरः, तस्मै।

वित्ताय- वेदनं वित्, विदभूदिति वित्तः। यद्वा- विचारं कृतवानिति। भक्ताभक्तयोः कर्तव्याकर्तव्ययोश्च विचारः। विदः विचारणे अस्मान्निष्ठान्तः। नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्[पा.सू.८.२.५६] इति नस्यापवादत्वम्। नत्वाभावे वित्तेतिरूपम्। अथवा- वित्तो भोगप्रत्यययोः[पा.सू.८.२.५८] इति निष्ठान्तस्य लाभार्थत्वं विद्यते। निपातोऽयम् - प्रतीयत इति प्रत्ययः। प्रत्यये वित्त इति निपातभावः।

विकृताय - अप्राकृतायेत्यर्थः। मुख्यस्तु **विश्रुतायेति** पाठः। तत्रायमर्थः - विशेषेण श्रुतो विश्रुतः। त्रिलोकीप्रसिद्ध इत्यर्थः।

(२१०) **वियोनये** - विनिष्क्रान्तो योनेरिति वियोनिः, तस्मै। वियोनिरहिताय कारणरहितायेत्यर्थः।

विह्वलाय - स्पष्टम्।

विवाहाय - विवाहोऽस्यास्तीति विवाहः। अथवा- विशेषेण जगदुदरे वहतीति विवाहः। अथवा- विशेषेण वहति भक्तान् सम्पादयतीति विवाहः, तस्मै। प्रापणार्थस्य वहे रूपम्।

व्याहृतये नमः - सर्वमन्त्ररूपायेत्यर्थः। अथवा - विशेषेणाहरणं व्याहृतिः। यद्वा- विशेषेण ह्रियतेऽनेनासौ व्याहृतिरूपः, तस्मै।

विलासाय - विलसतीति विलासः, तस्मै।

विकल्पाय - विकल्परूपाय। विशेषेण कल्पयतीति विकल्पः, तस्मै विकल्पाय। यद्वा - विशेषेण कल्पतेऽसौ विकल्पः, तस्मै। विशेष भावनाविषय इति भावः।

महाकल्पाय- कल्पत इति कल्पः। महांश्चासौ कल्पश्च महाकल्पः,

तस्मै महाकल्पाय।

बहुकल्पाय - बहवः कल्पा यस्मिन्निति बहुकल्पः। यद्वा- बहुभिः कल्प्यते योऽसौ बहुकल्पः तस्मै।

कल्पाय - कल्पना विद्यते यस्मादसौ कल्पः, तस्मै।

कल्पातीताय - कल्पेभ्योऽतीतः कल्पातीतः तस्मै।

(२२०) **शिल्पिने** - शिल्पमस्यास्तीति शिल्पी, तस्मै। शिल्पं कारुकर्म।

कल्पनाय - कल्पनावान् कल्पनः, तस्मै।

सुरूपाय- शोभनं रूपं यस्यासौ सुरूपः, तस्मै। कल्याणरूपायेत्यर्थः।

ताक्ष्र्याय - तृक्षस्यापत्यं ताक्ष्र्यः। गर्गादिभ्यो यञ्[पा.सू.४.१.१०] ताक्ष्र्यो विद्यते यस्यासौ ताक्ष्र्यः। क्वचित् **तार्यायेति** पाठः। तारयतीति तार्यः। यद्वा - तीरे भवस्तार्यः।

तरुणाय - तरति तारयतीति तरुणः। बृतृदारुभ्यो नुत्(कॄवृदारिभ्य उनन्, त्रो रश्च लो वा। ३.५३-४) इत्यौणादिकसूत्रेणेष्टसिद्धिः। स्वयं तरति अन्यांश्च तारयतीति तरुण इति भावः।

फणितल्पाय - फणाः सन्त्यस्य फणी। स तल्पः शय्या यस्य फणितल्पः, तस्मै। शेषशायिन इत्यर्थः।

तडित्प्रभाय - तडितो विद्युल्लतायाः प्रभा यस्यासौ तडित्प्रभः। अर्श आदिभ्योऽच् [पा.सू.५.२.१२]। विद्युल्लताप्रकाशायेत्यर्थः।

तरस्विने - तरो जवो बलं वाऽस्यास्तीति तरस्वी, तस्मै। भक्त कार्याविलम्बकारीति यावत्।

तपनाय - तपन इव तपनः। यद्वा - तपत्यरीनिति तपनः, तस्मै। यद्वा - तपत्यनेन वा तपनः। सूर्य इति भावः।

तरक्षाय - तरं मार्गं वैरिणां क्षिणोति रुणद्धि इति तरक्षः। यद्वा - तरं बलं वेगं वा क्षिणोति नाशयतीति तरक्षः।

(२३०) **तापत्रयहराय** - तापत्रयं हरतीति तापत्रयहरः, तस्मै तापत्रयहराय। हरतेरनुद्यमनेऽच् [पा.सू. ३.२.९]। आधिभौतिकाधिदैविकाध्यात्मिकतापत्रयं हरतीति तापत्रयहर इति यावत्।

तारकाय - तारयति तमसोऽविद्याया भयाद्वेति तारकः, तस्मै।

तमोघ्नाय - तमो हन्तीति तमोघ्नः, तस्मै अविद्यानाशकायेत्यर्थः।

तत्त्वाय- अनारोपितरूपायेत्यर्थः। यद्वा - तत्वं साक्षात्कृतस्वरूप मित्यर्थः।

तपस्विने - तपो विद्यते यस्मिन्नसौ तपस्वी। यद्वा - तपश्चरतीति तपस्वी, तस्मै।

तक्षकाय - तक्षको विद्यते यस्यासौ तक्षकः, तस्मै।

तनुत्राय- तनोत्याहारं तनुः। भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उ [१ ७] इत्युणादिसूत्रविहित उः। तनुं त्रायतेऽसौ तनुत्रः। कायवाङ्मनो रक्षकत्वेऽभिधीयमानेऽपि वाङ्मनसयोरहर्निशं तत्संस्मरणकीर्तनयोर्व्यापृत त्वेन निर्भयत्वात्, शरीरस्य गृहव्याप्यत्वेन तद्विषयत्वसम्भावनायां तनुत्राये त्युक्तम्। शरीररक्षकायेत्यर्थः।

तटिने - मर्यादावते।

तरलाय - तरं बलं वेगं वा लाति आदत्ते। आतोऽनुपसर्गे कः [पा.सू. ३.२.३] इति कः। तस्मै तरलाय। यद्वा- तरलयतीति तरलः, हार मध्यस्थरत्नवत्। अवतारमध्यान्तर्गतरत्नमित्यर्थः। तथा कोशेऽपि - तरलो हारमध्यगः [अ.को. २.६.१०२]।

शतरूपाय - शतं रूपाणि यस्यासौ शतरूपः।

(२४०)**शान्ताय** - शान्तिरस्तीति शान्तः, तस्मै।

शतधाराय - शतं धाराः पाणौ यस्यासौ शतधारः। यद्वा - शतं धारा यस्य तत् शतधारं चक्रम्। तद्धस्ते यस्यासौ शतधारः। शतारचक्रधारिणे इति यावत्।

शतपत्रायताक्षाय- शतपत्रवदायते विस्तृते अक्षिणी यस्यासौ शत पत्रायताक्षः, तस्मै। बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्[पा.सू.५.४.११३]इति षच्।

स्थितये - स्थितिरचलत्वम् । आकाशवदचलायेत्यर्थः।

शतमूर्तये - शतं मूर्तयो जीवाख्या यस्य स शतमूर्तिः। अग्नेर्विस्फु लिङ्गा इव ब्रह्मणो जीवा निर्गता इत्ययमेवाशयः।

ननु ब्रह्मणो हि जीवा निर्गताः अग्नेर्विस्फुलिङ्गा इव निर्यान्ती त्यभिधीयते। इदमनुपपन्नम्। ब्रह्मणोऽपि जीववत्सोपाधिकत्वाविशेषादिति चेत्, मैवम्। मायोपाधिकचैतन्यं ब्रह्म, अविद्योपाधिकं हि चैतन्यं हि जीवः। तत्र शुद्धसत्वप्रधाना प्रकृतिर्माया व्यामोहकारिणी। मायाऽनात्मन्यात्मबुद्धिः। माया कामकर्मादिदूषिततमःप्रधानाकृतिः अस्वाश्रयव्यामोहकारिणी, तद्विपरीतकारिणी बुद्धिः अविद्येति। अतोऽस्ति जीवेभ्यो ब्रह्मणो वैलक्षण्यमिति। तथाऽभ्यधायि, असङ्गसंसारिणोर्भेदः -

भ्रमांशस्य तिरस्कारादधिष्ठानप्रधानता।
यदा तदा चिदात्माहमसङ्गोऽस्मीति बुध्यते।।
अधिष्ठानांशसंयुक्तं भ्रमांशमवलम्बते।
यदा तदा हि संसारीत्येवं जीवोऽभिमन्यते।। इति।

ततो युक्तं ब्रह्मणो जीवा निर्गता इति। चैतन्यनित्यत्वेऽपि जीवभावोऽनित्य इति भावः।

शतक्रतुस्वरूपाय - शतं क्रतवो यस्यासौ शतक्रतुः, तत्स्वरूपः, तस्मै।

यद्वा- शतक्रतुः स्वरूपे यस्य स तस्मै।

शाश्वताय - नित्याय।

शतात्मने - शतरूपाय।

सहस्रशिरसे - सहस्रं शिरांसि यस्यासौ सहस्रशिराः, तस्मै। सहस्रशीर्षा पुरुषः (पुरुषसूक्तम् १) इति श्रुतेः।

सहस्रवदनाय - सहस्रं वदनानि यस्यासौ सहस्रवदनः (तस्मै)। शेषरूपायेत्यर्थः।

(२५०) **सहस्राक्षाय देवाय** - मिलितमेकं नाम। सहस्रमक्षीणि यस्यासौ सहस्राक्षः। सहस्राक्षत्वेऽपि विरूपत्वं नास्तीति देवायेत्यनेनोक्तम्। दीव्यतीति देवः। सहस्राक्ष इति, बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् [पा.सू. ५.४.११] इति षच्। सहस्राक्षः सहस्रपात् (पुरुषसूक्तम् १) इति श्रुतेः।

दिशाश्रोत्राय - दिशा श्रोत्रं यस्य स दिशाश्रोत्रः। अन्तरिक्षं कुक्षिः दिशा श्रोत्रम् इति श्रुतेः। शृणोत्यनेन श्रोत्रं कर्णः। हुयामाश्रुभसि भ्यस्त्रन् [उ.सू. ४.१५८] इत्यौणादिकप्रत्ययेनेष्टसिद्धिः।

सहस्रजिह्वाय - सहस्रं जिह्वा यस्य स सहस्रजिह्वस्तस्मै सहस्रजिह्वाय । शेषरूपायेत्यर्थः।

महाजिह्वाय - महती जिह्वा यस्यासौ महाजिह्वः, तस्मै।

सहस्रनामधेयाय - सहस्रं नामधेयानि यस्यासौ सहस्रनामधेयः, तस्मै सहस्रनामधेयाय। यावन्ति हि नामरूपात्मके प्रपञ्चे नामानि प्रपञ्चात्मक स्यैव नामधेयानि अप्रपञ्चात्मकस्य चत्वार्येव नामानि चत्वारि ते असुर्याणि नामादाभ्यानि बहीषस्य सन्नित्वमङ्गानानि विश्वानि चक्रे एभिः कर्माणि मघवञ्चथकर्थेति" श्रुतेः ।

सहस्राक्षधराय - सहस्रमक्षीणि यस्यासौ सहस्राक्षः। बहुव्रीहौ

सक्थ्यक्ष्णोः स्वाङ्गात् षच् [पा.सू. ५.४.११३]। तेषां धरः। धरति ध्रियते वा धरः, तस्मै सहस्राक्षधराय।

सहस्रबाहवे- सहस्रं बाहवो यस्यासौ सहस्रबाहुः, तस्मै सहस्रबाहवे। बाधते अरीनिति बाहुः। बाधेर्हः(द्र. उ.सू. १.२७) इत्यौणादिकसूत्रेण साधुता।

सहस्रचरणाय - सहस्रं चरणा यस्यासौ, तस्मै। सहस्राक्षः सहस्र पात् (पुरुषसूक्तम् १) इति श्रुतेः।

सहस्रार्कप्रकाशाय - सहस्रार्कसमः प्रकाशो यस्यासौ सहस्रार्क प्रकाशः, तस्मै। अथवा - अर्च्यत इत्यर्कः। सहस्रं अर्काः सहस्रार्काः। सहस्रार्काणां प्रकाशो यस्मिन्नसौ सहस्रार्कप्रकाशः, तस्मै। अथवा- सहस्रार्काः प्रकाशन्तेऽनेनेति सहस्रार्कप्रकाशः, तस्मै। अथवा- सहस्रमर्कान्प्रकाशयतीति सहस्रार्कप्रकाशः, तस्मै सहस्रार्कप्रकाशाय।

सहस्रायुधधारिणे - नम इति पुराणवचनात्। ताच्छील्ये णिनिः।

(२६०) **स्थूलाय** - व्यापकाय। एको देवः सर्वभूतेषु गूढः सर्वव्यापी इति श्रुतेः। [श्वे.उ. ६.१]

सूक्ष्माय - मध्यमाय सूक्ष्मायाणुरूपाय। एषोऽणुरात्मा चेतसा वेदितव्यः (मुं.उ.३.१.९) इति मन्त्रवर्णात् शरीरत्रयधारणेन स्थूलसूक्ष्म रूपायेत्यर्थः।

अथ जगदीशस्य शरीरत्रयोत्पत्तिरभिधीयते - अव्यक्तत्वापन्ना माया रूपा प्रकृतिः कारणशरीरम्। तमःप्रधानप्रकृतेरीश्वराज्ञया भूतानि जातानीति। पञ्चीकृतभूतसत्वांशाकारपरिणताज्ञानाक्रान्ताद् बुद्धीन्द्रियाणि जातानि। तानि श्रोत्रादीनि पञ्चीकृतभूत तथा च श्रुतिः(तै.उ. ब्रह्म. १) - आत्मन आकाशः सम्भूतः(इति)। रजोंशाकारपरिणताज्ञानात् क्रमात् त्वगादीनि कर्मेन्द्रियाणि, प्राणादयः पञ्च वायवश्च ततो जाताः। एतत्सूक्ष्मशरीरम्। एवं पञ्चीकृतभूतै रण्डं विरचय्य तत्र योग्यानि भुवनानि विरचय्य तदेतद्विराट्संज्ञकमीश्वरस्य

स्थूलदेहमित्युच्यते।

सुक्षीणाय - सुतरां क्षीणः सुक्षीणः, तस्मै। अणोरणीयान् (म.ना.उ) इति श्रुतेः। यद्वा- सुतरां क्षीणा दोषाः कामकर्मादयो यस्येति सुक्षीणः, तस्मै सुक्षीणाय। दोषक्षीणायेत्यर्थः।

सुक्षुण्णाय सुभिक्षाय -)

सुराध्यक्षाय - लोकपालादिसुराणामध्यक्षः स्वामी ,तस्मै।

शौरिणे - शौर्यवान् शौरी। अथवा- शूरकुलोत्पन्नतया शौरिः। छान्दसत्वान्नुमा(गमः) ।

धर्माध्यक्षाय - धर्माधर्मौ साक्षादीक्षते अनुरूपं फलं दातुमतो धर्माध्यक्षः, तस्मै। यद्वा - पूर्वधर्मस्याध्यक्षः साक्षात्कारगोचरो यस्य। यद्वा- धर्मस्याध्यक्षो धर्माध्यक्षः, तस्मै।

धर्माय - साक्षाद्धर्मरूपायेत्यर्थः।

लोकाध्यक्षाय- लोकानामध्यक्षो लोकाध्यक्षः, तस्मै लोकाध्यक्षाय। लोकपालायेत्यर्थः। यद्वा - लोकानां प्राधान्येनोपद्रष्टा। लोकानध्यक्षयतीति लोकाध्यक्ष इत्यर्थः।

(२७०) **प्रजाध्यक्षाय** - प्रजानामध्यक्षः पालकः, तस्मै।

शिक्षाय - शिक्षतीति शिक्षः, तस्मै। शिक्षाकर्त्रे इत्यर्थः।

विपक्षक्षयमूर्तये- विपक्षाणां क्षयो ह्रासः, तत्र मूर्तिः। विपक्षक्षय शरीरायेत्यर्थः। यद्वा- विपक्षक्षयरूपमूर्तिः, विपक्षाणां क्षय इत्यर्थः।

कालाध्यक्षाय - सर्वजनान्तकं कालमपि साक्षादीक्षत इति कालाध्यक्षः, तस्मै। कालमध्यक्षं करोतीति वा कालाध्यक्षः।

तीक्ष्णाय - स्पष्टम्।

मूलाध्यक्षाय - मूलं तमो रजःसत्वतमोगुणा प्रकृतिः। तस्याध्यक्षः

मूलाध्यक्षः, तस्मै।

अधोक्षजाय - यतो जानुर्नाधः क्षीयते सोऽधोक्षजः। तदुक्तं महाभारते उद्योगपर्वणि-

अधो न क्षीयते जानुर्यस्मात्तस्माधधोक्षजः

इति। अथवा - द्यावापृथिव्योरधः अन्तराले वैराजरूपेण यो जायते सोऽधोक्षजः। अक्षिजमिन्द्रियजं ज्ञानं यस्मादसौ अधोक्षजः। यद्वा- ऊर्ध्व लोकापेक्षया अधःकृत्वाशब्देन पृथिव्यभिधीयते। धरण्यपेक्षया न क्षीयते इति अक्षम्। द्यौतद्वासिदेवानामपरत्वात्तयोरन्तराले विराड्रूपेण जायत इत्यधोक्षजः। सप्तम्यन्ता ज्जनेर्डः। यद्वा- अधः कृत्वा अक्षीणि इन्द्रियाणि जायते अधोक्षजः इति। यद्वा- अधोक्षाणां जितेन्द्रियाणां जायते प्रत्यक्षीभवतीत्यधोक्षजः। यद्वा- अक्षजं ज्ञान नधो यस्येत्यधोक्षज इति।

मित्राय - मित्रः सूर्यः तद्रूपाय। यद्वा- मेद्यति मित्रम्। स्नेहार्थो मेत्रशब्दः। अमिचिमिदिशसिभ्यः क्त्रः[४.१६३] इत्यौणादिकेन कार्या रूपसिद्धिः। ततश्च मित्रं सुहृत्। यो हि व्यसनकाले प्रह्लदार्जुनादिभक्तं न कदाचित् परित्यजतीति, तस्मै मित्राय। "व्यसने मित्रपरीक्षा" इति वचनात्।

सुमित्रावरुणाय - चेति पूर्वपदस्यानङ्।

शत्रुघ्नाय - शत्रून् हन्तीति शत्रुघ्नः, तस्मै। अथवा- भक्तशत्रून् कामक्रोधादीन् हन्तीति शत्रुघ्नः, तस्मै।

(२८०) **अविघ्नाय** - न विद्यते विघ्नं यस्यासौ अविघ्नः, तस्मै अविघ्नाय।

विघ्नकोटिहराय - विघ्नानां कोटिः, तां हरतीति विघ्नकोटिहरः, तस्मै। स्वभक्तप्रारब्धकर्मोपस्थितविघ्नराशिनाशकायेत्यर्थः।

रक्षोघ्नाय - रक्षो हन्तीति रक्षोघ्नः, तस्मै।

मदघ्नाय - मदं शत्रुदर्पं हन्तीति मदघ्नः, तस्मै।

भूतघ्नाय - भूतान् हन्तीति भूतघ्नः। सर्वप्राणिहिंसकायेत्यर्थः।

भूतपालाय - भूतान् पालयतीति भूतपालः, तस्मै।

भूताय - भवन्तीति भूताः आकाशप्रभृतयः, ते वशे वर्तन्ते स भूतः, तस्मै। प्राप्त्यर्थवद्भूतार्थे उकः, क्ङिति(पा.सू. १.१.५)इत्युगन्तात् इण्निषेधः।

भूतावासाय - भूतान्यावसन्त्यस्मिन्नसौ भूतावासः, तस्मै। यद्वा - भूतान्यत्राभिमुख्येनावसन्तीति भूतावासस्तस्मै भूतावासाय।

भूतिने - भूतानि विद्यन्ते अस्मिन्नसौ भूती, तस्मै भूतिने। भूतानि भगवति आत्मनि वर्तन्ते सर्वदा खलु" इति वचनात्।

भूतवेतालघाताय - भूतानि च वेतालाश्च भूतवेतालाः, तान् घातयतीति स भूतवेतालघातः, तस्मै भूतवेतालघाताय।

(२९०) **भूताधिपतये** - भूतानामधिपतिः स्वामी, तस्मै सर्वस्वामिन इत्यर्थः।

भूतग्रहविनाशाय- भूतदुष्टग्रहविनाशं करोतीति भूतग्रहविनाशकः, तस्मै।

भूतसंयमिने - भूतानामाकाशादीनां संयमं करोतीति भूतसंयमः। स विद्यते यस्यासौ भूतसंयमी, तस्मै भूतसंयमिने।

महाभूताय - प्रलयकालभूतायेत्यर्थः।

भृगवे - दैत्यगुरवे।

सर्वभूतात्मने- सर्वभूतानामात्मा, तस्मै। सर्वाणि भूतानि योऽवरोऽयम्" इति श्रुतेः।

सर्वारिष्टविनाशाय- सर्वाणि तान्यरिष्टानि। यद्वा- सर्वेषामरिष्टानि सर्वारिष्टानि। तेषां विनाशं विशेषेण नाशं कृतवान्, तस्मै।

सर्वसम्पत्कराय च- सर्वाश्च ताः सम्पदश्च। यद्वा- सर्वेषां सम्पदः ताः करोतीति सर्वसम्पत्करः, तस्मै। कृञो हेतुताच्छील्यानुलोम्येषु (पा.सू.

३.२.२०) इति टप्रत्ययः।

सर्वाधाराय - सर्वेषामाधारः, तस्मै।

सर्वाय - सरतीति सर्वः, सृ गताविति गत्यर्थात् सरतेर्वप्रत्ययः। यद्वा-सृतमनेन विश्वमिति सर्वं विद्यते यत्र स सर्वः। सर्वनीघृष्वरिष्वलष्व शिवपट्वप्रह्वेष्वा अस्वतन्त्रे[उ.सू.१.१५] निपात्या इति निपातनात्साधुत्वम्। अस्वतन्त्रे अकर्तरि इति। सर्वाय सर्वरूपाय।

असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात्।

सर्वस्य सर्वदा ज्ञानात् सर्वमेनं प्रचक्षते।। [म.भा.उद्यो.६९.१]

इति वचनात्। अथवा- सर्वरूपो विश्वरूपः। अथवा- सरति गच्छति प्रतिदेहम्। सरतेर्वप्रत्यये सर्वशब्दनिष्पत्तिः।

(३००) **सर्वार्तिहरये** - सर्वेषामार्तिं हरतीति सर्वार्तिहरस्तस्मै सर्वार्तिहरये।

श्रीमन्महाराजाधिराजश्रीदलपतिविरचिते नृसिंहप्रसादे

नृसिंहसहस्रनामभाष्ये नाम्नां तृतीयं शतं सम्पूर्णम्।

श्रीदिव्यलक्ष्मीनृसिंहार्पणमस्तु।।

चतुर्थशतकम्

सर्वदुःखप्रशान्ताय - आधिभौतिकाध्यात्मिकाधिदैविकदुःखानि सर्वाणि च तानि च दुःखानि, सर्वेषां वा दुःखानि तानि प्रशान्तानि यस्य यस्मादसौ सर्वदुःखप्रशान्तः, तस्मै सर्वदुःखप्रशान्ताय।

सर्वसौभाग्यदायिने - सर्वेषां सर्वेभ्यो वा सर्वाणि वा सौभाग्यानि प्रयच्छतीति सर्वसौभाग्यदायी। ताच्छील्ये णिनिः। तस्मै सर्वसौभाग्यदायिने।

सर्वज्ञाय- सर्वं जानातीति सर्वज्ञः। अथवा- सर्वं ज्ञापयति वक्ति

शब्दब्रह्मस्वरूपेणेति सर्वज्ञः। सर्वदेहेष्वन्तर्यामितया सरति गच्छतीति सर्व इत्युच्यते। सरतेर्वप्रत्यये रूपसिद्धिः। सर्वं जानातीत्युक्तौ ज्ञातृज्ञानज्ञेयानां भेदे अविद्याऽवश्याभ्युपेतव्या स्यात्। तद्भेदस्य तत्सम्बन्धाधीनत्वात्। अन्यथा सर्वज्ञत्वानुपपत्तेः। अत एव शास्त्रकारैः सर्वज्ञत्वादिकमित्युक्तम्।

अनन्ताय - नित्यत्वात् सर्वगतत्वात् देशकालपरिच्छेदाभावाद्वा न विद्यते(ऽन्तो) यस्यासौ अनन्तः, तस्मै अनन्ताय।

सर्वशक्तिधराय - सर्वा सर्वेषां वा सर्वविषया वा शक्तिः, तस्याः धरः सर्वशक्तिधरः, तस्मै सर्वशक्तिधराय।

सर्वैश्वर्यप्रदात्रे - सर्वेभ्य ऐश्वर्यं प्रयच्छतीति सर्वैश्वर्यप्रदाता, तस्मै सर्वैश्वर्यप्रदात्रे।

सर्वकार्यविधायिने - सर्वेषां कार्यं विधत्त इति सर्वकार्यविधायी। ताच्छील्ये णिनिः। विपूर्वस्य दधातेः करोत्यर्थवाचित्वात्सर्वकार्यानुष्ठातेत्यर्थः।

सर्वज्वरविनाशाय - सर्वान् ज्वरान्विनाशयतीति सर्वज्वरविनाशः, तस्मै सर्वज्वरविनाशाय।

सर्वरोगापहारिणे - सर्वरोगापहारे शीलमस्येति ताच्छील्ये णिनिः।

(३१०) **सर्वाभिचारसंहर्त्रे** - सर्वाभिचारकर्मनाशकाय।

सर्वोत्पातविघातिने - सर्वेषाम् उत्पातानां विघातकर्त्रे।

पिङ्गाक्षाय - पिङ्गे अक्षिणी यस्यासौ पिङ्गाक्षः। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् [पा.सू. ५.४.११३] इति षच्।

एकशृङ्गाय - एकशृङ्गं शिरसि यस्यासौ एकशृङ्गः, तस्मै। मत्स्येन हि प्रलयार्णवे शृङ्गे पृथिवी बद्धेति इतिहासः। अथवा- एकमेव शृङ्गं प्रधानं एकशृङ्गं तस्मै। तथा च कोशः - शृङ्गं प्राधान्यसान्वोश्चेति [अ.को. ३.३.१८२]। प्रधानमेव प्राधान्यं, जगति स एवैकः प्रधानमित्यर्थः।

द्विशृङ्गाय - द्वयोः शृङ्गं प्राधान्यमस्येत्यर्थः।

अमरीचये - म्रियते मरीचिः, न मरीचिः अमरीचिः, तस्मै अमरीचये इति च्छेदः। मरीचिस्तेजोविशेषः। तेजस्विनामपि तेजोरूपायेत्यर्थः। तदुक्तं गीतासु - तेजः तेजस्विनामहम् [भ.गी.७.१०, १०.३६] इति।

बहुशृङ्गाय - बहूनि शृङ्गाणि यस्यासौ बहुशृङ्गः। बहुभ्यः शृङ्गं प्राधान्यमस्येति बह्वपेक्षयां अयमेव प्रधानभूतः, इतरे गुणभूताः -
इतरेषां मातापितृसम्बन्धजन्यतया गुणभूताः। शृणाति शृङ्गम्। शृणतेर्गन्, ह्रस्वश्च। गन्कितनुट्चेत्यौणादिकसूत्रेण १.१२५] साधुता।

लिङ्गाय- लिङ्गरूपायेत्यर्थः। अथवा- लीनमर्थं ब्रह्मादिभिरपि ज्ञातु मशक्यं गमयतीति लिङ्गं चिन्हम्। यद्वा- लिङ्गं जगत्कारणं, तस्मै लिङ्गाय।

महाशृङ्गाय- महत् श्रृङ्गं यस्यासौ महाशृङ्गः, तस्मै। शृङ्गमत्र सानुशिखरम्। मुकुटधारितया तथा लक्ष्यत इति भावः।

माङ्गल्याय - मङ्गलरूपायेत्यर्थः। मङ्गलमेव माङ्गल्यम्। स्वार्थे ष्यञ्। तदुक्तम्- मङ्गलानाञ्च मङ्गलम् [वि.स.ना.श्लो.१०]इति।

(३२०)-**मनोज्ञाय** - मनसा ज्ञायत इति मनोज्ञः। मनोज्ञानञ्च जयाय, "महीं मूलाधारे" [सौ.ल. इति वचनात्।

मन्तव्याय - मननयोग्यायेत्यर्थः

महानसे - महांश्चासावात्मा च, तस्मै। व्यापकायेत्यर्थः

महादेवाय - महांश्चासौ देवश्च महादेवः। महति महयति वा महत्। वर्तमाने पृषद्बृहन्महज्जगच्छन्त्रुवच्च(उ.सु.२.८४) इत्यौणादिकसूत्रेण साधुता। आन्महतः समानाधिकरणजातीययोः (पा.सू. ६.३.४६) इत्यकारान्तादेशः।

देवाय - दीव्यतीति देवः, तस्मै। पचाद्यच्।

मातुलिङ्गधराय च - मातुलिङ्गस्य धरस्तस्मै।

(महामायाप्रसूताय) - महती चासौ माया चेति महामाया। तस्याः प्रसूतः। सा वा प्रसूता य(स्य। सा च) मूलाविद्या, ततश्च वैष्णवी। एतत्प्रसूताय। अयं हि हरिहरात्मकः, त्र्यक्षं चक्रपिनाकेत्युभयध्यानात्।

मायिने - माया विद्यते यस्मिन्नसौ मायिने। मायाभ्रमग्नायेत्यर्थः। ननु केयं माया। कथं वा तदाश्रयेति चिन्त्यम्। तमःप्रधा प्रकृतिरविद्या,सत्वप्रधाना मायेति। अथवा- स्वाश्रयं व्यामोहयन्ती विपरीतकारिणी अविद्या, स्वाश्रय मव्यामोहयन्ती विपरीतकारिणी मायेति तयोर्भेदः। तदुक्तम्- अनादित्वे सति भावरूपं विज्ञाननिरास्यमज्ञानमविद्येति। न किंचिदवेदिषमिति परामर्श सिद्धः सौषुप्तिकानुभवश्चात्र प्रमाणभावं भजते। सैव मायेति साम्प्रदायिकाः। विगीतं देवदत्तनिष्ठप्रमाणज्ञानमेतद्देवदत्तनिष्ठप्रमाप्रागभावातिरिक्तानादेर्निवर्तकं प्रमाणज्ञानत्वाद् यज्ञदत्तादिगतप्रमाणज्ञानवद् इत्याद्यनुमानं च मानम्।

नन्वत्र विचारणीयम् - सा किं ब्रह्मनिष्ठा उत जीवनिष्ठेति। सर्वज्ञस्य तदनुपपत्तेर्न तावत्प्रथमः। अथ जीवाश्रितत्वं तदा विचार्यम् - किं जीवा वस्तुतो ब्रह्मणो भिन्ना अभिन्ना वा। न प्रथमः, अद्वैतव्याघातात्। न द्वितीयः, कस्मादसौ महामायाप्रसूता स एवमाचारव्याकरणशरीरेण जगत्सूते। तदुक्तम्

तमोरजःसत्वगुणादिप्रकृतिर्द्विविधा च सा ।
सत्वशुद्धिविशुद्धिभ्यां मायाविद्येव ते मते।। [त.प्र. १

यद्वा - मात्यस्यां जगदिति माया। माकाभ्यामयत्। यद्वा- मानयितुमर्हा माया। मानपूजायामित्येतस्माच्चुरादिणिच्प्रत्ययः। मान्येव मायेति पृषोदरादितया नलोपः। अथवा- लक्ष्मीर्मेति, अयः शुभावहो विधिर्यस्याः सा माया। महती चासौ माया चेति परदेवतामयी मायैतदुत्पन्नेति तत्वम्। पूर्वव्याख्याने माया अविद्याया भङ्गोऽपरितोषः। यद्वा- मा आययति अर्पयति। आ

णिजन्तात्स्त्रियां यपि आयेति रूपम्। आसमन्तादभिव्याप्ता मा लक्ष्मीः आमाया। आया महैरुत्सवैर्माया महामाया। मह उद्धव उत्सवः [अ.को. १.८.२४१] इति कोषः। उत्सवैः समं नाव्याप्तादिभिर्व्याप्ता मा लक्ष्मीः आययति तर्पयत्युपासकायेति भगवती शक्तिरेव महामाया। यद्वा- अः विष्णुः, तस्य माया अमाया। महती चासावमाया चेति महामाया, पूर्वोक्तदोषानिस्तारात्। कथञ्चित् काल्पनिकभेदनिश्चयेन उक्तदोषनिस्ताराशङ्कायां दुर्वारेतरेतराश्रयता। तथा हि - अविद्याधीनो जीवविभागो जीवाश्रया चाविद्येति। अत्र वदामः - यदवादि सर्वज्ञस्य ब्रह्मणो नाविद्येति तदसत्। अत्र चिन्त्यं- स्वरूपप्रज्ञया वा सर्वज्ञता, प्रमाणतो वा? आद्ये असङ्गस्य ब्रह्मणो हि नाविद्यां विना सर्वार्थसङ्गतिरिति सर्वज्ञतोपपत्त्यर्थमेषास्याविद्ये त्युपेया। सर्वं जानातीति सर्वज्ञ इति ज्ञेयज्ञातृज्ञानानां भेदस्याविद्याधीनत्वात्। द्वितीये प्रमातृत्वस्य प्रमाणप्रमेयसम्बन्धस्याविचारित रमणीयतयाऽविद्यासम्बन्धं विनाऽनुपपत्तिः। अतः संज्ञेवाविद्याऽभ्युपेयेति युज्यत एव सर्वज्ञे मायेति सिद्धम्। [द्र० तत्त्वप्रदीपिका पु. ११]

जलशायिने- जले शेते इति जलशायी, तस्मै जलशायिने।

महोदराय - महदुदरं यस्यासौ महोदरस्तस्मै। अन्तरालोदरायेत्यर्थः।

(३३०) **मन्दाय** - स्थिराय। वर्षं मनुते मन्यते वा मन्दः।

मन्ददाय - मन्दं दातीति मन्ददः। अथवा - मन्दमाद्यं द्यति खण्डयतीति मन्ददस्तस्मै।

मदाय - तद्रूपायेत्यर्थः।

मधुकैटभहन्त्रे च - मधुकैटभौ हन्तीति मधुकैटभहन्ता, तस्मै मधुकैटभहन्त्रे।

माधवाय - माया विद्याया धवः पतिस्तस्मै। तदुक्तं हरिवंशे(२७१.४८)-

मा या विद्या हरेः प्रोक्ता तस्या ईशो यतो भवान्। तस्मान्माधवनामासि

इति। यद्वा - लक्ष्म्या धवः पतिर्भर्ता माधवः, तस्मै माधवाय। लक्ष्मीपतये इत्यर्थः।

मुरारये - मुरस्यारिः मुरारिः ,तस्मै मुरारये।

महावीर्याय - महदुत्पत्तिलक्षणं वीर्यमस्यासौ महावीर्यः, तस्मै। यद्वा- महदुत्पादने वीर्यं सामर्थ्यं यस्येति महावीर्यः, तस्मै। स्वयमव्यक्तरूप इत्यर्थः। तदुक्तम् - अव्यक्तान्महन्महतोऽहङ्कार इति। अथवा - महदुत्पत्तिकारण मविद्यारूपं वीर्यं यस्येति महावीर्यः, तस्मै। अथवा- महावीर्यं यस्यासौ महावीर्यस्तस्मै। अथवा- महद्वीर्यं सामर्थ्यमस्येति।

ननु - महति महद्वा चेत् सामर्थ्यमस्ति किमर्थं तर्ह्येतावान् प्रयासो दिव्यवर्षसहस्रद्वन्द्वयुद्धकरणमित्यत आह- **धैर्याये**ति। धीरस्य भावः कर्म वा धैर्यं, तद्विद्यते यस्यासौ धैर्यः, तस्मै धैर्यायेति। भविष्यदर्थनिर्वाहाय तदा धैर्यं कृतवान्। न तु स्वशक्त्यभावादित्यर्थः। ब्रह्मादिभिरपि लङ्घयितुं न शक्यत इति भावः। यद्वा - धैर्याय धैर्ययुक्ताय।

चित्रवीर्याय - चित्रं नानाप्रकारं वीर्यं सामर्थ्यं यस्यासौ चित्रवीर्यः, तस्मै चित्रवीर्याय। यद्वा - चित्रमद्भुतं वीर्यं यस्य तस्मै। चिञ् चयने इति, अमिचिमिदिशसिभ्यः क्त्रः(उ.सू. ४.१६३) इति क्त्वप्रत्ययः। अथवा- चेतति जानाति धर्माधर्मौ प्रवृत्त्यप्रवृत्ती कर्तुमिति चित्रः, तस्मै चित्रायेति। सर्वधातुभ्यः ष्ट्रन्(उ.सू .४.१५९)इति प्रत्यये शब्दरूपनिष्पत्तिः।

चित्रकर्माय - चित्रं कर्म यस्येति चित्रकर्मस्तस्मै चित्रकर्माय। अर्शआदित्वादच्प्रत्ययः।

(३४०) **चित्राय** - नानाप्रकारवते।

चित्रभानवे - चित्रा भानवोंऽशवो यस्यासौ चित्रभानुः, तस्मै। अथवा - चित्रं भातीति चित्रभानुः। भाति भानुः, दाभाभ्यां नु (उ.सू. ३.३२)

इत्यौणादिको नुप्रत्ययः। बहुलाच्चित्रस्वर्विश्वेषु क्त्रप्रत्ययः।

मायातीताय - मायामतीतो मायातीतः। उपाधिरहितायेत्यर्थः। अनात्मन्यात्मबुद्धिः, आत्मनि वाऽनात्मबुद्धिर्माया। तदतीत इत्यर्थः। ननु मायातीतश्चेत् कथं स्वमायया जगद्भासयतीति व्यवहारोऽत आह - अत्र मायाशब्देन स्वाश्रयाव्यामोहकरी जगद्विपरीतकारिणी मायेति जगद्विपरीतकारिणी बुद्धिरभिधीयते।

मायाय- माया विद्यते यस्मिन्नसौ मायः। आर्शआदित्वादच्। अथवा- मा लक्ष्मीरयः शुभावहो विधिर्यस्यासौ मायस्तस्मै मायाय। मात्यनया सा माया मिथ्या। माछाससिभ्यो यः(उ.सू. ४.११५) इति यः। पौनरुक्त्यं पूर्वोक्त परिहारादनाशङ्क्यम्।

महावीराय - महांश्चासौ वीरश्च महावीरः। यद्वा - विशेषेण नानाप्रकारं शत्रूनीरयतीति वीरः, अथवा- शत्रून् जयतीति वीरः। अजेर्व्यघञपोः (पा.सू. २.४.५६)इति व्यादेशः। अथवा - ऋज्रेन्द्राग्नेति रन् (द्र. उ.सू. २.२८)।

महातेजाय - महातेजायेति। महमततीति महान्, तस्मै। मह उद्धव उत्सवः [अ.को.१.७.३८] इति कोषः। न जायत इत्यजः, तस्मै अजायेति। महत्तेजो यस्यासौ महातेजः। तिज निशाने। तेजोरूपाय। तिज निशाने क्षमायाञ्चेतिधातूत्पन्नसकारान्तात्पचाद्यचि अकारान्तः सम्पद्यते। विग्रहस्तु महच्च तेजश्च महातेजः, महातेजो यस्यासौ महातेजस्तस्मै महातेजाय।

बीजाय - जगत्कारणभूताय।

तेजोधाम्ने - तेजोरूपाय। तेज एव धाम यस्य। तेजनं तेजः क्षमा। तिज निशाने क्षमायां चेति पाठात्। यद्वा- तेजसा धाम यस्येति। तेजसा क्षमयेत्यर्थः।

बीजिने - बीजमस्यास्तीति बीजी। अत इनिठनौ(पा.सू. ५.२.११५) इतीनिः। अविद्याख्यकारणयुक्तायेत्यर्थः।

तेजोमयनृसिंहाय - तेजसा प्रचुरस्तेजोमयः, तेजोमयश्चासौ नृसिंहश्च तेजोमयनृसिंहस्तस्मै तेजोमयनृसिंहाय। तेजःप्रचुरायेत्यर्थः। प्राचुर्ये मयटि तत्प्रतियोगिनोऽप्यपेक्षिततत्वात्, स्वप्रकाशभूते परे ब्रह्मणि श्रीनृसिंहे नाहासिख्यान्धतमसोऽत्यन्तासम्भाविततत्वात्प्राधान्ये मयड्व्याख्येयः। ततश्चायं शास्त्रार्थः - तेजसा प्रधानः तेजोमयः, स चासौ नृसिंहश्च तेजोमयनृसिंहः, तस्मै तेजोमयनृसिंहायेति।

(३५०) **तेजसां निधे** - निधीयतेऽस्मिन्निति निधिः। कर्मण्यधिकरणे च (पा.सू.३.३.९३)इति किः। तेजसां निधे, ते तुभ्यं, नमः। अस्त्वित्यध्याहारः।

महादंष्ट्राय- महती दंष्ट्रा यस्येति महादंष्ट्रः। पूर्वमेव व्याख्यातमेतत्।

तुष्टाय - तुष्टिं प्राप्तस्तुष्टः। अवाप्तसकलकामतया तुष्टत्वम्।

पुष्टिकराय- तुष्टौ हेतुः पुष्टिकरः। टः। परिपूर्णत्वात् पुष्टत्वम्।

शिपिविष्टाय - शिपिभिर्विष्टः शिपिविष्टः। शिपयो रश्मयः, तैरावेष्टितः सूर्य इति यावत्। अथवा- शिपिषु पशुषु विष्टः शिपिविष्टः। यज्ञरूपेण पशुषु प्रविष्ट इति यावत्। यद्वा - सर्वान्तर्यामितया सर्वप्राणिषु प्रविष्ट इत्यर्थः। पशवः शिपिरिति श्रुतेः(तै.सं. २.५.५.२)। निवेशनशेषो देवदारुवनादौ शय इव निर्वेष्टि खलतिरभिधेयः ?) ।

हृष्टाय - हर्षं प्राप्तो हृष्टः, विस्मित इत्यर्थः। हर्षलामसुविस्मित प्रतिघातयोरिति वेट्

(पुष्टाय)

परमेष्ठिने - परमे तिष्ठतीति परमेष्ठी। परमे स्थः किदिति इनिः (उ.सू. ४.५८) स्थःस्थास्थिन्स्थॄणाम्(वा. ४९६१) इति वक्तव्यात् षत्वम्। तत्पुरुषे कृतीति (पा.सू. ६.३.१४) सप्तम्या अलुक्। प्रजापतिरूपायेत्यर्थः।

विशिष्टाय - महापुरुषायेत्यर्थः।

शिष्टाय - विशिष्टवच्छिष्टः, तस्मै।

गिरिष्ठाय - गिरौ शेते इति गिरिष्ठः। अथवा- गिरि वाचि तिष्ठतीति गिरिष्ठः। तत्पुरुषे कृति(पा.सू. ६.३.१४) इति सप्तम्या अलुक्। क्वचिद् **गरिष्ठायेति** पाठः। अतिशायने तमबिष्ठनौ (पा.सू .५.३.५५) इति प्रिय(स्थिर) स्फिर-(पा.सू. ६.४.१५७) इति गरादेशे गरिष्ठेति रूपम्। विग्रहस्तु - अतिशयेन गुरुः गरिष्ठ इति।

(३६०) **इष्टदायिने** - इष्टं ददातीतीष्टदायी, तस्मै इष्टदायिने।

ज्येष्ठाय - विद्यैश्वर्यादिभिरधिको ज्येष्ठः, तस्मै। विज्ञानैश्वर्यादिभिरतिशयेन वृद्धो ज्येष्ठः। प्रशस्यस्य श्रः (पा.सू.५.३.६०) इति इष्ठनि परतो ज्यादेशे ज्येष्ठ इति रूपम्। वृद्धायेत्यर्थः।

तुष्टाय -

(श्रेष्ठाय) - महत इत्यर्थः।

अमिततेजसे- अमितं तेजो यस्यासावमिततेजाः, तस्मै अमिततेजसे। अपरिमिततेजसे इत्यर्थः।

अष्टाङ्गन्यस्तरूपाय - अष्टाङ्गेषु न्यस्तं रूपं येनासौ, अष्टाङ्गन्यस्तरूपः, तस्मै।

सर्वदुष्टान्तकाय - सर्वे च ते दुष्टाश्च सर्वदुष्टाः, तेषामन्तं करोतीति सर्वदुष्टान्तकः, तस्मै सर्वदुष्टान्तकाय।

वैकुण्ठाय - विकुण्ठायाः कर्ता, विविधा कुण्ठा गतिः विकुण्ठा, तस्याः कर्ता वैकुण्ठः, तस्मै वैकुण्ठाय।

विकुण्ठाय- विविधा कुण्ठा गतिर्यस्यासौ विकुण्ठस्तस्मै विकुण्ठाय। यद्वा - पृथिव्यादीनामन्योन्यविरुद्धां स्वतन्त्रां गतिं परस्परसंश्लेषणात् कुण्ठां करोतीति विकुण्ठः। विकुण्ठ एव वैकुण्ठ इति स्वार्थेऽणि रूपम्। विरुद्धा

कुण्ठा अस्मिन्निति विकुण्ठः। अथवा- विकुण्ठाया अपत्यं विकुण्ठः। लोकसम्बन्धे विकुण्ठो वा। तदवादि क्रमेण (म.भा.शान्ति ३५२.१५) -

मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना।
वायुश्च तेजसा सार्धं वैकुण्ठत्वं मतो मम।
पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः
तयोः स्वकलया जज्ञे वैकुण्ठो भगवान् स्वयम्।।(श्री.भा.८.५.४)
वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः
रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया।। इति।

अयञ्च मन्वन्तरान्तरे इति गीयते। यद्वा- विकुण्ठंस्यापत्यं वैकुण्ठः। यद्वा- विकुण्ठितसेहादिवक्त्रो वैकुण्ठः। संहितादिषु तथा दृष्टः।

केशिकण्ठाय -

(३७०) **कण्ठीरवाय** - नृसिंहायेत्यर्थः।

लुण्ठाय - लुण्ठतीति लुण्ठः। क्वचित् **तुङ्गाये**ति पाठः। महान्

निःशठाय - निर्गतं शाठ्यं यतोऽसौ निःशठः। निष्कपटायेत्यर्थः।

हराय - श्रीरुद्राय। हरतीति हरस्तस्मै। हरिहरयोरैक्यात् नामान्यपि तन्नामानि। तथा हि गारुडे मार्कण्डेयः -

कथ्यते परमा मूर्तिर्हरेरीश्वरसंज्ञिता।
विभेदो नात्र कर्तव्यो यथा शम्भुस्तथा हरिः।।

स्कान्दे शिवः -

येऽन्तरं कुर्वते मूढाः कृष्णस्य मम पार्वति।
ते नैषां वैष्णवो लोको मही मामकानि हि।।

हरिवंशे(? वि.पु. ५.९.३२) भगवान् -

भवानहं च विश्वात्मन्नेकमेव हि कारणम्।

गतोऽस्य जगत्यर्थे भेदेनावां व्यवस्थितौ।।

श्रीशिवः -

आदिस्त्वं सर्वभूतानां मध्यमन्तस्तथा भवान्।
त्वत्तस्सर्वमभूद्विश्वं त्वयि सर्वं प्रलीयते।।
अहं त्वं हि महादेवस्त्वमेवाहं जनार्दन।
आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते।।
नामानि तव गोविन्द यानि लोके महान्ति च।
तान्येव मम नामानि नात्र कार्या विचारणा।।
त्वदुपासा जगन्नाथ सैवास्तु मम गोपते।
यश्च त्वां द्वेष्टि हे गोप स मां द्वेष्टि न संशयः।।

महाभारते भगवान् -

तस्मिन्हि पूज्यमाने वै देवदेवे महेश्वरे।
सम्पूजितो भवेत्पार्थ देवो नारायणः प्रभुः।।
यस्तं वेत्ति स मां वेत्ति ह्यस्तं ह्यनु समामनु।
रुद्रो नारायणश्चैव सत्त्वमेकं द्विधा स्थितम्।।

सत्वोद्रिक्ताय कृष्णाय- संत्वमुद्रिक्तमधिकं यस्मिन्नसौ सत्वोद्रिक्तः। कर्षत्यरीनिति कृष्णः। अनेन च युगावतारत्वमुक्तम्।

रजोद्रिक्ताय वेधसे - रज उद्रिक्तमधिकं यस्मिन्नसौ रजोद्रिक्तः।

तमोद्रिक्ताय रुद्राय- तम उद्रिक्तमधिकं यस्मिन्नसौ तमोद्रिक्तः उभयोश्छान्दसः सन्धिः। मुख्यस्तु पाठः - **सत्वोद्रिक्ताय कृष्णाय रजउद्रिक्त वेधसे तमउद्रिक्तरुद्रायेति।**

ऋग्यजुःसामगाय च - ऋक्च यजुश्च साम च। तैर्गीयते इति ऋग्यजुःसामगः। गापोष्टगिति टक्(पा.सू. ३.२.८)। ऋच्यते स्तूयऽतेनया

ऋक्। यजन्तेऽनेनेति यजुः। पापं स्यति - सामेति।

ऋतध्वजाय - ऋतं सत्यम्। सत्यप्रतिज्ञायेत्यर्थः।

रज्वाय - रञ्जयतीति रज्वः **राजायेति** क्वचित्पाठः। राजते असौ राजः, तस्मै राजाय।

(३८० **मन्त्रराजाय** - मन्त्राणां राजा मन्त्रराजः, तस्मै मन्त्रराजाय। राजाहस्सखिभ्यष्टच् (पा.सू. ५.४.१९)इति समासान्तष्टच्प्रत्ययः।

मन्त्रिणे- मन्त्रोऽस्यास्तीति मन्त्री। अत इनिठनौ(पा.सू. इतीनिः।

त्रिनेत्राय - त्रयो नेत्रा यस्यासौ त्रिनेत्रः, तस्मै त्रिनेत्राय।

त्रिवर्गाय- त्रयो वर्गा यस्यासौ त्रिवर्गः। त्रयो वर्गा यस्मिन्नसौ त्रिवर्गः। धर्मार्थकामास्त्रिवर्गः। मोक्षस्तु तद्रूपत्वान्न धर्मरूपः। क्वचित् **त्रिवर्णायेति** पाठः। गुणत्रयावच्छेदेन सत्वरजस्तमसां ये शुक्लादयो वर्णास्ते तत्र वर्तन्त इत्यर्थः।

त्रिधाम्ने - त्रीणि धामानि यस्यासौ त्रिधामा। त्रीणि धामानि ब्रह्म विष्णुशिवात्मकानि। यद्वा - त्रीणि धामानि चन्द्रार्काग्निरूपाणि यस्य। यद्वा- त्रीणि भुवनलक्षणानि धामानि गृहाणि यस्यासौ त्रिधामा,तस्मै त्रिधाम्ने।

त्रिमूलिने - त्रिमूलाऽस्यास्तीति त्रिमूली, तस्मै त्रिमूलिने। ब्रह्मविष्णुरुद्ररूपत्वात् त्रिमूलित्वम्।

त्रिकालज्ञानरूपाय - त्रिषु कालेषु ज्ञानं यस्यासौ त्रिकालज्ञानः, तद्रूपः। अथवा - त्रिकालेषु ज्ञानं यस्य। यद्वा - त्रिकालीनं ज्ञानं यस्यासौ त्रिकालज्ञानः तद्रूपस्तस्मै।

त्रिदेहाय - त्रीणि कारणसूक्ष्मस्थूलरूपाणि देहानि यस्यासौ त्रिदेहस्तस्मै। तत्र माया कारणशरीरम्, बुद्ध्यहङ्कारादिसप्तदशकं लिङ्गं द्वितीयम्। विराट्शरीरं तृतीयम्।

त्रिधात्मने - त्रिधा आत्मा यस्यासौ त्रिधात्मा, तस्मै त्रिधात्मने।

त्रिमूर्तिविद्याय - त्रिमूर्तीनां विद्या ज्ञानं यस्यासौ त्रिमूर्तिविद्यः, तस्मै त्रिमूर्तिविद्याय।

(३९०) **त्रितत्त्वज्ञानिने** - त्रितत्त्वस्य ब्रह्मविष्णुरुद्रात्मकस्य ज्ञानं यस्यासौ त्रितत्त्वज्ञानी। अन्तरानिति निः ?)।

अक्षोभ्याय - न क्षोभ्योऽक्षोभ्यः, तस्मै अक्षोभ्याय। न केनापि ज्ञेय इति भावः।

अनिरुद्धाय- न केनापि प्रादुर्भावादिषु निरुध्यते इत्यनिरुद्धः, तस्मै अनिरुद्धाय।

अप्रमेयाय - प्रमातुं योग्यः प्रमेयः, न प्रमेयोऽप्रमेयः, तस्मै अप्रमेयाय। अयमाशयः - प्रमातुं योग्याः प्रमाणैरेवावधारणीयाः। तत्र न प्रत्यक्षं प्रमाणं प्रक्रमते, शब्दादिरहितत्वात्। नाप्यनुमानं, तद्व्याप्यलिङ्गाभावात्। असादृश्या न्नाप्युपमानमपि। अनुपपद्यमानार्थाभावान्नार्थापत्तिः। भावरूपतया न षष्ठाभाव गोचरः। प्रमाणजन्यातिशयाभावेन शास्त्रप्रमाणमपि न विषयीकरोति। प्रकाश वरूपस्य प्रमाणादिसाक्षितया शास्त्रस्य कारणतया वा शास्त्रयोनिता।

भानवे - श्रीसूर्यरूपाय। भातीति भानुः, तस्मै।

अमृताय - अमृतं मोक्षो वर्तते यस्मिन्नसावमृतस्तस्मै।

अनन्ताय - न विद्यतेऽन्तो देशकालादिना परिच्छेदो यस्य सोऽनन्तः, तस्मै।

अमिताय - न मितोऽमितस्तस्मै।

अमराय - न म्रियतेऽसावमरस्तस्मै। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे भ.गी. २.२०] इति।

अपमृत्युविनाशाय - अपमृत्युं विनाशयतीत्यपमृत्युविनाशस्तस्मै

अपमृत्युविनाशाय।

(४००) **अपस्मारविघातिने** - अपस्मारं विघातयतीत्यपस्मारविघाती, तस्मै अपस्मारविघातिने। णिनिः

इति श्रीमन्माहाराजाधिराजश्रीमद्दलपतिराजविरचिते
श्रीनृसिंहप्रसादे व्रतसारे श्रीनृसिंहसहस्रनामभाष्ये
चतुर्थशतं विवृतम्।

पञ्चमशतकम्

अन्नदाय - अन्नं ददातीत्यन्नदः। आतोऽनुपसर्गे कः (पा.सू. ३.२.३) इति कः

अन्नरूपाय - अद्यत अन्नं, तद्रूपः तस्मै।

अन्नाय - अन्नरूपाय। "अन्नं ब्रह्मेत्युपासीत" इति श्रुतेः।

अन्नभुजे - अन्नं भुनक्तीत्यन्नभुक्, तस्मै। अन्नभोक्त्रे इत्यर्थः।

आद्याय - आदौ भवः आद्यः। यद्वा- **नाद्यायेति** क्वचित्पाठः। नद्यां भवो नाद्यः। शालग्रामस्वरूप इत्यर्थः। मुख्यस्तु पाठः - **नाट्यायेति**। नटतीति नटः, नटस्य कर्म नाट्यम्, तद्यस्यास्त्यसौ नाट्यः। ननु नाट्याभिज्ञश्चेत् मायिकः स्यादत आह-

निरविद्यायेति - निष्क्रान्तोऽविद्याम्, अविद्याया निष्क्रान्त इति वा निरविद्यस्तस्मै। विद्येतरा अविद्या। अथवा- वेत्तीति वित् ब्रह्मज्ञानवित्, तदन्योऽवित् संसारी अविदं यातीत्यविद्येति। अथवा - वेदनं वित् ज्ञानं, तदन्यदवित् अज्ञानं, तद्यातीत्यविद्येति सा निर्गताऽस्मादिति निरविद्यस्तस्मै इति। अनात्मन्यात्मबुद्धिरात्मनि वाऽनात्मबुद्धिः, अथवा - स्वाश्रयं व्यामोहयन्ती विपरीतकारिणी, अथवा- मलिनसत्वा कामकर्मादिदूषिता

तमःप्रधाना प्रकृतिर्वा अविद्या, तद्रहित इत्यर्थः। **निरवद्यायेति** क्वचित् पाठस्तत्रायमर्थः - निर्गतमवद्यं यस्मादसौ निरवद्यस्तस्मा इति।

नन्वतस्मिंस्तद्बुद्धिरविद्या, तदभावेऽपि ज्ञानं न स्यात्, अज्ञानाभावेऽपि कस्यचिज्ज्ञानाभावस्यापि दृष्टेरत उक्तम्- **विद्याये**ति। विद्या विद्यते यस्य यत्र वेति विद्यस्तस्मै इति। वेत्तीति वित् ज्ञानवान्, विदं यातीति विद्या, सा विद्यते यस्य यत्र वेति विद्यस्तस्मै विद्यायेति। अथवा- वेदनं वित् ज्ञानम्, विदं यातीति विद्या वेदादिशास्त्राणि प्रतिभाविलासो वा, सा सर्वा विद्यते यस्यासौ विद्यस्तस्मै इति। एवंविधा तस्य विद्या याऽज्ञानिनोपि स्वं प्रापयतीति। अन्यथा इतरेतराश्रयता स्यात् अज्ञाननिवृत्तौ ज्ञानं, सति ज्ञाने तन्निवृत्तिरिति।

नन्वविद्यारहितश्चेत् प्रवृत्त्यभाव इति भक्तकार्येषु न प्रवृत्तिः, प्रवृत्तेरविद्यानिबन्धनत्वात्। ज्ञानवांश्चेद् भक्तकार्यान्निवृत्त्या भवितव्यं, ज्ञान कार्यत्वान्निवृत्तेः। अत आह- **अद्भुतकर्मणे**। अद्भुतमित्युत्कटविचाररहितम् आकस्मिकं कर्म यस्येति। रामकृष्णादयोऽवतारा भक्तकार्यप्रवृत्ता अपि क्रमेणैव कार्यकरा दृश्यन्ते। अयन्तु भक्तवल्लभतया भक्तवचः सत्यं विधातुमकाल एव स्तम्भ एवावतीर्य नखैरेवासुरं हतवानित्यद्भुत कर्मकर्तृत्वम्। अयं भावः - स्वयं प्रभुरप्यनन्यगतिकतया मदीय इति ज्ञात्वा दुष्टपीडितमथाश्रितं यदि न रक्षयेत्तदाऽतीतानप्यसमुद्धरणता भज्येतेति।

नन्वद्भुतकर्मा चेच्चिरकालं जातः स्यात्। बहुकालं विनाऽत्यद्भुत कर्मणः कर्तुमशक्यत्वादित्यतआह **सद्योजातायेति**। तत्कालमेव जातायेत्यर्थः

ननु यद्यपि सद्य एवाभिव्यक्तत्वं, तथाऽप्यनेकाहोरात्रैरभिव्यक्तः स्यादत आह-(४१०) **सन्ध्यायेति**। सन्धौ भवः सन्ध्यः, तस्मै सन्ध्याय। भवार्थे यत्। न दिवारात्रौ मृत्युरिति वरपरिपालनाय निजभृत्यवचनसत्यत्वविधानार्थं सन्ध्याया मेवाभिव्यक्त इति भावः।

ननु बहुकालीनमहाशत्रुविनाशार्थं सन्ध्यावतीर्णो भविष्यत्यत आह **वैद्युतायेति**। विद्युत्सम्बन्धिकर्म आकस्मिकं यस्यासौ वैद्युतः। विद्युद् यथाऽकालिकी झटिति प्रकाशमाना स्वकार्यं करोति, तथायमपि इति भावः।

नन्वकस्मादेवाभिव्यक्तश्चेत्, तर्हि केनचिदध्वना आगत्य क्वचित् स्थितो भविष्यति, अत आह- **अध्वातीतायेति**। अध्वानमतीतोऽध्वातीतः, तस्मै अध्वातीताय। छान्दसं दीर्घत्वम्।

ननु विना मार्गं विना च समयमवतीर्णश्चेत्, निर्घातसमुद्रादिघोषवन्नादरूप एवावतीर्णो भविष्यति, अत आह **अध्वायेति**। न ध्वनत्यध्वः, तस्मै अध्वाय। अभिव्यक्तिसमये न शब्दं कृतवानिति भावः।

नन्वेवंविधोऽपि शब्दप्रतिपाद्यो भविष्यत्यत आह- **वागतीतायेति।** वाचमतिक्रान्तो वागतीतः, तस्मै वागतीताय। ननु सर्वथा वाग्भिः प्रतिषेधश्चेत् वागेव न स्यादत आह - **वाग्मिन** इति। वाग्वर्तते यस्यासौ वाग्मी। वाचो ग्मिनिरिति (पा.सू. ५.२.१२४) ग्मिनिः।

ननु वाचालश्चेद् यत्किंचिद् असम्बद्धभाषी स्यादत आह **वागीश्वरायेति**। वाचामीश्वरः पतिः, तस्मै। वाचस्पतये इत्यर्थः।

गोपाय - गाः पाति, गोपायति वा गोपस्तस्मै गोपाय।

गोहिताय - गोभ्यो हितं यस्मादसौ गोहितस्तस्मै।

गवाम्पते - गोस्वामिन्। ते नम इति शेषः।

(४२० **गन्धर्वाय**- गन्ध्यते गन्धर्वः।कोशपर्यालोचनयाऽनेकार्थता प्रतीयते। तथा हि- अन्तराभवसत्वेऽश्वे गन्धर्वादिश्च गीयते(अ.को. ३.३.१३२) इति। अन्तरा मरणजन्मनोर्मध्ये भवं सत्वं यातनाशरीरम्। अथवा - दिनरात्रयोर्मध्ये भवं सत्वं सन्ध्यकालाभिव्यक्तं सत्वावच्छिन्नं चैतन्यमित्यर्थः। अथवा- अन्तरा सभामध्ये भवः स्थाणुः स्तम्भस्तत्र भवः सत्वावच्छिन्नं चैतन्यमिति।

गम्भीराय- गमेः भियं राति इति गम्भीरः। गमनभयखण्डनकर्तेति यावत्। आधते गभीरे? गभीरगम्भीरशब्दौ (गभीरगम्भीरौ)विति रन्नन्तौ (उ.सू. ४.३५)। (तस्मै)गम्भीररूपाय।

गभीराय - स्वरूपं सामर्थ्यचेष्टितं यस्य ज्ञातुं न शक्यत इति। गहनस्तस्मै गहनाय।

गर्जितायोर्जिताय च - गर्जा इतः ऊर्जा इतः। यद्वा- गर्जा सञ्जाता यस्य ऊर्ध्वा सञ्जाता यस्य असौ गर्जितः ऊर्जितः। तदस्य गर्जितं सञ्जातं तारकादिभ्य इतच्(पा.सू. ५.२.३६) इति इतच्प्रत्ययः। शब्दायमानाय गर्वायमानायेत्यर्थः।

पर्जन्याय- पिपर्ति जलं पर्जन्यः, तस्मै। द्वारयति वा जलं पर्जन्यः।

प्रबुद्धाय - प्रकर्षेण बुध्यतेऽसौ प्रबुद्धः, तस्मै प्रबुद्धाय।

प्रधानपुरुषाय च- प्रधीयतेस्मिन्निति प्रधानं, प्रधत्त इति वा प्रधानं प्रकृतिः, सत्त्वरजस्तमसां साम्यावस्थेति भावः। पुरि शेते इति पुरुषः। प्रधानं च पुरुषश्च प्रधानपुरुषः। यद्वा - प्रधानपुरुषौ यत्र वर्तेते असौ प्रधानपुरुषः, तस्मै प्रधानपुरुषाय। यद्वा - प्रधानं पुरुषः प्रधानपरुषः। सर्वात्मनां मध्येऽयमेव प्रधानपुरुष इत्यर्थः।

पद्माभाय - पद्मवत् आभा यस्यासौ पद्माभः, तस्मै पद्माभाय।

सुनाभाय - शोभना नाभिर्यस्यासौ सुनाभः, तस्मै सुनाभाय।

(४३०) **पद्मनाभाय** - पद्मं नाभौ यस्यासौ पद्मनाभः। अथवा - ब्रह्मण आधारभूतं पद्मं नाभौ यस्यासौ पद्मनाभः। अथवा - पद्माकारस्य जगतो नाभ आकारः पद्मनाभः। तस्मै पद्मनाभाय। अन्यत्रापीष्यत इति वार्तिकार्थमवगम्य, अच्प्रत्यन्ववपूर्वात् सामलोम्नः (पा.सू.५.४.७५) इति सूत्रे अजिति योगविभागमाश्रित्य अच्प्रत्ययमुत्पाद्य इष्टसिद्धिरिति। प्रहरणार्थेभ्यः

परे निष्ठासप्तम्यौ इति पद्मस्य चतुरायुधेषु दृष्टे पूर्वनिपातः। पद्मं नाभौ यस्येति वैयधिकरण्येऽपि समासः। सन्धिविग्रहवाक्यार्थयोरैकार्थ्यात् पञ्चभिर्भुक्तमस्य, वृष्टे देवे गत इत्यादिषु विग्रहवाक्यार्थस्य पञ्चभुक्त इति समासार्थभेदात् समासाभावः। प्रकृते च गमकत्वात् अवश्यं समास इति भावः।

भासिने- अच्प्रत्यये रूपम्। भातीति भासः, तद्वते। छान्दसः सलोपः। द्विसकारक एव वा पाठः। यस्य भासा सर्वमिदं विभातीति श्रुतेर्भासीति भावः।

पद्मनेत्राय - पद्मवन्नेत्रे यस्यासौ पद्मनेत्रः, तस्मै पद्मनेत्राय।

पद्माय - पद्यते भृङ्गैरिति पद्मम्। अर्तिस्तुसुहुसृधृभिक्षुभाया वापदियक्षिनीभ्यो मन्(उ.सू. १.१४०)इत्यौणादिको मन्। पद्मं विद्यते यस्याः सा पद्मा कमलासनेति यावत्। पद्मा विद्यते यस्यासौ पद्मः। मत्वर्थीयो अः। तस्मै पद्माय।

पद्मायाः पतये नमः। लक्ष्मीपतये इत्यर्थः। विग्रहवाक्यमेवैतत्। न समस्तपदम्।

पद्मोदराय -

पूताय - पूञ् निष्ठायां रूपम्।

पद्मकल्पोद्भवाय - पद्मस्य जगतः कल्पे उद्भवो यस्यासौ, पद्मकल्पोद्भवः, तस्मै।

हृत्पद्मवासाय- हृत्पद्मे वसतीति हृत्पद्मवासः, तस्मै। दहर उत्तरेभ्यः [ब्र.सू. १.३.१४]। अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्विजिज्ञासितव्यम् [छां.उ. ८.१.] इति श्रुतेः।

भूपद्मोद्धरणाय - भूरेव पद्मं भूपद्मम्। तदुद्धरणं कृतं येन, भूपद्मोद्धरणः, तस्मै।

(४४०)**शब्दब्रह्मस्वरूपाय** - शब्दात्मकं ब्रह्म वेदः, तद्रूपाय। ब्रह्मोद्य मित्यादौ वेदेऽपि ब्रह्मशब्दप्रयोगात्।

ब्रह्मरूपधराय - ब्रह्मणो रूपम् ब्रह्मरूपम्। धरते धरः। ब्रह्मरूपस्य धरो ब्रह्मरूपधरः। वस्तुतोऽरूपोऽपि व्यापकतया रूप्यमाण इव दृश्यत इति भावः।

ब्रह्मणे- बृहत्वाद्बृंहणत्वाद्वा ब्रह्मणः स्वप्रकाशेनान्यसमर्थयितृत्वाद्वा ब्रह्म। बृहि वृद्धावित्येतस्मान्मनिन्प्रत्यय औणादिकः(द्र. उ.सू. ४.१४५)। तस्मै ब्रह्मणे। बृहत्वाद् बृंहणत्वाद्वाऽऽत्मैव ब्रह्मेति गीयते इति श्रुतेः।

ब्रह्मरूपाय - व्यापकरूपाय।

ब्रह्मनेत्रे - ब्रह्मणो नेता ब्रह्मनेता, तस्मै ब्रह्मनेत्रे। चतुर्मुखस्यापि चालक इत्यर्थः।

ब्रह्मादये - ब्रह्मण आदिः ब्रह्मादिः, तस्मै ब्रह्मादये। ब्रह्म कारणभूतायेत्यर्थः।

ब्राह्मणाय - ब्राह्मणस्वरूपाय। वर्णानां ब्राह्मणोऽस्म्यहम्" इति भगवद्वचनात्।

ब्रह्मब्रह्मात्मने नमः - व्यापकब्रह्मरूपायेत्यर्थः।

सुब्रह्मण्याय - सु शोभनं निर्गुणं ब्रह्म सुब्रह्म, तत्स्वरूपतया तत्र साधुः, सुब्रह्मण्यः। अथवा - सुब्रह्मण्याऋगिव बलियज्ञे सामानि पठितृत्वात् सुब्रह्मण्यः। तस्मै सुब्रह्मण्याय।

(४५०)**देवाय** - दीव्यतीति देवः, तस्मै देवाय।

ब्रह्मण्याय - ब्रह्मकर्मणि साधुः, ब्रह्मण्यः, तस्मै

त्रिवेदिने - त्रयो वेदा यस्यासौ त्रिवेदी, तस्मै त्रिवेदिने।

परब्रह्मस्वरूपाय -

पंचब्रह्मात्मने नमः। ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः [मानसोल्लासः ९.४५]इति [दीप्तादिशास्त्र]वचनेन पञ्चब्रह्मात्मकायेत्यर्थः। यद्वा –

भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा पुमान्।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः।।

इति पञ्चरूपता विज्ञेया।

नमस्ते **ब्रह्मशिरसे** - ते ब्रह्मशिरसे नमोऽस्तु

तथा **अश्वशिरसे** नमः

अथर्वशिरसे- अथर्वा शिरो यस्य। यद्वा- अथर्वशिरसि गीयमान तयाऽध्येयतयाऽथर्वशिरोरूपता। ऋग्यजुस्सामरूपत्रय्युद्धारोऽथर्वेत्युच्यते।

अशनिप्रमिताय - अशनिरुल्काभेदः, तत्प्रमितस्तत्सदृशः। शत्रूणा मुल्कापातरूप इत्यर्थः। यद्वा - अश्नाति शालीनित्यशनिः। यद्वा- अशनैर्याती त्यशनिः।

लक्षणज्ञाय - लक्षणात् चिह्नात् शुभाशुभसूचकात् जानातीति लक्षणज्ञः, तस्मै।

तीक्ष्णदंष्ट्राय नमोऽस्तु। तीक्ष्णदंष्ट्रा यस्यासौ तीक्ष्णदंष्ट्रः, तस्मै तीक्ष्णदंष्ट्राय।

लोलाय - चञ्चलाय।

(४६० **अललिताय** - असुन्दराय। ललितं सुन्दरं वल्गु" इति कोषात्।

लावण्याय - लावण्यं वर्तते यत्रासौ, तस्मै लावण्याय।

लवित्राय- लवित्रायेति। लूयते लुनाति वा येन तल्लवित्रम्, तस्मै। वैरच्छेदकारणमित्यर्थः। अर्तिलूधूसूखनसहचर इत्र (पा.सू. ३.२.१८४) इतीत्रः प्रत्ययः।

भासकाय - भासयतीति भासकस्तस्मै।

लक्षणज्ञाय - लक्षणं जानातीति लक्षणज्ञः। लक्ष्यतेनेनेति लक्षणं चिन्हम्।

लक्ष्याय - लक्ष्यत इति लक्ष्यः। भावनाविषयभूतभाव्यायेत्यर्थः।

लक्षणाय - लक्ष्यतेनेनेति लक्षणः। यद्वा- लक्षयतीति लक्षणः, तस्मै लक्षणाय।

लसद्दीप्ताय - लसन्ती दीप्तिः प्रभा यस्यासौ लसद्दीप्तः, तस्मै लसद्दीप्ताय।

दीप्ताय - दीप्तिर्विद्यते यस्मिन्। यद्वा - दीप्तिमान् दीप्तः।

विष्णवे - व्यापकाय। विष्लृधातोर्व्याप्त्यभिधायिन इष्णुच्प्रत्यये विष्णुरिति रूपम्। तदुक्तम् (म.ना.उ.) -

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। इति व्याप्तिश्रुतिः

(४७०)**प्रभविष्णवे-**

वृष्णिमूलाय कृष्णाय- वृष्णिमूलायेति कृष्णायेत्यस्य विशेषणम्। पृथग्वा नाम वृष्णीनां यादवानां मूलम् वृष्णिमूलम्, तस्मै। वर्षतीति वृष्णिः,सृवृषिभ्यां कित्(उ.सू. ४.४९) इत्यत्र, वीज्याज्वरिभ्यो निः(उ.सू. ४.४८) इत्यतो निरित्यस्यानुवृत्तेर्निप्रत्यये वृष्णिरितिशब्दनिष्पत्तिः कार्या। कृष्णाय- कृषतीति कृष्णः। कृषेर्णप्रत्ययः । यद्वा- कर्षतीति कृष्णः।

श्रीमहाविष्णवे- महांश्चासौ विष्णुश्च महाविष्णुः। आन्महतः (पा.सू.६.३.४६)इत्याकारोऽन्तादेशः। श्रीमहांश्चासौ महाविष्णुश्च श्रीमहा विष्णुः। वामनं रूपं विधाय देवेषु विशतीति विष्णुः। यद्वा- त्रिविक्रमरूपेण त्रैलोक्यं व्याप्तवानिति विष्णुः। यद्वा- विश्वं वेवेष्टि व्याप्नोतीति विष्णुः, देशकालवस्तुपरिच्छेदरहितः। व्याप्त्यर्थाद् विषेः किच्च(उ.सू. ३.३९) इति

नुप्रत्यये विष्णुरिति रूपम्। व्याप्तिश्रवणं च

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः।(म.ना.उ.)

इत्यादिषु स्पष्टं दृष्टम्। यद्वा - विशतेः ष्णुप्रत्यये विष्णुरिति रूपम्।

यस्माद्विश्वमिदं सर्वं तस्य शक्त्या महात्मनः।
तस्मादेवोच्यते विष्णुर्विशिधातोः प्रवेशनात्।।

इति विष्णुपुराणे(३.१.४५)ऽभिधानात्।

त्वां **महासिंहहारिणं** पश्यामीत्यन्वयः। महासिंहं हरतीति महासिंह हारी, तम्।

वनमालिनम्- वनमाला विद्यते यस्यासौ वनमाली, पुण्यपल्लव फलोचिता वनमाला यस्यास्तीति भावः। व्रीह्यादित्वादिनिः।

किरीटिनम् - किरीटं वर्तते यस्मिन्नसौ किरीटी, मुकुटवानित्यर्थः।

कुण्डलिनम् - कुण्डले वर्तते यस्यासौ कुण्डली, तं कुण्डलिनम्।

सर्वगम् - सर्वत्र गच्छतीति सर्वगः, तं सर्वगम्।

सर्वतोमुखम्- सर्वतः समन्तात् मुखानि यस्यासौ सर्वतोमुखः, तम्। सर्वदिग्गतमिति वा। यद्वा- क्रोधवशात् जिह्वां लालयन् इतस्ततोऽवलोकयन् सर्वतोमुखमित्युच्यते।

(४८० **सर्वतः पाणिपादोरुम्** - सर्वतः पाणयश्च पादाश्च ऊरुश्च यस्य सर्वतःपाणिपादोरुः, तं सर्वतः पाणिपादोरुम्।

सर्वतोक्षिशिरोमुखम्- सर्वतः समन्तात् नेत्रशीर्षमुखानि यस्य तम्।

सर्वेश्वरम् - सर्वेषामीश्वरः, तम्।

सदातुष्टम् - सर्वकालप्रसन्नम्

सत्पथम्- सन् पन्था यस्यासौ सत्पथः। ऋक्पूरब्धूः पथामानक्षे (पा.सू. ५.४.७४)इति समासतः सत्पथम्।

समरप्रियम् - सङ्ग्रामप्रियम्।

बहुयोजनविस्तीर्णम् - अनेकयोजनविस्तीर्णम्।

बहुयोजनमायतम् - अनेकयोजनविस्तृतमिति यावत्।

बहुयोजनहस्ताङ्घ्रिम् - बहुयोजनपाणिचरणहस्ताश्चाङ्घ्रयश्च हस्ताङ्घ्रयः। हसत्यनेनारिं हस्तः। हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्(उ.सू. ३.८६) इति तन्प्रत्ययः।

बहुयोजननासिकम् - अनेकयोजनानि नासिका यस्य, तम्।

(४९०) **महारूपम्**- महच्च तद्रूपञ्च महारूपम्। महारूपं यस्यासौ महारूपः।

महाचक्रम्- महच्च तच्चक्रञ्च,महाचक्रं हस्ते यस्यासौ महाचक्रः।

महादंष्ट्रम्- महत्यो दंष्ट्रा महादंष्ट्राः, महादंष्ट्रा यस्यासौ महादंष्ट्रः, तम्।

महाभुजम् - महान्तौ भुजौ यस्यासौ महाभुजः, तं महाभुजम्।

महानादम् - महांश्चासौ नादश्च महानादः, स यस्यास्ति स तम्।

महारौद्रम्- रुद्र एव रौद्रः। रोदयत्यसुरस्त्रीरिति रुद्रः। महांश्चासौ रुद्रश्च, तं महारौद्रम् अतिभयङ्करमिति यावत्।

महाकायम् - दीर्घदेहम्।

महाबलम् - महच्च तद्बलं च महाबलं यस्यासौ स तम्। आन्महत- (पा.सू. ६.३.४६) इत्याकारान्तादेशः सर्वत्र। अनेनैतावता श्लोकसन्दर्भेण विराड्रूपता दर्शिता। ब्रह्मविष्णुशिवात्मकतां दर्शयति क्रमेण आनाभेरिति।

आनाभेर्ब्रह्मणो रूपम्। नाभिं मर्यादीकृत्य ब्रह्मरूप इत्यर्थः।

आगलाद्वैष्णवं तथा। गलपर्यन्तविष्णुरूप इत्यर्थः।

(५००) **आशीर्षाद्रुद्रम्।** शिरःपर्यन्तरुद्र इत्यर्थः।

इति श्रीमन्महाराजाधिराजश्रीदलपतिराजविरचिते

श्रीनृसिंहसहस्रनामभाष्ये नृसिंहप्रसादे व्रतसारे
नाम्नां पञ्चमं शतं परिपूर्णम्

षष्ठशतकम्

ईशानाय - इष्टे असौ ईशानः, शानच्।

सर्वतःशिवाय - सर्वकल्याणदातृतया शिवत्वम्।

नमोऽस्तु **नारायण नारसिंह**- हे नारायण नारसिंह ते नमोऽस्तु। नरस्य सिंहस्य च अवयवा यस्मिन्नसौ नारसिंहः। तस्य सम्बोधनम् - हे नारसिंह। नर आत्मा। ततो नरादात्मनो जातान्याकाशादीनि भूतानि नाराणि। आत्मन आकाशः सम्भूतः(तै.उ. ब्र.व. १ इति श्रुतेः। नाराणि कार्याण्ययते कारणात्मना व्याप्नोति। अतश्च तान्यस्यायनमिति नारायणः। तथा च मन्त्रवर्णोऽपि दृश्यते(या.उ.१३, म.ना.उ. १३) -

यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः।। इति।

तथाऽन्यत्राप्युक्तम् (भा. उद्यो.) -

नराज्जातानि सत्वानि नाराणीति ततो विदुः।
तान्येव वायनं तस्य तेन नारायणः स्मृतः।। इति।

नमोऽस्तु **नारायण वीरसिंह**- नॄ नये, नृणाति नरः। स एव नारः। अय गतौ।भौवादिकात्तस्माण्ण्यन्तात् भावे आयना न्यासः। आतो युच् (पा.सू. ३.३.१२८) नरस्य यस्य आयना प्राप्तिहेतुत्वं यस्य स नारायणः। असुरैः लोका उन्मर्यादिकृता इति तान्निहत्य पुनस्ते न्यायं प्रापिता इत्यर्थः। विक्रान्तः सिंहो वीरसिंहः।

नमोऽस्तु **नारायण क्रूरसिंह**- नरस्यायं नारायणः, नारायणश्चासौ

क्रूरसिंहश्च। क्रूरो दारुणः, नडादिभ्यः फक्(पा.सू. ४.१.९९) इति फक्।

नारायण दिव्यसिंह नमोऽस्तु। नारमम्मयमयनमस्यासौ नारायणः, आपो नारा इति प्रोक्ताः(म.स्मृ. १.१०) इति वचनात्। दिवि भवो दिव्यः, भवार्थे यत्। सिंचतीति सिंहः । दिव्यश्चासौ सिंहश्च दिव्यसिंहः।

नमोऽस्तु **नारायण व्याघ्रसिंह**- नराणां समूहो नारमस्यायनमाश्रयो नारायणः। व्याजिघ्रति व्याघ्रः, हिनस्तीति सिंहः, व्याघ्रश्चासौ सिंहश्च व्याघ्रसिंहः।

नमोऽस्तु **नारायण पुच्छसिंह**- नारासु अप्स्वयनमस्यासौ नारायणः। पुनाति पुच्छः, पुनात्यनेन वा पुच्छः। पुनातेः पुच्छ इत्यपि" इत्युक्तत्वात्। तथा च- ब्रह्म पुच्छं प्रतिष्ठा(तै.उ. ब्र.व. ५) इति श्रुतिश्च। पुच्छयुक्तः सिंहः पुच्छसिंहः।

नमोऽस्तु **नारायण पूर्णसिंह**- नराज्जातानि भूतानि नाराणि, तेष्वयनमस्येति नारायणः। पूर्णसिंहः - सिंहाद्रौ वर्तमानः सन् सर्वं व्याप्नोतीति भावः।

(५१०) नमोऽस्तु **नारायण रौद्रसिंह** - नृणातीति नरः, पचाद्यच्। नर आत्मा तस्माज्जातानि आकाशादिभूतानि नाराणि। आत्मन आकाशः सम्भूतः (तै.उ. ब्र.व. १)इति श्रुतेः। नाराणि व्याप्नोतीति नारायणः। रोदयत्यसुरस्त्रीरिति रुद्रः। यद्वा- रुद्दुःखं, तद् द्रावयतीति रुद्रः। अथवा - रुत् ज्ञानं, तद् राति ददातीति रुद्रः। आतोनुपसर्गे कः(पा.सू.३.२.३)इति कः। रुद्र एव रौद्रः, स्वार्थेऽण्। "रौद्रो भयानक " इति।

नमो नमो **भीषण भद्रसिंह**- नमो नम इत्यादरार्था वीप्सा। भक्ता भक्तयोर्निग्रह(-अनुग्रह)कारितया भयानकसौम्यस्रूपता। भीषणो भयानकः।

नमो नमो **विह्वलनेत्रसिंह**- विह्वला नेत्रा यस्यासौ विह्वलनेत्रः,

विह्वलनेत्रश्चासौ सिंहश्च, तत्सम्बोधनं विह्वलनेत्रसिंह।

नमो नमो **बृंहितभूतसिंह** - शब्दायमानो भूतसिंह इत्यर्थः।

नमो नमो **निर्मलचित्तसिंह** - निर्मलं स्वच्छं चित्तं यस्यासौ। यद्वा-निर्मलं क्षिप्तादिचित्तवृत्तिहीनम्।

नमो नमो **निर्जितकालसिंह**- निर्जितः कालो यस्यासौ निर्जित कालः, स चासौ सिंहश्च- निर्जितकालसिंहः। येन स्वभक्तरक्षणार्थं कालोऽपि निर्जित इत्यर्थः।

नमो नमः **कल्पितकल्पसिंह** - कल्पितश्चासौ कल्पसिंहश्च। कल्पो नीरोगो दक्षश्च । तथा च कोषः "कल्पो नीरोगदक्षयो" इति।

(नमो नमः **कामद कामसिंह**)

नमो नमस्ते **भुवनैकसिंह** - भुवनेष्वेकः सिंहः भुवनैकसिंहः। चतुर्दशभुवनेष्वयमेवैकसिंहः।

अपरा हि दैत्या हताः। तस्मिन्नवसरे ज्वलद्भिर्वदनैर्लोकान्सर्वान् ग्रसमानस्तं लेलिह्यसे। तव उग्रा भासः जगत्सर्वं तेजोभिरापूर्य प्रतपन्तीति सर्वं जगदपि न सत्। तस्मिन्निति सर्वे लोकाः भीताः सन्तः केचित्त्वां प्रविशन्ति। भीताः सन्तः केचित्त्वा स्तुवन्ति स्वस्तीत्युक्तिभिः, केचिद् गृणन्तीत्याह-दृष्ट्वाऽद्भुतमित्यादिना श्लोकत्रयेण।

भविष्णुः - अलंकृञ्-निराकृञ्-प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधु सहचरइष्णुच्(पा.सू. ३.२.१३६), भुवश्च(पा.सू. ३.२.१३८)। चादनुक्तेऽपीति। भविष्णुः। भविता त्वमिति यावत्।

सहिष्णुः - सहनशीलः सोढा, हिरण्यकशिपुप्रभृतीन् सहते, अभिभवति चेत्यर्थः।

(५२०) **भ्राजिष्णुः** - भ्राजमानः। भ्राजिष्णुर्जिष्णुरिति सर्वमिष्णुच्प्रत्ययान्ततया

व्याख्येयम्।

जिष्णुः - जयशीलः। ग्लाजिस्थश्च ग्स्नुः(पा.सू. ३.२.१३९) इति।

पृथिवीत्यादिमहाप्रलयमेवेत्यन्तम् - **पृथिवी** पृथ्वी। प्रथते पृथुनाऽपि वा पृथिवी। प्रथेः षिवन् सम्प्रसारणं च(उ.सू. १.१५०)। पृथ्वीति वोतो गुणवचनात् (पा.सू. ४.१.४४) ङीप्। अत्र स्त्रीलिङ्गानि देवताविशेषणानि, नपुंसकानि परब्रह्मणः, पुल्लिङ्गानि श्रीहरेरिति न स्त्रीप्रत्ययान्तानां कश्चनोपालम्भः।

(अन्तरिक्षञ्च)

पर्वतारण्यभूमयः - पर्वतश्चारण्यं च पर्वतारण्यम्। -पर्वमरुद्भ्याम् (वा.५.२.१२२) इति पर्वतशब्दनिष्पत्तिः। अरण्यं- अर्यते मृगादिभिरित्यरण्यम्। ऋच्छतेर्ण्यत्।

कलाकाष्ठेत्यादिमहाप्रलयमेव चेत्यन्तेनोक्तः कालः।

कल्यतेऽनया सा **कला**

काशनं काशते वा **काष्ठा**।

(विलिप्तस्त्वं मुहूर्तप्रहरादिकम्)

अयमर्थः - **अहोरात्रमिति**। अहश्च रात्रिश्च अहोरात्रम्। अहःसर्वैक देशसङ्ख्यातपुण्याच्च रात्रेः(पा.सू. ५.४.८७) इत्यच्प्रत्ययः। ननु - अत्र तत्पुरुषस्येत्यनुवृत्तेः कथं द्वन्द्वः सम्भवति। स च तत्पुरुषः अहर्गुणिता रात्रिरहःशब्दाभिधेया, रात्रिगुणितमहश्च रात्रिशब्देन। ततश्च अहश्च तद्रात्रिश्चेति सामानाधिकरण्यात्। समानसर्वस्वं च सामर्थ्यमेव बाहुल्येन। यद्वा अह्ना समेता रात्रिः अहोरात्रमिति मध्यमपदलोपी समास इति न द्वन्द्वसमासः। उच्यते - द्वन्द्व एवात्रौचीतीमर्हति। धरोरात्र्यन्ताहरादिति तत्पुरुषस्यासम्भवात्। गौणवृत्तिसम्भवेऽप्यसम्भवेऽप्यसम्भव एवोचित इति भावः। तदुक्तं

रामचन्द्राचार्यैः - इहैव द्वन्द्व इति। तथा भगवान् भाष्यकारोऽपि- अहर्ग्रहणं द्वन्द्वार्थमेष्टव्यम्" इति।

त्रिसन्ध्यं च- तिसृणां सन्ध्यानां समाहारः। तिस्रः सन्ध्याः समाहृता इति विगृह्य, तद्धितार्थोत्तरपदे समाहारे(पा.सू. २.१.५१) चेत्यनेन समाहारे समासे, तस्य च सङ्ख्यापूर्वो द्विगुः"(पा.सू. २.१.५२) इति द्विगुसञ्ज्ञायां, द्विगुरेकवचनम्(पा.सू. २.४.१ इत्येकवद्भावे, स नपुंसकम् (पा.सू.२.४.१७) इति नपुंसकत्वे प्राप्ते, अकारान्तोत्तरपदो द्विगुः स्त्रिया माबन्तो? चेति स्त्रीत्वे पाक्षिके नपुंसकत्वे त्रिसन्ध्यं त्रिसन्ध्या चेति रूपद्वयसिद्धिः।

पक्षतीति **पक्षः** मासार्धम्।

(५३०) मस्यतेऽनेनेति **मासः**।

ऋच्छतीति **ऋतुः**।

अक्षिपक्ष्मपरिक्षेपो निमेषः, लघ्वक्षरसमा मात्रा वा निमेषः। द्वौ तु निमेषौ त्रुटिः। त्रुटिद्वयेन लवः। द्वौ लवौ क्षणः। दशक्षणाः काष्ठाः, विंशत्काष्ठाः कलाः। त्रिंशत्कलाः मुहूर्तः। ते त्रिंशदहोरात्रः। पञ्चदश पक्षः। पक्षौ द्वौ मासः। मानुषेण मासेन पैत्रोऽहोरात्रः। शुक्लपक्षादितरा रात्रिः। मानुषमास द्वयमृतुः। ऋतुत्रयमयनम्। अयनद्वयम् वत्सर इति। स च मानुषो वत्सरो देवानामहोरात्रः। द्वे दैवे युगसहस्रे ब्राह्मोऽहोरात्रः। तत्र देवैः षाष्टैस्त्रिभिरहोरात्रशतैर्दिव्यं वर्षं भवति। तैर्द्वादशभिः सहस्रैश्चतुर्युगं लौकिकं सम्पद्यते। तदेकं देवयुगम्। तत्सहस्रं ब्रह्मदिनम्। सम्भूतिस्थितिसमयः। तावत्येव रात्रिः भूतप्रलयसमयः। दैवे युगसहस्रे तौ नृणां कल्पौ स्थितिप्रलय करादिव युगसप्ततिर्मन्वन्तरमित्यादि। तथोक्तमत्यभियुक्तैः (मात्स्ये११८तमाध्याये)-

चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥

इतरेषु च सन्ध्येषु ससन्ध्यांशेषु च त्रिषु।

एकापायेन वर्तन्ते सहस्राणि शतानि च।। इति।

ततश्च सन्ध्येव सन्ध्यांश इति। अयमत्र साम्प्रदायिकार्थः -

कृतयुगम्- १७२८०००, त्रेतायुगम् - १२९६०००, द्वापरयुगम्- ८६४०००, कलियुगम्- ४३२००० इात मानुषमानम्।

मानुषमानेन सर्वं लिखित्वा ःयं देवमानेन संख्या। कलियुगम् - १०००, सन्धिः - २००, द्वापरयुगम्- २०००, सन्धिः - ४००, त्रेतायुगम् - ३०००, सन्धिः - ६००, कृतयुगम् - ४०००,सन्धिः - ८०० देवमानेन सर्वम् -१२०००.षष्ट्यधिका त्रिशती मानुषमानेन पूर्वोक्तसंख्यायुक्ता भवति। ततश्च दैवी द्वादशसहस्री षष्ट्यधिकया त्रिशत्या गुणिता विंशतिसहस्राधिक त्रिचत्वारिंशल्लक्षसंख्यां भजत इति रहस्यम्।

(५४०)**करणम्**- जगदुत्पत्तौ साधकतमम्। क्रियतेनेनेति करणम्। ल्युट्।

कारणम्- उपादाननिमित्तम्। कार्यतेऽनेनेति कारणम्। .ण्यन्तात्सः। हेतुमात्रं कारणमिति।

कर्ता- स्वतन्त्र इत्यर्थः। ण्वुल्तृचौ(पा.सू.३.१.१३३)इति तृच्प्रत्ययः।

भर्ता - भरणशीलः।

ईश्वरः - स्वामी। ईष्टे - ईश्वरः। ताच्छील्ये स्थेशभासेति (पा.सू. ३.२.१७५) वरच्प्रत्यये रूपसिद्धिः। यद्वा- अश्नुते ईश्वरः। अश्नोति अश्नुते। कर्मणि वरट्चोपधाया इति वरचि ईचि इष्टसिद्धिः।

सत्कर्ता - सत्करोतीति सत्कर्ता। सभाजयतीत्यर्थः।

सत्कृतिः - पूजितपूजितैरपि पूजितः। सत्कृतिरित्यर्थः।

गोप्ता - गोपायतीति गोप्ता। रक्षक इत्यर्थः।

सच्चिदानन्दविग्रहः- सदिति। सच्च चिच्च आनन्दश्च सच्चिदानन्दाः,

ते शरीरं विग्रहो यस्य सच्चिदानन्दविग्रहः। सत्य ज्ञानमनन्तम्(तै.उ. ब्र. १), आनन्दं ब्रह्म(बृ.उ. ३.९.३४)इति श्रुतेः।

प्राणिनां प्राणः - प्राणिति प्राणः, वायुरूपः।

(५५० **प्रत्यगात्मा** - प्रत्यक्चैतन्यमित्यर्थः।

सुज्योतिः -

परञ्ज्योतिः - पर उत्कृष्टः प्रकाशः। द्योतते ज्योतिः। निपातनाद् दकारस्य जकारः (द्र .उ.सू. २.१११)। उत्कृष्टता सूर्यादीनां प्रकाशकतया। यस्य भासा सर्वमिदं विभाति" इति श्रुतेः। तदर्थं गीतावाक्यं च श्रूयते (भ.गी. १५.१२) -

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्।। इति।

आत्मज्योतिः - आत्मैव ज्योतिः - आत्मज्योतिः। व्याप्नोति वा, आदत्ते वा जगत् संहारकाले, विषयानत्ति जीवरूपेणेत्यात्मा। अततेर्मनिनि आत्मरूपनिष्पत्तिः। तदाह(लिं.पु. ७०.९६) -

यदाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यस्यास्ति सन्ततो भावस्तस्मादात्मेति कीर्त्यते।। इति।

आत्मनैव प्रकाशत इत्यर्थः। अनेन स्वप्रकाशत्वमुक्तं भवति। तच्च सजातीय विजातीयाप्रकाश्यत्वम्। न च दीपेऽतिव्याप्तिः, तस्य ज्ञानप्रकाश्यत्वात्। यद्वा-अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं तत्। न च मुक्तदशातिव्यापकम्, योग्यत्वात्यन्ताभावानधिकरणत्वस्य विवक्षितत्वात्। मुक्तिदशायां तद्धर्माभावेऽपि व्यावहारिकदशायां तत्सत्त्वेन तत्सिद्धेः। तथोचुः पञ्चपादिकाचार्याः - आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः (अध्यासभाष्य.) इति। तथा सुरेश्वरश्च(बृ.वा. १.४.१२१९)- अक्षमा भवतः केयम् इति। घटस्य

वेद्यत्वान्नातिव्याप्तिः। तत्र अवेद्यस्यैव स्वप्रकाशत्वे धर्मादिष्वतिव्यापकं स्यात्। न च तेऽपि वेद्याः, फलव्याप्यतालक्षणयोग्यत्वस्वीकारात्। इदं हि वेदान्तिसम्मतम् - फलं हि अभिव्यक्तं विषयावच्छिन्नं चैतन्यम्। इन्द्रियद्वारा र्थसम्बन्धान्तःकरणपरिणामविशेषात् अभिव्यक्तिः। तत्र विशिष्टशाब्दप्रमाण बलात् तदाकारधीवृत्तिसमुल्लासमात्रादेव तद्व्यवहार इति। ननु योगिप्रत्यक्ष गम्यतया धर्मादावतिव्याप्तिस्तथैवेति चेत्, मैवम्- चोदनैकप्रमाणगम्यत्वात्तेषाम् योग्यसर्वद्रष्टृत्वस्य विवक्षितत्वात्। तेषां तदभावादित्यलम्।

प्रमाणं चात्रानुमानम्- अनुभूतिः स्वप्रकाशा, अनुभूतित्वात्, यत्तथा, न तत् न तथेति। यथा घटपटादीति सामान्यतोनुमानादिति विशेषणसिद्धेर्ना प्रसिद्धविशेषणता। कल्पितव्यक्तिभेदनिष्ठस्येन्द्रत्वस्यामान्यस्येवानुभूतित्व सामान्यस्य स्वीकारे सिद्धान्ताविरोधान्न रूपासिद्धता। कल्पितस्यापि प्रतिबिम्बादेर्दृष्टसाधकत्वम्। न च जडानां स्वतः परस्परप्रकाशमानत्वम् । ज्ञानस्याप्यप्रकाशमानत्वे यस्य कस्याप्यप्रकाशमानत्वाज्जगदान्ध्यप्रसङ्गो दुर्वारः। आत्मनश्च ज्ञानरूपतां श्रुत्यादीनि बोधयन्ति। तथा हि- सत्यं ज्ञानमनन्तम्(तै.उ.ब्र.१), आनन्दं ब्रह्म(बृ.उ. ३.९.३४) इति। तथाऽनुमानं च- आत्मा संविद्रूपः, तत्कर्मत्वं विनाऽप्यपरोक्षत्वात् ज्ञानवदिति। तस्मादात्मा स्वप्रकाश इति भावः। (द्र. तत्त्वप्रदीपिका पु. १७-४५)

सनातनः - शाश्वत इत्यर्थः।

ज्योतिर्लोकस्वरूपः -लोकयतीति लोकः। ज्योतिश्चासौ लोकश्च, एतत्स्वरूपः। यद्वा- लोक्यत इति लोकः।

ज्योतिर्ज्ञः - ज्योतिर्जानातीति ज्योतिर्ज्ञः।

ज्योतिषां पतिः - तेजसां पतिरित्यर्थः।

स्वाहाकारः - उश्च अश्च आ च सुष्ठु शिवविष्णुब्रह्माणो जिहाः

गच्छति। आतोनुपसर्गे क (पा.सू. ३.२.३)। सुष्ठु आत् जिहाषे स्वाहा तदाकार इति। यद्वा - सुष्ठु आहूयते स्वाहाऽस्यास्तीति। तदाकारो हुतभुक्प्रियः। यद्वा - स्वाहाकारो देवहविर्दानमन्त्ररूपः। यद्वा - देवहविर्दानरूपः

स्वाहा देवहविर्दाने श्रौषड्वौषड्वषट्स्वधा"[अ.को. ३.५.८

इत्युक्तेः। यद्वा - देवतोद्देशेन द्रव्यत्यागजनितदेवतातृप्तिरसि। यद्वा- देवसम्बन्धि कर्म स्वाहा।

स्वधाकारः - सुष्ठु अं वासुदेवं दधातीति स्वधा। तदाकारइत्यर्थः। स्वधेति मन्त्रं भुञ्जानपितृरूपदेवतारूपतोक्ता वा। पित्रुद्देशेन दीयमानजनित तृप्तिरूपो वा। यद्वा - स्वधाकारः पैतृकर्मस्वरूपः।

(५६०) **वषट्कारः** - यदुद्देश्यकं यज्ञकर्मणि वषट्कर्म, स वषट्कारः। यद्वा- यत्र कर्मणि वषट्कारः स इति। तथा च श्रुतिः - यज्ञो वै विष्णुः(तै.सं. १.७.४, २.५.५) इति। यद्वा - वषट्कारो यजमानः। यद्वा - वषडिन्द्रायेति वषट्कारभागीन्द्रः इत्यर्थः।

कृपाकरः - कृपां करोतीति कृपाकरः। यद्वा - कृपाया आकरः कृपाकर इति।

हन्तकारः - भूतपितृयज्ञमन्त्ररूप इत्यर्थः।

निराकारः - उपाधिराकारः। आकाररहित इत्यर्थः।

वेगाकारः वेगे आकारो यस्यासौ वेगाकारः।

शङ्करः - शं शान्तिं करोतीति शङ्करः। कृञो हेतु-(पा.सू. ३.२.२०) इति टः।

उकारादिहकारान्तः इति मुख्यः पाठः। उकार आदिर्यस्य, हकार अन्ते यस्य। अनेन मन्त्रराजरूपता दर्शिता। मन्त्रराजविद्याया हि उग्रं वीरमित्यु कारादिता, नमाम्यहमिति हकारान्तता तावत्प्रत्यक्षं दृश्यत इति सगुणनिर्गुण-

स्वरूपप्रतिपादकता पूर्वोत्तरतापनीयेषु निर्णीता।

ननु तत्रापि विरोधो दृश्यते - पूर्वतापनीये प्रणवः प्रधानम्, मन्त्रराजविद्या च गुण इति प्रतीयते। उत्तरतापनीये च प्रणवोऽङ्गम्, मन्त्रराजानुष्टुप्विद्या च प्रधानमिति प्रतीयते। तत्र सगुणनिर्गुणयोर्मध्ये सगुणं प्रधानं निर्गुणं च गुणभूतमिति कथमिति। कथमिति चिन्त्यम्। तदास्तां तावदप्रकृतम्, प्रकृतमनुवर्तामहे। अथवा - **अकारादीति** क्वचित्पाठः। तत्र मातृकारूपताभिहितेति ज्ञेयम्। अईत्यारभ्य सहेत्यन्ता हि मातृका। पुनरुक्तां निर्गुणरूपतामाह

ॐकार इति। ॐकारस्वरूप इत्यर्थः। अथवा- ॐकारश्च ॐकारश्च ॐकारौ। तौ विद्येते यस्मिन्नसौ ॐकारः। अनेन नारसिंह रूपमुक्तम्।

लोककारकः - लोकं करोति लोककारकः। करोतेः, ण्वुल्तृचौ (पा.सू. ३.१.१३३) इति ण्वुलि, युवोरनाकौ(पा.सू. ७.१.१) इत्यके कारकरूप सिद्धिः।

एकात्मा - एक एवात्मेति। एकः सङ्ख्यार्थो मुख्यार्थश्च इण्भीका पाशल्यतिमर्चिभ्यः कन्(उ.सू.३.४३)इति कनि मुख्यात्मेत्यर्थः सम्पद्यते। एकमेवाद्वितीयं ब्रह्म (छा.उ. ६.२.१)इति श्रुतेः।

(५७०) **अनेकात्मा** - जीवविवक्षयाऽनेकत्वम्। अत्रैकः सङ्ख्यार्थः। अन्यथा प्रकृतानुपयोगात्।

चतुरात्मा - चतुःप्रकारभिन्नः। ते च प्रकाराः ब्रह्मविष्णुरुद्र पुरुषात्मकाः। र[illegible]सा युक्ते सत्त्वे ब्रह्मा, तमसा युक्ते सत्त्वे रुद्रः, शुद्धे सत्वे विष्णुः, र[illegible]स्तमोभ्यां युक्ते सत्त्वे पुरुष इति।

चतुर्भुजः - चत्वारो भुजा यस्यासौ चतुर्भुजः।

चतुर्मूर्तिः -चतस्रो मूर्तयो यस्यासौ चतुर्मूर्तिः। श्वेतरक्तपीतकृष्णवर्णः।

चतुर्द्रंष्ट्रः - दंष्ट्राश्चतस्रो यस्यासौ चतुर्द्रंष्ट्रः।

चतुर्वेदमयोत्तम - चतुर्वेदमयश्चासावुत्तमश्च।

लोकप्रियः - लोकानां प्रियः। अथवा - लोकः प्रियो यस्यासौ लोकप्रियः .

लोकगुरु - लोकानां गुरुः। गृणाति उपदिशतीति गुरुः। कृग्रोरुच्च (उ.सू. १.२४)इति साधुः।

लोकेशः - लोकानामीशो लोकेशः। यद्वा - भूरादीन् सप्तलोकानीष्टे इति लोकेशः।

लोकनायकः - लोकानां नायकः लोकनायकः।

(५८०) **लोकसाक्षः** - लोकानां साक्षी । साक्षादीक्षते इति साक्षी। साक्षाद्द्रष्टरि संज्ञायाम् (पा.सू. ५.२.९१)इति इनि प्रत्ययान्तः।

लोकानां पतिः - लोकपतिः।

लोकात्मा - लोकस्यात्मा लोकात्मा।

लोकलोचनः - लोकस्य लोचनो लोकलोचनः।

लोकाधारः - लोकानां आधारः।

बृहल्लोकः - महालोको महाजन इत्यर्थः।

लोकालोकमयो गुरुः - लोकालोकप्रचुरः।

लोककर्ता - लोकस्य कर्ता निर्माता।

महाकर्ता - महांश्चासौ कर्ता च। महास्वतन्त्र इत्यर्थः।

कृतावर्तः - कृत आवर्तो येनासौ। कृतावर्तः।

(५९० **कृतागमः** - कृत आगमो येनासौ। कृतागमः।

अनादिः - न विद्यत आदिर्यस्य अनादिः।

अनन्तः - न विद्यतेऽन्तो देशादिपरिच्छेदो यस्य सोऽनन्तः।

अभूतः - न भूतः अभूतः।

भूतविग्रहः -

स्तुतः - देवादिभिरिति शेषः। स्तुत इति कर्मणि क्तः। "ष्टु स्तुतौ" इति धातोः कृता क्तेन कर्मणोऽभिहितत्वात् कर्मणि श्रीनृसिंहे प्रथमैव जाता, अनभिहिताधिकारविहितत्वात्।

स्तव्यः -स्तोतव्यः। अर्हे कृत्यतृचश्च(पा.सू.३.३.१६९)इति साधुः।

स्तुत्यः - स्तोतुमर्हः स्तुत्यः। एतिस्तुशास्वृदृजुषः क्यप् (पा.सू. ३.१.१०९) इति क्यप्। ह्रस्वस्य० (पा.सू. ६.१.७१)इति तुक्।

स्तवप्रीतः - स्तवेन स्तोत्रेण प्रीतिं प्राप्तः।

स्तोता - स्तुतिकर्ता।

(६००) **नेता** - प्रापयिता इति।

इति श्रीनृसिंहप्रसादे सहस्रनामभाष्ये षष्ठं शतं सम्पूर्णम्।

सप्तमशतकम्

नियामकः - नियन्ता।

त्वं गतिः सर्वेषामिति।

मतिस्त्वं - बुद्धिरित्यर्थः।

पाति **पिता**।

मन्यते **माता**। नप्तृनेष्टृ-(उ.सू. २.९६) इत्यादि निपातात् सिद्धिः। पिता त्वं जनकः। माता त्वं जननी। त्वमेव जनकः। त्वमेव गुरुरुपदेष्टा। त्वमेव सखा। सुहृदश्चात्मरूपस्त्वं सत्। हृदयस्यान्तस्त्वमेवात्मेवात्मेति त्वां विना मे

मम, गतिः नास्ति। अन्येति शेषः।

(६१०) **मन्त्ररूपाय** ते नमः। मन्त्रो रूपमात्मा यस्यासौ मन्त्ररूपः, तस्मै। अथवा- मन्त्रेण रूप्यत इति मन्त्ररूपः। रूप्यमाण इति यावत्। अथवा- मन्त्ररूपः मन्त्रप्रकाश्य इत्यर्थः। मन्यते मनुतेऽनेन मन्त्रः। गुधृवीपचिवचि यमिसदिक्षदिभ्यस्त्रः (उ.सू. ४.१६६) इति त्रप्रत्ययः

अस्त्ररूपाय - अस्त्रैरपि रूप्यमाणायेत्यर्थः। अस्यतेऽस्त्रम्।

बहुरूपाय - बहूनि रूपाणि यस्यासौ बहुरूपः।

रूपाय - रूपवान् (रूपः ,तस्मै)।

पञ्चरूपधराय - पञ्चात्मकविष्णुरूपतयेत्यर्थः। यद्वा-

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः [मानसोल्लासः ९.४५] इति पञ्चरूपाणीत्यर्थः।

भद्ररूपाय - भद्रं कल्याणं रूपं यस्य सः भद्ररूपः, तस्मै भद्ररूपाय कल्याणरूपाय।

योगाय - युज्यत इति योगः, तस्मै। योगश्चित्तवृत्तेर्निरोधः(यो.सू.) अयमाशयः - निर्मलसत्वपरिणामश्चित्तम्। तस्याङ्गानि भावपरिणामा वृत्तयः। तासां निरोधो बहिर्मुखपरिणामविच्छेदादन्तर्मुखेन प्रविलोपपरिणत्या स्वकारणे लयो हि योग उच्यते। सर्वचित्तभूमौ न। अयं योगः कदाचित् कस्याञ्चिद्भूमौ भवेत्। चित्तभूमयश्चित्तावस्थाविशेषाः क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं, निरुद्धमिति। तत्र एकाग्रनिरुद्ध एवावस्थे समाध्युपयोगिन्यौ। एकाग्रे बहिर्वृत्तिनिरोधात्। निरोधे च संस्कारसर्ववृत्तीनां प्रविलयात्। स निरोधो द्वेधा- सोपायो निरुपायश्च। अभ्यासवैराग्यजन्यो हिं सोपायः। तत्र स्थितौ यत्नोऽभ्यासः। वृत्तिहीनस्य चित्तस्य स्वरूपस्थः परिणामः स्थितिः। तस्यां यत्नो मुहुर्मुहुस्तथात्वेन चित्ते सोऽभ्यासः। वैराग्यन्तु दृष्टानुश्रविकविषय-

वितृष्णस्य वशीकारसंज्ञा। ऐहिकामुष्मिकफलयोः परिणतिवैरस्य दृष्टे निस्पृहस्य या वशीकारसंज्ञा ममेमे वश्या नाहमेषां वश इति विमर्शः। स द्विविधः - सम्प्रज्ञातः, असम्प्रज्ञातश्च। सम्यक् संशयविपर्ययहान्या प्रकर्षेण ज्ञायते आत्मस्वरूपं येन समाधिना स सम्प्रज्ञातः। स चतुर्विधः- वितर्कानुगतः, विचारानुगतः, आनन्दानुगतः, अस्मितानुगतश्चेति। अनुविद्धा भावना स सबीजसमाधिरित्युच्यते। भावना हि विषयान्तरत्यागेन द्वेधा। चतुर्विंशतिजडानि, पुरुषोऽजडः। ततश्च सवितर्कश्च सविचारः सानन्दः सस्मितश्चेति चतुर्विधः समाधिः। तत्र यदा स्थूले पाञ्चभौतिके चतुर्भुजादिध्येये भावना तदा सवितर्कः। यदा तन्मात्रान्तःकरणलक्षणे सूक्ष्मे भावना तदा सविचारः। एवम्पर्यन्तः समाधिः ग्राह्यंसमापत्तिरुच्यते। समापत्तिस्तु गृहीतस्य ग्रहणग्राह्येषु तदेकाग्रत्वं तन्मयत्वं चेति सा ग्राह्यसमापत्तिः। गृहीतसमापत्तिर्ग्रहणसमापत्ति रिति द्विविधा। यदा तु रजस्तमोलेशयुतान्तःकरणसत्वभावना, तदा चिच्छक्ते र्गुणभावाद् भाव्यस्य मुखप्रकाशमयस्य सत्वस्योद्रेकात्सानन्दः समाधिः। अयञ्च ग्रहणसमापत्तिरित्युच्यते। या हि रजस्तमोलेशानभिभूतशुद्धसत्वालम्बना भावनावश्यंग्राह्य सत्वस्यान्वयस्तावान् चितिशक्तेराधिक्यात् सत्वमात्रावशेष त्वेन सास्मितः समाधिः। सोऽयं गृहीतृसमाधिरुच्यते। तत्र सामर्थ्ये वितर्कः। अयं चतुर्विधः सम्प्रज्ञातः समाधिः। असम्प्रज्ञातो हि निर्बीजः समाधिरित्यु च्यते। तथा हि- देशसम्बन्धश्चित्तस्य धारणा। अष्टादशमर्मस्थानेषु यो हि चित्तसम्बन्धः क्रियतेऽसाधारणं तत्रैकतानता ध्यानत्वं विजातीयप्रत्यय तिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणलक्षणनिदिध्यासनमेव। तदेवार्थनिर्भासं स्वरूपशून्यमिव समाधिः। अयं च निर्बीजसमाधिः समापत्तिश्च क्षीणवृत्ति मनसा गृहीतग्रहणग्राह्येषु तत्स्थत्वतन्मयत्वम्। सर्वसम्पत्तीनां निर्विचारः फलम् । तस्याश्चान्यन्महाफलम्।(द्र. पा.यो.द.)

योगरूपाय - रूप्यत इति कर्मव्युत्पन्नरूपशब्दसमभिव्याहारात् योगेन रूप्यमाण इत्यत्रावगतिर्जायत। ततश्चायं योगैकसमधिगम्य इत्याशयः। तद्गवेषणायामन्य उपायो नास्तीत्यर्थः। एवं गुणद्वैगुण्यत्रैगुण्योपासनद्वाराऽऽसनद्वारा सर्वगुणतन्मयपीठपरित्यागेनाखण्डसच्चिदानन्दाभिव्यक्तिर्जायत इति भावः।

योगिने- योगोऽस्यास्तीति योगी। मत्वर्थीयो इनिः, (युजेर्भावे) घञ्। अत एव योगनृसिंह इति प्रसिद्धिः।

समरूपाय- समं रूपं यस्यासौ समरूपः। समानं सममेकमिति यावत्। समो नागेन समो मशकेन(बृ.उ) इति श्रुतेः।

(६२०) **योगाय**- पूर्वं हि धर्मधर्मिभावतया निरूपितः। इदानीं तद्रूपतयैव। अस्मिन् योगलक्षणोऽतिशयोऽस्तीति न, अपि तु तद्रूप एवेति भावः। योग एव योगः। मत्वर्थीयप्रत्यये आधाराधेयभाव एवोक्तो भवेदिति। यद्वा- योगोऽस्यास्तीति योगः जीवपरात्मनोरैक्यरूपः। अपानप्राणयोर्वा योगोऽस्तीति योगस्तस्मै। सूर्यचन्द्रयोर्वा योगः। कुण्डलिनीरूपशक्तिशिवयोर्वा योगोऽस्तीति योगस्तस्मै।

योगगम्याय - योगोन चित्तवृत्तिनिरोधरूपेण गम्यो ज्ञेयः।

योगपीठस्थिताय- योगो हि चित्तवृत्तेर्विषयेभ्यो व्यावृत्तिरूपः। योगपीठे स्थितः, (तस्मै)। योगसिंहासनस्थिताय। अयमेव योगसिंहासनाभिषिक्तः प्रथमयोगीत्यर्थः।

सौम्याय- दुष्टनिग्रहायोग्ररूपधार्यपि भक्तेभ्यः सौम्य इत्यर्थः। तदुक्तम् -

सोमदैवतकः सौम्य सौम्यः स्यात्सुन्दरोऽपि च।
सौम्योऽक्रूरो बुधः सौम्यः सौम्यः शान्ते प्रयोगतः।। इति।

ननु अक्रूरः सुन्दरः शान्तश्च सौम्यो भवति यथाकथञ्चित्। सोमदेवताकत्वं सोमपुत्रत्वं च सर्वथाऽनुपयोगि। आद्यं हि चरुनिष्ठम्।

द्वितीयञ्चानित्यबुधग्रहनिष्ठम्।

अयमज्ञान् प्रत्यनुयोगः, न तु ज्ञान् प्रति। ज्ञान्प्रति वा सोमदेवताकोऽयं सौम्यत्वे भविष्यति। सोमो देवताऽस्येति व्युत्पत्त्या चरुव्यतिरेकेणापि सौम्यस्य सम्भवात्। सम्यग् भवसि ज्ञः। कथं जगदात्मनश्चन्द्रो देवतेति। ननु नाहं ज्ञः, किन्तु प्राज्ञः। ततश्चोमया सह वर्तमानः सोमः शिवः दैवतं यस्येति सौम्यः श्रीनृसिंहो भवतीति। सत्यम्, प्रकर्षेणाज्ञः प्राज्ञः इति। एतावत्कालपर्यन्तं शम्भुनामतया प्रतिभासमानान्यप्यनेनैव तत्तत्कार्यविशेषोपायश्च शिवप्रभृतिभ्यो दत्तानीति व्यांख्यातम् , इदानीमेवम्व्याख्येति।

अत्र कञ्चिद्व्याख्याविशेषं वदामः - सुष्ठु शोभना, मा लक्ष्मीः, यस्यासौ सुमः। सुमस्य भावः सौम्यं शोभनलक्ष्मीकत्वं यस्यास्तीति स सौम्यः। अर्शआद्यच्।

अथवा एवं व्याख्या- सुधां सूते सोमः। सोमस्येयं सुधा सौमी। सौमीं सुधामर्हन्तीति सौम्याः। सौम्या वर्तन्ते यत्र स सौम्यः, तस्मै सौम्यायेत्यलमति व्याख्यानविस्तरेणेति।

ध्यानगम्याय- ध्यानेन ज्ञेयः। निर्विषयं मनो हि ध्यानविषयान्तरपरि त्यागेन तदेकप्रवणत्वं(भजते)। तदेव ध्यानम्। तादृशो विषय इति भावः।

ध्यायिने - ध्यानमस्यास्तीति ध्यायी। मत्वर्थीय इन्। अहर्निशं स्वध्याननिष्ठ इत्यर्थः।

ध्येयगम्याय- ध्येय एव गम्यो, ध्येयगम्यः। यदा ध्यानविषयतया ध्येयतामापद्यते, तदैव ज्ञातुं शक्यते, नान्यथेत्यर्थः। अथवा - ध्येयो हठयोगादिना पूर्वयोगिभिरीश्वर एवेति तस्मै। तस्यैव ध्यानं यस्यास्तीति। सदाशिवस्य तस्यैव ध्यानमस्ति तस्यैव ध्यानं करोतीति।

धाम्ने- तेजस इत्यर्थः। यद्वा- धीयतेऽस्मिन्निति धाम आश्रयः, तस्मै।

धामाधिपतये - न केवलं तेजोरूपः, किन्तु सूर्यप्रभृतितेजसां स्वामी। धाम्नां पतिः धामाधिपतिरिति विग्रहार्थः। "यस्य भासा सर्वमिदं विभाति"(मुं.उ. २.२.१०) इति श्रुतेः।

धराधराय - पृथ्वीधराय।

(६३०) **धर्म्याय** - धर्ममाचरति तच्छीलो वा. धर्म्यः। श्रेयस्साधनं च धर्मः।

धारणाभिरताय - धारणायामभिरतो धारणाभिरतः। धारणा हि चित्तस्य देशसम्बन्धः। देशा ह्यष्टादशमर्मस्थानरूपा इति।

धात्रे - कर्त्रे।

विधात्रे - विश्वसृजे। आश्रय एव।

सन्धात्रे - सन्धानकर्त्रे। अयमर्थः धात्रे कर्त्रे इति। विधात्रे इत्यत्रापि स एवार्थो व्यर्थः। द्व्यर्थस्य धातूपादानात्। निपातद्योतकत्वस्य वाक्यपदीये निर्णीतत्वात् । यद्वा - विशेषेण कर्तेति, यद्वा विश्वमनन्तादिरूपेण बिभर्तीति धाता कर्ता तस्मा इत्यर्थः। विधात्रे कर्मणां तत्फलानां कर्ता विधाता तस्मै। अनन्ताकारान् विशेषेण दधातीति विधाता, तस्मै विधात्रे इति विश्वधारणमात्र कर्मफलदातृतया च भेदः स्पष्ट एव।

धराय - धरतीति धरः। सर्वधारकायेत्यर्थः। यद्वा - धरा विद्यते यस्मिन् असौ धरः। मत्वर्थीयोऽच्प्रत्ययः।

दामोदराय - दाम उदरे यस्यासौ दामोदरः। क्वचिदवतारान्तरे मात्रा दाम्ना बद्ध इत्यर्थः। अत एवोक्तं कैश्चित् -

> यो नाम्ना मोचयेत् सर्वं स दाम्ना बध्यते कथम्।
> बलिबन्धविपाकोऽयं हरिणाऽप्युपभुज्यते।। इति।

यद्वा - उलूखलबद्धस्य दामबन्धनरज्जुरुदरे यस्य सः। यद्वा - परापेक्षया दामानि लोकनामानि यस्योदरान्ते ततो नाम्ना दामोदर इति।

दान्ताय - दमनशीलाय।

दानवान्तकराय च - दानवानां दुष्टानामन्तं नाशं करोतीति दानवान्तकरः। कृञो हेतुताच्छील्यानुलोम्येषु(पा०सू० ३।२।२०) इति टः दानवसमाधिसम्पादयितेत्यर्थः।

(**संसारवैद्याय** -) संसाररूपव्याधिनिरसनायायमेव वैद्य इत्यर्थः।

(६४०) **भेषजाय** - विनौषधं व्याधिनिवर्तकतया औषधरूप इति भावः।

सीरध्वजाय - सीरं लाङ्गलं ध्वजं यस्यासौ सीरध्वजः।

शीताय - शीतरूपाय।

वाताय - वायुरूपाय। वाति गच्छति भक्तार्थं वातः। हसिमृग्रिण्वा मिदमिलूपूधुर्विभ्यस्तन् (उ०सू० ३।८६) इति तन्प्रत्ययः।

अप्रमिताय- प्रमामितः प्रमितः। न प्रमितोऽप्रमितः। ज्ञानविषयो न भवतीत्यर्थः। स्वयं ज्ञानरूपत्वात्। तस्यैव तद्विषयत्वे कर्मकर्तृभावविरोध आपद्यते। न चैवं चेद् वृत्तिविषयत्वं ब्रह्मणो न स्यात्। मैवम्- नेदं चोद्यं नास्त्येव वृत्तिविषयता। तथा हि- उपहितस्य वा वृत्तिविषयता, अनुपहितस्य वा। आद्ये मुक्त्यभावः। द्वितीयेऽनुपपत्तिः। तथा हि - सर्वोपाधिविनिर्मुक्तत्वं हि स्वयञ्ज्योतिष्ट्वम्। एतद्वृत्तिविषयत्वे कथं सर्वोपाधिविनिर्मुक्तत्वम्। ब्रह्मापरोक्ष साक्षात्कार एव मोक्षः। तादृशस्य च साक्षात्काररूपापरोक्षवृत्ति विषयत्वेऽपि न सर्वोपाधिविनिर्मुक्तत्वक्षतिरिति चेन्मैवम्। सर्वोपाधि विनिर्मुक्तं ब्रह्म निरुपाधि ब्रह्मेत्याकारापरोक्षरूपां वृत्तिं विषयीकुर्वाणा कथं स्वविषयतयैव सोपाधिकता मापादयेत्। नासाक्षात्कारवृत्यविषयत्वे वा कथं मोक्ष इत्यपि। ततो वृत्ति विषयत्वे सोपाधिकता, वृत्त्यविषयत्वेऽनिर्मोक्षः, वृत्तिब्रह्मणोरङ्गीकारे सदद्वैत व्याकोपश्च। उच्यते - वृत्तेः स्फुरणेऽपि विषयत्वं नाङ्गीकुर्महे। सा च वृत्तिर्जडैव। स्वप्रकाशत्वे सदद्वैतव्याकोपो भवेदपि। ततः सत्वं वृत्तेर्नाबाधकम्।

किन्तु तद्विषयत्वमेव। वाङ्मयार्थरूपाय (?)।

सारस्वताय - सरांसि सन्त्यस्यां सा सरस्वनी पुण्यनदीमात्रम्, भावेऽत्यभिव्यक्तः सारस्वतस्तस्मै सारस्वताय। यद्वा - सरः प्रसरणमस्त्यस्याः सरस्वतीति। सरस्वत्या ध्येयतया प्रोक्तः सारस्वतस्तस्मै।

संसारनाशकाय - संसारच्छिदे।

अक्षमालिने-अक्षमाला विद्यते यस्यासावक्षमाली तस्मायाक्षमालिने।

असिचर्मधराय- असिः खड्गं, चर्म असिचर्मणी। तयोरसिचर्मणो धरः,तस्मै। अस्यते असिः। खनिकष्यज्यसिवसिवनिसनिध्यनिग्रन्थिचलिभ्यश्च (उ०४।११७) इति इः।

षट्कर्मनिरताय - षट् च तानि कर्माणि यजनयाजनाध्ययनाध्यापन दानप्रतिग्रहरूपाणि, तेषु नितरां रतः।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । (भ.गी.३.२१)

इति रीत्याऽन्येषां कर्मोपदेशकः ।

(६५०) **विकर्माय** - विरुद्धं विविधं वा कर्म यस्यासौ विकर्मः, तस्मै।

सुकर्माय- सुकर्म यस्यासौ सुकर्मः, तस्मै। रूपसिद्धिः(?) छान्दसत्वेन वा रूपसिद्धिः। विविधानां निरुद्धानां पितापुत्रयोर्निग्रहानुग्रहरूपाणां समाहारोऽस्येति। ... अनेन लोपश्च, वा स्त्रियाम् इति बहुलग्रहणाच्छान्दसी अस्त्रियामपि। यद्वा - तत्करोति तदाचष्टे इति णौ टिलोपेऽचि चाकारान्त तयेष्टसिद्धिः कार्या।

परकर्मविघातिने - परकर्मविघातं करोतीति परकर्मविघाती। कर्मणि हनः(पा.सू. ३।२।८६) इति णिनिः। प्रसिद्धानि परप्रेरितानि दुष्कर्माणि नाशयतीति भावः।

सुशर्मणे - शोभनं शर्म यस्य। शोभनं मङ्गलं नाम यस्येत्यर्थः। आतो

मनिन्क्वनिब्वनिपश्च(पा.सू. ३।२।७४), अन्येभ्योऽपि दृश्यते (पा.सू. ३।३।१३०)इति मनिप्। नेड्वशिकृति(पा.सू ७।२।८)इति इडभावः।

मन्मथाय - विषयिणां चेतस्याविर्भूतो मनोऽश्नाति वशीकरोतीति मन्मथः। पृषोदरादित्वात्साधुत्वम्। यद्वा- मननं मत् चेतना, मतो मथो मन्मथः। अनुदात्तोपदेशवनतीति(पा.सू. ६।४।३७) अनुनासिकलोपे तुक्। सुन्दराय। न केवलं नामैव सुन्दरम्, अपि तु स्वरूपमपीत्यर्थः।

वर्माय- वर्म कवचं कार्पासान्तर्गर्भितं शरीरावरणं, तद्वति अर्शआद्यच्। यः स्वयमेव वर्मेति।

वर्मिणे - लोहकञ्चुकं वर्म, तद्वते। व्रीह्यादित्वादिनिः। वर्म संरक्षकं कञ्चुकं, तद्वानिति यावत्।

करिचर्मवसनाय - गजचर्मवसानाय। गजचर्मवस्त्रायेत्यर्थः।

करालवदनाय - करालमुग्रं वदनं यस्यासौ करालवदनः, तस्मै करालवदनाय।

(६६०) **कवये**- कविः आद्यो वेदवक्ता। निःश्वसितमस्य वेदाः(भामती श्लो.२] इति श्रुतेः। कवयतीति कविः। ज्ञातृतोक्ता। यद्वा - कवते कविः। सर्वधातुभ्य इन्(द्र० उ० ४.१३८) इति।

पद्मगर्भाय - पद्मं गर्भे यस्य स पद्मगर्भः, तस्मै पद्मगर्भाय।

भूगर्भाय - भूः गर्भो यस्य, भुवो वा गर्भो भूगर्भस्तस्मै भूगर्भाय।

घृणानिधे - घृणा कृपा निधीयते अस्येति घृणानिधिः। उपसर्गे घोः किः (पा.सू. ३।३।९२), कर्मण्यधिकरणे च(पा.सू. ३।३।९३) इति किः।

ब्रह्मगर्भाय - ब्रह्म गर्भे यस्यासौ ब्रह्मगर्भः, तस्मै ब्रह्मगर्भाय।

गर्भाय - गर्भोऽस्यास्तीति। ब्रह्माण्डकटाहान्तर्गत इत्यर्थः।

धूर्जटे - धूर्जटा गङ्गाऽस्येति।

विश्वगर्भाय - विश्वं गर्भे यस्यासौ विश्वगर्भः, तस्मै विश्वगर्भाय।

श्रीगर्भाय - श्रीः गर्भे यस्य।

जितारये - जिता अरयो येनासौ जितारिः, तस्मै जितारये। जिताः पराभूताः। जि अभिभवे इत्यस्य रूपम्। यद्वा - जितोऽरिभिः जितारिः, तस्मै। जयप्रापिन इत्यर्थः। जि जये इत्यस्य रूपम्।

(६७०) **हिरण्यगर्भाय**- हिरण्यपादान्तवर्तित्वाद्विरिञ्चात्मना हिरण्यगर्भः। तथा च मन्त्रवर्णोऽपि- हिरण्यगर्भः समवर्तताग्रे(तै.सं. ४.१.८) इति। गिरति गीर्यते वा गर्भः। अर्तिगृभ्यां भन्(उ० ३।१५२) इत्यौणादिकप्रत्ययः।

हिरण्यकवचाय - हिरण्यं कवचं यस्येति विग्रहार्थः।

हिरण्यवर्णदेहाय - हिरण्यवर्णं देहं यस्यासौ हिरण्य(वर्ण)देहः।

(**हिरण्याक्षविनाशिने** -)हिरण्याक्षविनाशकर्त्रे।

हिरण्यकशिपोर्हन्त्रे -

(**हिरण्यनयनाय** -) हिरण्ये नयने यस्य, हिरण्यवन्नयने यस्य हिरण्यनयनः, तस्मै।

हिरण्यरेतसे- हिरण्यवद् रेतो यस्य स हिरण्यरेताः, तस्मै। यद्वा - हिरण्यमेव रेतो यस्य हिरण्यरेतास्तस्मै इति। अग्नेरपत्यं प्रथमं हिरण्यमिति हिरण्यवचनात्। हर्यते हिरण्यम्। हर्यतेः कन्यन् हिर् च(उ० ५।४४) इत्यौणादिकेन साधुत्वम्।

हिरण्यवदनाय - हिरण्यवदुज्ज्वलं वदनं यस्य तस्मै।

हिरण्यशृङ्गाय - हिरण्यः शृङ्गो यस्येति।

निस्सङ्गाय - निर्गतः सङ्गो यस्य यस्माद्वा। सङ्गरहितः इत्यर्थः।

(६८०) आत्यन्तिकसङ्गरहितत्वे कथमुपास्यत्वादीत्यत आह- **सङ्गिने** (सङ्गोऽ)स्यास्तीति। अधिकसङ्गयुक्त इत्यर्थः।

भैरवाय - भीरोरयं त्रासं करोतीति भैरवः, तस्मै। उग्राय।

ननूग्रवेषश्चेदस्यैव भयं स्यादत आह - **सुवेषाय**। सुष्ठु वेषो यस्य। रमणीयमूर्तिरित्यर्थः।

ननु (रमणीय)रूपत्वे वैरिघातिता न स्यादत आह, **भीषणाय** चित्तं दारयति दारुणः, भीषयते भीषणः, तस्मै। भयानकाय।

तदेव नामान्तरेणाह - **अन्त्रमालिने**। अन्त्राणां माला विद्यते यस्यासौ अन्त्रमालः, तस्मै। अमत्यस्मिन् अन्त्रः। अमिचिर्मिदिशसिभ्यः क्त्रः(उ० ४।१६३) इति प्रत्ययः।

चण्डाय - प्रचण्डाय उग्राय। चण्डते कुप्यति वैरिवर्ग इति चण्डः। यद्वा - ञमन्ताड्डः (उ० १.११४) इति चमेर्डप्रत्यये चण्ड इति रूपं निष्पद्यते।

(रुण्डमालाय -)रुण्डानां माला यस्य स रुण्डमालस्तस्मै। हतवैरिशिरोभिः शिरोव्यतिरिक्तशरीरैर्वा कृतमाल इत्यर्थः।

दण्डधराय - यमरूपाय। दाम्यन्तेऽनेनोद्धता इति दण्डः। ञमन्ताड्डः (उ० १.११४) इति डः। धरतीति धरः। दण्डस्य धरो दण्डधरः, तस्मै।

अखण्डतत्त्वरूपाय - अखण्डं यत्तत्त्वं सच्चिदानन्दस्वरूपं महा वाक्यादौ तत्त्वम्पदाभिधेयार्थपरित्यागेनाविरुद्धजहदजहल्लक्षणया गम्यमान चैतन्यांशरूपायेत्यर्थः।

कमण्डलुधराय - कमण्डलुधारी ब्रह्मा तद्रूपाय।

(६९०) **दण्डसिंहाय** - दण्डकर्ता सिंहस्तस्मै दण्डसिंहाय। **अचण्डसिंहायेति** वा पाठः। अचण्डश्चासौ सिंहश्च अचण्डसिंहः। अकोपनसिंह इत्यर्थः।

न केवलं सर्वान् प्रत्यकोपयुक्तः, किन्तु स्वभक्तान् प्रति साधुरेवेत्याह - **सत्यसिंहायेति**। सति साधुः सत्यः। तत्र भवः(पा.सू. ४.३.५३) इति यत्। सत्यश्चासौ सिंहश्च सत्यसिंहः। सिंचति सिंहः। सिचेः संज्ञायां हनुमौ

कश्च(उ.सू. ५.६२)इति रूपसिद्धिः। यद्वा - हिनस्ति सिंहः। साधून् प्रति प्रसन्नः, असाधून् प्रति कोपेन युक्तः। यद्वा - सत्यो मुख्य एव सिंहः। सिंहो देवदत्त इत्यादिको गौणः। नायं तथेति भावः, शब्दार्थाव्यभिचारित्वात्।

श्वेतसिंहाय - श्वेतः सिंहस्तस्मै। श्वयते श्वेतः।

पीतसिंहाय - पीतवर्णः सिंहस्तस्मै।

नीलसिंहाय - नीलवर्णः सिंहस्तस्मै।

सिंहाय - वैरिहिंसकतया (सिंहस्तस्मै सिंहाय)।

हारिद्रसिंहाय- हारिद्रश्चासौ सिंहस्तस्मै। हरिद्रायां(भवो)वा सिंहः।

(**धूम्रसिंहाय**-) धूम्रवर्णः सिंहस्तस्मै। यद्यपि सिंहो बाहुळ्येन गज-मृग-व्याघ्रादिवदेकवर्ण एव, तथापि तत्तत्कार्याय तत्र तत्र यथा रूपं धृतवान्। यथा स्वच्छस्फटिकवर्णो जपाकुसुमादितत्तदुपाधिभेदेन तथा व्यवह्रियते। सिंह एकदेशलक्षणया भामादिवन्नृसिंह एव, श्रीनृसिंहस्य सहस्त्रनामप्रस्तावात्।

मूलसिंहाय - मूलभूतः (सिंहस्तस्मै)। आदिसिंहायेत्यर्थः ।

(७००) **मूलाय** - मूलकारणाय। मूलं विद्यते यस्मिन्निति मूलः। मूलमूल कारणायेति वा। न च जगतोऽब्रह्मकारणतोचिता, सर्वदाऽ सत्त्वप्रसङ्गात्।

इति श्रीमन्महाराजाधिराजश्रीदलपतिराजविरचिते श्रीनृसिंहप्रसादे व्रतसारे श्रीनृसिंहसहस्त्रनामभाष्ये नाम्नां सप्तमं शतं समाप्तम्।

अष्टमशतकम्

बृहत्सिंहाय- व्यापकाय। बृहति बर्हति वा बृहत्। वर्तमाने पृषद्बृह न्महज्जगच्छतृवच्च(उ.सू. २.८४)इति साधुता। स सिंहो बृहत्सिंहस्तस्मै।

पातालस्थितसिंहाय- पातालस्थितः सिंहः। यद्वा- पाताले गजा

आसन्, तदा तन्निबर्हणं सिंहेन विना (न) भवतीति पातालगजकेसरि रूपतयाऽवतीर्ण इत्यर्थः।

पर्वतवासिने - पर्वते वसतीति पर्वतवासी, तस्मै पर्वतवासिने -पर्वमरुद्भ्याम्(वा० ५.२.१२२) इति पर्वतरूपसिद्धिः।

जलस्थसिंहाय - जले तिष्ठतीति जलस्थः। सुपि स्थः(पा.सू. ३.२.४) इति कप्रत्ययः। स चासौ सिंहश्चेति, तस्मै।

अन्तरिक्षस्थिताय - अन्तरिक्षे स्थितोऽन्तरिक्षस्थितस्तस्मै।

कालाग्निरुद्रसिंहाय- कालाग्निरुद्र एव सिंहः कालाग्निरुद्रसिंहः,तस्मै।

चण्डसिंहाय - चण्डः प्रचण्डः इत्युग्रः सिंहस्तस्मै। चण्डते चण्डः स चासौ सिंहश्चेति।

अनन्तसिंहसिंहाय - अनन्तेषु सिंहेषु सिंहः, यथा अनेकपुरुषेष् त्रणी(वीरो) व्याघ्रः तथा सिंहेष्वप्ययं सिंह इत्युच्यते। न विद्यतेऽन्तो देशकाल देना परिच्छेदो यस्य सोऽनन्तः। अनन्ताश्च ते सिंहाश्च अनन्तसिंहाः। तथ सिंहो हिंसकः। यद्वा - अनन्तश्चासौ सिंहसिंहश्च अनन्त(सिंह)सिंहः, (तस्मै) अनन्त(सिंह)सिंहाय।

अनन्तगतये - अनन्ता गतिर्यस्यासौ अनन्तगतिः। अप्रतिहत गतिरित्यर्थः।

(७१०) **विचित्रसिंहाय**- विचित्रः सिंहो विचित्रसिंहः। विचित्रत्वं नराङ्गत्वात्। अथवा - पितापुत्रयोर्मध्ये पुत्रेऽनुग्रहः, पितरि निग्रह इति वैचित्री। चिञ् चयने अस्मात्, अमिचिमिदिशसिभ्यः क्त्रः (उ० ४.१६३) इति (क्त्र)प्रत्ययः। यद्वा - चेतति जानाति भक्तानां कार्यकार्य इति विचित्रम्। सर्वधातुभ्यष्ट्रन्(उ० ४.१५८) इत्यौणादिकः प्रत्ययः। क्वचित् **विरामसिंहायेति** पाठः। विशेषेण रमयति क्रीडयति प्राणिन इति विरामः। स च सिंहः विरामसिंहः। न केवलं

हिंस्रतयाऽत्युग्रो भवति , किन्तु भक्तान् प्रति अभिरम्य इत्यर्थः।

बहुसिंहस्वरूपिणे- बहूनां सिंहानां स्वरूपं निष्पत्तिर्यस्मात्। यद्वा - बहुसिंहस्वरूपं क्रियते यस्य स तथा। योऽचि (पा.सू. ७.२.८९)। स्वयमेकोऽपि बहुकार्यकरतयाऽनेकस्वरूपः। यद्वा- बहूनां सिंहानां स्वरूपं बलपराक्रमादिर्यस्य स तस्मै।

अभयङ्करसिंहाय- अभयङ्करश्चासौ सिंहश्च अभयङ्करसिंहः। यद्वा- हिनस्तीति सिंहः। सिंहोऽप्यभयङ्करः, भक्तकार्यायैवाभिव्यक्तत्वात्। मेघर्तिभयेषु कृञः(पा.सू. ३.२.४३), भयादौ चेति खच्। भयादौ चेत्यादिग्रहण सामर्थ्यात्तदन्तविधिरवगम्यत इत्यर्थः। ततश्चेष्टसिद्धिः।

नारसिंहाय - नरश्चासौ सिंहश्च नरसिंहः, (नरसिंह) एव सः, (नारसिंहस्तस्मै)। स्वार्थेऽण्।

सिंहराजाय - सिंहानां राजा सिंहराजः। राजाहःसखिभ्यष्टच् (पा.सू. ५.४.९१) इति समासान्तः।

सप्ताब्धिमेखलायैव- सप्त(अब्धयः) समुद्राः मेखला यस्येति विग्रहः। सप्त च तेऽब्धयश्च सप्ताब्धयः, ते मेखला परिखा यस्य। यद्वा- तेषां मेखला। मेखलेव मेखला मर्यादेत्यर्थः। सपति सप्तः, सप्यशूभ्यां तुट् च (उ० १.१५९) सप्तेत्यस्य साधुत्वम्। आपः धीयन्ते अस्मिन्नित्यब्धिः। उपसर्गे घोः किः(पा. सू. ३.३.९२), कर्मण्यधिकरणे च (पा.सू. ३.३.९३) इति किः।

सप्तसामस्वरूपिणे - सप्त सामानि स्वरूपं यस्य। पापं स्यति साम। यद्वा - सनोति स्वरान् सामः। तथा - वेदानां सामवेदोऽस्मि(भ.गी. १०.२२), सामरूपो महाविष्णुः इति वचनात्।

सप्तलोकान्तरस्थाय - सप्त च ते लोकाश्च सप्तलोकाः, तेषां यदन्तरं तत्र तिष्ठति, सर्वान्तर्यामीत्यर्थः। यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक..20466

यं पृथिवी न वेद यस्य पृथिवी शरीरम्(बृ०उ० ३.७.२) इत्याम्नातः।

सप्तस्वरमयाय - निषादादिसप्तस्वरप्रचुरायेति।

(७२०) **सप्तार्चीरूपदंष्ट्राय** - सप्त च ता अर्चयश्च, सप्तार्चिः। अर्चयं ज्वालाः। तद्रूपी दंष्ट्रा यस्य सः। ढ्रलोपे पूर्वस्य दीर्घोऽणः(पा.सू. ६.३.१११) इति दीर्घः।

सप्ताश्वरथरूपिणे- सप्ताश्वा यस्य सप्ताश्वः(स चासौ) रथः यद्यप्यन्यपदार्थप्राधान्याद् बहुव्रीहे(रन्त)र्वर्तिपदार्थस्य न प्राधान्यं, तथाऽपि "यजमानपञ्चमा ऋत्विज" इतिवदुपपत्तिः। धवखदिराविति तल्लक्ष्य विशेषोपस्थितये रथशब्दप्रयोगः। पुरुषस्यापि सप्ताश्वत्वसम्भवात्। न श्वसन्तीत्यश्वाः। यद्वा- अश्नुतेऽध्वानमश्वाः। अशूप्रुषिलटिकणिखटिविशिभ्य क्वन्(उ.सू. १.१५२) इति क्वन्। सप्त अश्वा यस्य सप्ताश्वः। अन्यपदार्थ रथः। तत्र रथशब्दोपादानं व्यर्थम्, बहुव्रीहिणैव तल्लाभात्। अयमर्थः - सप्त अश्वा यस्य स सप्ताश्वः। अन्यपादार्थो रथः। सप्ताश्वो रथो यस्यासौ सप्ताश्वरथः सूर्यः। स स्वरूपं यस्येति। अनेन नाम्ना सूर्यस्य तद्रूपता स्पष्टीकृता।

सप्तवायुस्वरूपाय - सप्त च ते वायवश्च प्राणादयः पञ्च देवदत्तधनञ्जयौ द्वौ। अनेन वायूनामपि कार्यक्षमतैतत्स्वरूपतयैवोक्ता।

सप्तच्छन्दोमयाय च - छन्दःप्रचुरायेति वेदरूपतोक्ता।

स्वच्छाय - निर्मलाय। अभिव्यक्तचैतन्यरूपत्वात्स्वच्छता। अथवा - स्वच्छाय स्वप्रकाशाय।

कथमसौ ज्ञेय इत्याह - **स्वच्छरूपाय**।

स्वच्छन्दाय - अपराधीनाय।

श्रीवत्साय - श्रीवत्सो विष्णवे लाञ्छिततया यस्मिन् स तस्मै।

श्रीवत्सलाञ्छनाय। श्रीवत्सं विद्यते यस्य। मत्वर्थीयोऽच्।

सुवेषाय - सुष्ठु वेषो यस्यासौ सुवेषस्तस्मै।

श्रुतये - शब्दरूपाय वेदाय वा। श्रूयते श्रुतिः। श्रुतिप्रतिपाद्यो वा श्रुतितयाऽभिधीयते। यद्यप्यशब्दं ब्रह्म तथाऽपि वाच्यवाचकयोः शब्दब्रह्म विवर्ततया श्रुतिरूपता। तदुक्तमिष्टसिद्धिकारैस्तृतीयेऽध्याये -

शब्दब्रह्मविवर्तत्वाद् वाच्यवाचकयोर्भवेत्।

ब्रह्मत्वमिति चेन्नैवमशब्दं ब्रह्म हि श्रुतम्।। इति।

श्रुतिरूपत्वमुपनिषद्भागरूपत्वमपि वस्तुतोऽनुपपन्नम्, श्रुतेर्जडत्वात्। अन्यथा सदसदद्वैतव्याकोप प्रसक्तेः।

(७३०) **श्रुतिमौलये** - श्रुतेर्मौलिः श्रुतिमौलिः। वेदान्तप्रतिपाद्य इत्यर्थः, श्रुतिशिरोरूपत्वात्।

शुचिश्रवाय - शुचिभिः श्रूयत इति शुचिश्रवः। पवित्राणां पवित्रम्(द्र० वि.स. श्लो० १०) इत्यर्थः।

शूराय - पराक्रमशीलतया दैत्यहन्तृत्वात्।

(सुभगाय-) सुष्ठु भग ऐश्वर्यं ज्ञानादि यस्य सः। ऐश्वर्यस्य शोभनता अपराधीनता, ब्रह्मेन्द्राद्यैश्वर्यस्य तदधीनत्वादिति भावः। भावप्रधानो वाऽयं निर्देशः।

सुधन्वने - शोभनं धनुर्यस्य गुधन्वा, तस्मै सुधन्वने। धनुषः शोभनता तन्मुक्तमार्गणस्यामोघता। क्वचित्**सुधन्विने** इति पाठः। तत्र व्रीह्यादित्वादिनिः। समासेनैव मत्वर्थलाभे पुनर्मत्वर्थीयः कथञ्चित् नातिप्रयत्निनामिति राणकग्रन्थवद् व्याख्येयः।

शुभ्राय - शोभते शुभ्रः। शुद्धसत्वोपाधिकतया शुभ्रता। कृष्णादिव्यपदेशस्तु युगावतारतया वा। यौगिकतयाऽपि रूढित्वेनापि

तमालश्यामले यशोदानन्दने परे ब्रह्मणि युंज्यते। सा च रुक्मिणीविलोकनेन कटाक्षाणां नीलत्वात्। हासस्य शुभ्रत्वात् पाण्डुरङ्गे विपर्ययः। श्रीकृष्णे श्रीकृष्णस्वरूपे पाण्डुरङ्गव्यपदेशो हास्यहेतुः। तदुक्तं रामचन्द्राचार्यैः वैष्णवसिद्धान्तदीपिकायाम् -

मम शितनयनान्तैः श्यामलीभूतमूर्ते-
रभवदिदमपार्थं पाण्डुरङ्गत्वमस्य।
दयितमिति हसन्त्याः सिन्धुसूनोः स्मितांशु-
व्यतिकरक्रतनामेवावताद्विट्ठलो वः।।

हरिहरावतारस्य पाण्डुरङ्गता। तदुक्तम(न)न्ताचार्यैः -

जटारूपानेकालकततिभिरापाण्डुरतया
ललाटे नेत्रेण प्रकटयति यः स्वस्य हरताम् ।
हरीशानादेतानृतविवदमानान्प्रतिहरान्
कुलाधीशं वन्दे तमिममनिशं विट्ठलविभुम्।।

सुरनाथाय - सुराणां नाथः सुरनाथः। अथवा - सुरैरापत्काले नाथ्यत इति सुरनाथस्तस्मै। शोभनं भक्ताभीष्टं फलं रातीति सुरः।

सुप्रभाय - सुष्ठु प्रभा यस्य, शोभना शुभ्रा प्रभा यस्यासौ सुप्रभः, तस्मै।

शुभाय - मङ्गलमूर्तय इत्यर्थः।

सुदर्शनाय - शोभनं दर्शनं यस्यासौ सुदर्शनः। सुदर्शन इत्यत्र नन्द्यादित्वाल्ल्युः। युवोरनाकौ(पा.सू.७.१.१) इत्यनः। सुदर्शनस्तु पुंस्येव। तथा च माघे महाकविप्रयोगः - बन्धुरत्र जगतां सुदर्शनः। शाशियुधिदृशि धृषिमुषिभ्यो युच् वाच्य(वा० ३.३.१३०) इति वक्तव्याद्युच्।

(७४०)**सूक्ष्माय** - अणवे। अणोरणीयान्महतो महीयान्(म.ना.उ.)इति श्रुतेः।

सुष्ठु उक्ष्यते सूक्ष्म इति।

ननु सूक्ष्मश्चेत् सर्वथाऽव्यक्ततयाऽध्येयादिः स्यादित्यत आह- **निरुक्तायेति**। निर्वचनयोग्यायेत्यर्थः। यथा पिकः कोकिलः, तद्वत्। किमिदम्। इदमपि ब्रह्मैवेति सर्वव्याख्यानरूपतया सर्वात्मकता स्यात्।

सुप्रभाय - शोभना प्रभा यस्यासौ सुप्रभः। मत्वर्थीयोऽच्।

स्वभावाय- प्रकृतिरूपायेत्यर्थः। प्रकृतेः स्वभावरूपत्वात्। यद्वा - स्वभावयति प्रापयतीति स्वभावः। अथवा- स्वस्मै भाव्यते प्राप्यते इति स्वभावः। यद्वा- शोभनः विष्णौ भावः नियतत्वं यस्मादसौ स्वभावः, तस्मै स्वभावाय।

भवाय - भवत्यस्माद्विश्वमिति भवः। यद्वा- भावयतीति भवः स्रष्टा। अथवा - भवतीति भवः। अथवा - भवते प्राप्नोतीति भवः। भू प्राप्तावात्मनेपदी वेति। सर्वग इत्यर्थः। यद्वा - सदा सर्वत्र भवति भावयति वा सर्वमिदमिति भवः। भुवश्च वाच्य इति वक्तव्याद्रूपसिद्धिः। तस्मै भवाय।

विभवाय - विगतो भवः संसारो यस्मादसौ विभवः। संसारनाशक इत्यर्थः। तदुक्तम् -

भ्रमांशस्य तिरस्कारादधिष्ठानप्रभानता।
यदा तदा चिदात्माऽहमसङ्गोऽस्मीति बुध्यते।।
अधिष्ठानांशसंयुक्तं भ्रमांशमवलम्बते।
यदा तदाऽहं संसारीत्येवं जीवोऽभिमन्यते।। इति।

तस्मै विभवाय।

सुशाखाय- सु शोभना ब्रह्मादयः शाखोपशाखा यस्य स तस्मै।

विशाखाय- विविधा विरुद्धा वा मनुष्यतिर्यगादयः शाखा यस्येति। अथवा- विशाखासु जातोऽभिव्यक्तः विशाखः, तस्मै।

सुमुखाय - शोभनं मुखं यस्यासौ सुमुखः। मुखस्य शोभनता पञ्चास्यता । यद्वा - यज्ञभोक्तृतया शोभनमुखता।

केवलं यज्ञभोक्ताऽपि न, यज्ञोऽपि स एवेत्याह - **मखाय**। क्वचि **न्मुखायेति** पाठः। सोऽपपाठ एव। मखो यज्ञः। क्वचित् **सुमखायेति** पाठः शोभना मखा यस्यासौ सुमखः, तस्मै। यद्वा - मत्वर्थीयाच्प्रत्ययान्ततया स एव व्याख्येयः।

(७५०)**सुनखाय** - शोभनानि नखानि नखा वा यस्यासौ सुनखः। नह्यतं नखः। नहेः खप्रत्ययः। नखानां शोभनता शत्रुवक्षोविदारकता।

सुदंष्ट्राय - शोभना दंष्ट्रा यस्य स तस्मै। मत्वर्थीयोऽच्।

सुरथाय - शोभनो रथो यस्यासौ सुरथः। रमेः थप्रत्ययः रमन्तेऽस्मिन्निति रथः।(तस्मै) सुरथाय।

सुधाय - सुधा विद्यते यस्यासौ, तस्मै सुधाय।

साङ्ख्याय - सङ्ख्यायतेऽसौ साङ्ख्यः। साङ्ख्यस्वरूपाय। यद्वा शास्त्रप्रणेताऽऽचार्यः।

सुरमुख्याय - शोभनं फलं भक्तेभ्यो राति ददातीति सुरः, तेषु मुख्य सुरमुख्यः । भक्ताभीष्टफलदातृष्वयं मुख्य इत्यर्थः। यद्वा - सुरन्ति ईशते सुराः तेषु मुख्यः। सुरमुख्यसमर्थेष्विन्द्रादिष्वयमेव मुख्य इत्यर्थः। सर्वसामर्थ्याना मेतदधीनत्वा(दिति) भावः।

प्रख्याताय - प्रकर्षेण ख्यातः। न ध्याख्यापॄमूर्छिमदाम्(पा.सू. ८.२.५७) इति नत्वाभावः।

प्रभाय - अन्येभ्यः प्रकृष्टा भा दीप्तिर्यस्येति प्रभः, तस्मै। अर्शआदिभ्योऽच् (पा.सू. ५.२.१२७)।

नमः **खट्वाङ्गहस्ताय** - खट्वाङ्गं हस्ते यस्य सः, तस्मै।

खेटमुद्गरपाणये - खेटश्च मुद्गरश्च खेटमुद्गरौ, तौ पाणौ यस्य स तस्मै।

(७६०)**खगेन्द्राय** -

मृगेन्द्राय - मृगास्यतया मृगेन्द्रः।

(**नागेन्द्राय**-) नागानामिन्द्रो नागेन्द्रः। न गच्छतीति नगः, नग एव नागः। यद्वा - न गच्छतीत्यगः, न अगः नागः। अथवा - नागाः सर्पाः, तेषामिन्द्रः नागेन्द्रः।

दृढाय - स्थूलाय। इतरापेक्षया बलवते। दृढः स्थूलबलयोः (पा.सू. ७.२.२०) इति निपातः। अयमर्थः - बृहि वृद्धावित्येतस्माद्धातोः क्तप्रत्यये इडभावः, हकारबकारयोर्लोपः, परस्य ढत्वंच निपात्यत इति हलोपनिपातने पूर्वत्रासिद्धनिवृत्त्यर्थम्। अन्यथा परस्य ढत्वे कृते हस्य, हो ढः(पा.सू. ८.२.३१) इति ढत्वे, ढो ढेलोप इति लोपः स्यादेव। तच्चानिष्टं स्यात्। अयमाशयः - ढलोपे हि कृते इढिसेत्यादौ तस्य पूर्वत्रासिद्धन्यायेन सिद्धत्वात्, अतोर्हलादेर्लघोः(पा.सू.७.२.७) इति रपरत्वं न स्यात्। इह च परिवृढस्यापत्यं परिवृढी कन्येत्यादौ गुरूपधोत्तमलक्षणः शङ्स्यात्। अतः सूक्तं पूर्वत्रासिद्धन्याय निवृत्त्यर्थमिति। तस्माद्दृढायेत्यस्य बलवत इत्यर्थः। प्राणसामर्थ्यञ्च बलम्। ननु प्राणसामर्थ्यञ्चेद्बलं,

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।(भ०गी० ६.३४)

इत्यत्र मनसि दृढशब्दप्रयोगः। न हि तत्र प्राणसामर्थ्यरूपबलसम्भवः। इदञ्च गीतावाक्यं(६.३४) शङ्कराचार्यैः कथं व्याख्यातम्। इदानीन्तनाश्च कथं व्याचक्षत इति त एव प्रष्टव्याः। द्रष्टव्यं च भाष्यं च दामा? दृढशक्तिमत इत्यर्थः। बलशब्देन शक्तेरुपलक्षणात्। शक्तिस्तु द्रव्यस्वभाव एव। मनसो द्रव्यत्वं, पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि, इति वैशेषिकप्रक्रियायां

प्रसिद्धमेव। स्वबीजाक्षेपेऽत्यर्थोऽयं दृढशब्दः। यथा दृढं शान्तोऽस्मीति दृढमत्यर्थमिति यावत्। तदुक्तम्-

प्रगाढमतिकृच्छ्रं (स्यात्) प्रगाढं बलवद्दृढम् ।
अत्यर्थेऽपि दृढं तद्वत्...।। इति।

तदास्तां तावदप्रकृतम्। प्रकृतमनुवर्तामहे -

नागकेयूरहाराय - नागश्च, केयूरश्च .हारश्च, केयूरहारौ यस्येति कर्मधारयगर्भो बहुव्रीहिः। तस्मै नागकेयूरहाराय।

नागेन्द्राय-नागानां गजानामिन्द्रो नागेन्द्रः। हिंसकतया नागेन्द्रत्वम्।

अघमर्दिने - अघं दैत्यं मर्दितवानिति अघमर्दी, तस्मै अघमर्दिने।

नदीवासाय- नद्यां वसतीति नदीवासः। अथवा - वसनं वासः, नदीवासो यस्यासौ नदीवासः, तस्मै।

नग्नाय - वस्त्ररहिताय। दिगम्बरायेत्यर्थः।

(७७०)**नगेश्वराय**- नगानामीश्वरः। पर्वतराडित्यर्थः। अग्निना दह्यते नगः। दहेर्हलोपो दश्च नो यत् (द्र. उ.सू. ५.६१) इति दकारस्य नकारे हलोपे च गकारप्रत्यये च नग इति रूपसिद्धिः। यद्वा - न गच्छतीति नगः। नगोऽप्राणिष्वन्यतरस्याम् (पा.सू. ६.३.७७) इति नञ्। प्रकृत्या नगाय। नग एव नागः, वृत्तानुरोधात्। पर्वतरूपायेत्यर्थः। पर्वतराट् पर्वतोऽपीति यथाश्रुतव्याख्यायां पौनरुक्त्यं स्यात्। अथवा- नागाय सर्पायेति मदुक्तेर्न पुनरुक्तता।

नमिताय - नमस्कृताय।

नराय - मनुष्यरूपाय।

नागान्तकरथाय - नागानामन्तकः गरुडः, स एव रथो यस्यासौ नागान्तकरथः, तस्मै। गरुडवाहनायेत्यर्थः।

नरनारायणाय - नरस्स नारायणस्तस्मै।

मत्स्यस्वरूपाय - उदकेन माद्यति मत्स्यः।

(कच्छपाय)- कूर्मरूपाय। कूर्मः। कुरति कूर्मः।

वराहाय - वराहरूपाय। वरमाहन्ति वराहः।

नृसिंहाय।

(७८०)**विक्रमाक्रान्तलोकाये**ति वामनविशेषणम् ।

वामनाय - ह्रस्वाय। ह्रस्वदेहतया वामनतेति भावः। बलिं वामनरूपेण याचितवानिति वामनः। अथवा - बलिराजे गीर्णं राज्यं वमितवानिति वामन इत्यभिधीयते। यद्वा - जितवानिति वा, स्वातन्त्र्येण तस्यावतारत्वाभावात्। विक्रमेण पराक्रमेणाक्रान्तास्त्रयो लोका येन स तथोक्तः। वामनश्चेत्कथं विक्रमाक्रान्तलोकः। अत आह-

महौजसे - महदोजः सामर्थ्यं यस्य स महौजाः, तस्मै।

भार्गवरामाय - परशुरामाय।

रावणान्तकराय - रावणस्यान्तं करोतीति रावणान्तकरः, तस्मै दाशरथये।

बलरामाय - बलभद्राय।

तद्विशेषणं **कंसप्रध्वंसकारिणे** - कंसस्य प्रकर्षेण ध्वंसं करोतीति रामः कृष्णः।

बुद्धाय- बुध्यतीति बुद्धः। मतिबुद्धिपूजार्थेभ्यश्च(पा.सू. ३.२.१८८) इति वर्तमाने क्तः। बुद्धो ज्ञानवानिति यावत्।

कल्किने - कल्कोऽस्यास्तीति कल्की, तस्मै। माया दम्भः छलं वा कल्कः। कल्कः पापाशये पापे दम्भेऽविद्यासमूहके इति वचनात्। तस्मै कल्किने।

(७९०) **आत्रेयाय** - अत्रेरयमात्रेयः। अत्तीत्यत्रिः। अदेस्त्रिनिश्च(उ.सू. ४.६९, इत्यत्रिः।

अग्निनेत्राय - अग्नयस्त्रयः। त्रयो नेत्रा यस्य सः। अथवा - अग्निवद्देदीप्यमाना नेत्रा यस्येति विग्रहः। अयमाशयः - अङ्गति यातीत्यग्निः ते त्रयो गार्हपत्यादयः। त एव नेत्रा यस्येति। इतरेन्द्रियात् शीघ्रमूर्ध्वगं त्विन्द्रियं नेत्र इत्युच्यते। अग्निरपि तथैवेत्यूर्ध्वगत्या सर्वप्रापकत्वाच्च नेत्र इत्युच्यते इति। ननु सोमसूर्याग्निनेत्रताऽभिहिताऽस्य। अत्राप्यभिहितेति इदं वा तेन तद्वाऽनेन पुनरुक्तं स्यादिति चेन्मैवम्। क्वचित् कल्पान्तेऽग्निनेत्रतैवाभिहिता क्वचिदिदमपि। इदं तद्वा न पुनरुक्तम्, तत्पुरुषसमासाश्रयणात्। तथा हि - अङ्गति हविःप्रष्ठान्ते स्वर्गमूर्ध्वञ्च गच्छति नेतुमित्यग्निः। अगेनिर्नलोपश्च (उ.सू.) इति निप्रत्ययेऽग्निरूप निष्पत्तिः। अग्नेर्नेत्रोऽग्निनेत्रः। यथा सुलोचन पुरुषः यत्किंचिद् वस्तु यत्र क्वापि नयति यथाऽग्निरिति अनेनैव नेत्रेण नियामकेन अनेनैव नेत्रेण चक्षुषाऽसुरान् प्रतार्य भक्तैर्दत्तं हविःप्रभृतीन्द्रादिभ्यो नयति। तैजसं चक्षुः स्वतेजसा यथा वस्तु प्रापयति, एवं श्रीसर्वोत्तमोऽग्निः स्वसामर्थ्येनैवा ग्निद्वाराऽऽपाततो ब्रह्मेन्द्रादिभ्यो भक्तदत्तं किमपि स्वसामर्थ्येन तद्द्वारेष्टफलदानाय स्वयमेव गृह्णातीत्यर्थः।

कपिलाय। उपनेयवर्णरूपतां दर्शयति- **द्विजाय**। द्विर्जायत इति द्विजः द्वितीयं सावित्रं जन्म, प्रथमं मातुः।

क्षत्राय - क्षत्रियवर्णाय।

पशुपालाय- पश्यति पशुः, अर्जिदृशिकम्यमिपशिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च(उ० १.२८) इति कुप्रत्ययः। वैश्यवर्णाय।

सर्वरूपस्यापि सिंहास्यतामाह - **पशुवक्त्राय**। पशुः सिंहः। सिंहवदन इत्यर्थः।

अथाश्रमरूपितामाह - **गृहस्थाय** गृहस्थाश्रमिणे। गृहे तिष्ठतीति गृहस्थः।

(**वनस्थाय** -) वने तिष्ठतीति वनस्थः इति। सुपिस्थः(पा.सू. ३.२.४) इति तिष्ठतेः सुप्यवदेके आतो लोपे रूपम्। (तस्मै) वनस्थाय। वन्यते सेव्यत इति वनम्। मुनिभिरिति विशेषः।

वृक्षबहुलं स्थानं यजते यतिः।(तस्मै) **यतये**।

(८००) **ब्रह्मचारिणे** पूर्वमेव व्याख्यातम्।

इति श्रीमन्महाराजाधिराजश्रीदलपतिविरचिते श्रीनृसिंहप्रसादे व्रतसारे श्रीनृसिंहसहस्रनामभाष्येऽष्टमं शतं सम्पूर्णम् ।

नवमशतकम्

स्वर्गापवर्गदात्रे च - स्वर्गश्चापवर्गश्च स्वर्गापवर्गौ, (तौ) ददातीति स्वर्गापवर्गदाता। अनवच्छिन्नं सुखं स्वर्गः। भावेभ्योऽपवर्जनम् अपवर्गः। तस्मै स्वर्गापवर्गदात्रे।

न केवलं दाता, अपि तु भोक्तेत्यादिनाऽऽह - **(तद्भोक्त्रे)**। तयोर्भोक्ता तद्भोक्ता, तस्मै। अनेन सिद्धत्वं समसूचि। दाताऽभोक्ता अयाचकः इति हि सिद्धलक्षणम्।

मुमुक्षवे- मोक्षमिच्छतीति मुमुक्षुः। स्वभक्तानां मोक्षमिच्छतीति भावः। मोक्ष आविद्यकेभ्यः पाशेभ्य आत्मनः पृथग्भावः। स चाविद्यास्तमयाख्योऽग्रे विशदयिष्यते वादः।

शालग्रामनिवासाय। शालग्रामे निवासोऽस्य। अथवा- शालग्रामे निरन्तरं वसतीति, तस्मै।

क्षीराब्धिनिलयाय- क्षीराब्धौ निलयो यस्य सः। अथवा - क्षीराब्धिरेव निलयो गृहं यस्य सः। क्वचित् **क्षीराब्धिशयनाय** चेति पाठः। तत्र क्षीराब्धौ शयनं निद्रा यस्य सः। अथवा - क्षीराब्धौ शेते इति क्षीराब्धिशयन इत्यर्थः।

श्रीशैलाद्रिनिवासाय - श्रीशैलाद्रौ पर्वते निवासो यस्य। निवसतीति (नि)वासः। तस्मै।

शिलावासाय - पूर्ववत्।

योगिहृत्पद्मवासाय - योगिनां हृदयकमलवासी, तस्मै।

महाहंसाय - परमहंसायेत्यर्थः। हन्त्यध्वानं हंसः। हन्ति गच्छति। वृतृवदिहनिकमिकषिभ्यः सः(उ० ३.६२) इति सप्रत्ययः। महांश्चासौ हंसश्च। आन्महतः (पा.सू. ६.३.४६) इत्याकारान्तादेशः। महति महयति वा महत्। वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च(उ० २.८४) इति साधुता। पूर्वदेहसंग्रहाय स हंस आत्मोच्यते। अन्यथा हानादुत्तरदेहसंग्रहाच्च हंस आत्मोच्यते। अन्यथा व्यापकत्वस्यासम्भवः स्यात्।

(८१०) **गुह्यावासाय** - गुह्ये रहस्ये वाराणसीरूपे ब्रह्मवक्त्रस्थाने आवासो यस्येति। अथ(वा) - गुह्ये रहस्ये लिङ्गदेहे तथाऽऽसतीति। वाराणसीस्थानं चोत्तरमीमांसायां(ब्र.सू. १.२.३०-३२) भगवता व्यासेन "अनुस्मृतेर्बादरिः, सम्पत्तेरिति जैमिनिः..., आमनन्ति चैनमस्मिन्" इत्यत्र निरूपितम्। अनन्ताचार्यैस्तु ज्ञानकाण्डे, ततो ज्ञेयम्। **गुहावासाये**ति क्वचित्पाठः। गुहायां वासो यस्येति गुहावासः। गुहेः सत्रषिदादिभ्योऽङ्।

न केवलं गुहावासः, किन्तु स्वयमेव गुह्य इत्याह - **गुह्याय**। गोप्यायेत्यर्थः । शंसिदुहिगुहिभ्यः(काशिका) इति क्यप् इत्याह।

गुप्तायेति - गुपेर्निष्ठायां सर्वमप्यदृष्टम्। क्तः।

गुप्तश्चेदत्यन्तमदृश्यतया इन्द्रोऽयमेव स्यात्। अत आह - **गुरवे**।

गृणात्युपदिशतीति गुरुः। कृग्रोरुच्च(उ० १।२४) इति कुप्रत्ययः। ब्रह्मात्मोप देशक इत्यर्थः। गुप्तस्यात्मनोऽभिव्यक्तिं स एव करोतीति भावः।

मूलादिवासाय- मूलमाधारचक्रं, तदादिर्येषां स्वाधिष्ठानादिचक्राणां तन्मूलादि, तत्र वसतीति पूर्वोक्तदशचक्रवर्तीत्यर्थः। मूलादिवासाय मूले आधारचक्रे अधिवासो यस्य। आधारकन्दत्र्यङ्गुलस्योपास्यमन्त्रवर्ण सङ्ख्यया वेष्टयित्वा स्थितकुण्डलिनीरूपप्रकृतिरूप इत्यर्थः।

पीतवस्त्राय- पीतं वस्त्रं यस्यासौ पीतवस्त्रः, तस्मै। पीताम्बरधरायेति।

शस्तायेति - शस्तः प्रशस्तः। अथवा- **शस्त्रायेति** पाठः। शस्यतेनेनेति शस्त्रम्। शस्त्रं वर्तते यस्य स शस्त्रः, शस्त्रवान्। यद्वा - स्वयमेव सः, आहत्य वैरिप्राणवियोगापादकहिंसाकरत्वात्।

रक्तवस्त्रधराय -

रक्तमालाविभूषाय - (रत्नमाला) भूषायां यस्य स तस्मै।

(८२०) **रक्तंगन्धानुलेपिने** -

धुरन्धराय - धरते धरः, धुरं धरति सः अग्रगण्य इत्यर्थः।

धूर्ताय - धूर्वति धूर्तः। हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्(उ० ३।८६) इत्यौणादिकस्तन्प्रत्ययः।

दुर्धामाय - दुःखेन सोढुं धाम यस्य स दुर्धामः, तस्मै। अप्रसह्य तेजस्कायेत्यर्थः।

धनाय - मत्वर्थीयोऽच्प्रत्ययान्तः।

दुर्मदाय - दुःखेन सोढुमशक्यो मदो यस्य।

दुरन्ताय - दुःखेन प्राप्तुमशक्योऽन्तः पारो यस्य सः। अज्ञाताज्ञेयपार इत्यर्थः।

दुर्धराय - दुःखेन धारयितुमशक्य इत्यर्थः।

दुर्निरीक्ष्याय - दुःखेनापि निरीक्षितुमशक्यो दुर्निरीक्ष्यः।

शिष्टाय - विध्यनुष्ठापकाय।

(८३०) **दुर्दर्शाय** - दुःखेन द्रष्टुमशक्यो दुर्दर्शस्तस्मै।

द्रुमाय - शाखिने।

दुर्भेदाय - दुःखेन कर्तुमशक्यो भेदो यस्य सः।

दुर्लभाय - दुःखेनापि न लभ्यत इति दुर्लभस्तस्मै।

दृप्ताय - दर्पयुक्ताय।

दृप्तवक्त्राय - दृप्तं वक्त्रं मुखं यस्येति।

उन्मत्ताय प्रमत्तायेति। उत्कृष्टं मत्तः, प्रकर्षेण मत्तः प्रमत्तस्तस्मै उन्मत्ताय प्रमत्तायेति। मदेः निष्ठाक्तः। न ध्याख्यापॄमूर्छिमदाम्(पा.सू.८.२.५७) इति नत्वाभावः। बलातिशये पौनरुक्त्यविधया उक्तः।

(८४०)**दैत्यारये** - दैत्यानामरिस्तस्मै।

रमेशाय - रमाया ईशो रमेशस्तस्मै रमेशाय।

रसेशाय - रसानामीशो रसेशस्तस्मै रसेशाय।

रसज्ञाय - रसं जानातीति रसज्ञस्तस्मै।

आरक्तरसनाय च- आरक्ता रसना यस्य सः, आरक्तरसनः तस्मै।

पथ्याय - पथि मार्गे भवः पथ्यस्तस्मै पथ्याय। आस्तिकमार्गे ज्ञात इत्यर्थः। मार्गाः पञ्च - साङ्ख्ययोगपाञ्चरात्रवेदपाशुपताः।

तदुक्तम् -

साङ्ख्यं योगं पाञ्चरात्रं वेदाः पाशुपतं तथा।
सन्मार्गपञ्चकं विद्धि ब्रह्मणः परिमार्गणे।। इति मार्गपाठात्।

परितोषाय - सन्तोषरूपायेत्यर्थः।

रथ्याय - रथं वहति रथ्यस्तस्मा इति। -रथयुगप्रासङ्गम् (पा.सू.

४.४.७६) इति यत्। रथ्यो विद्यते यत्रेति मत्वर्थीयेऽचि रथ्य इति।

रसिकाय- रसिको रसाभिज्ञस्तस्मै। अनेन भक्तिरसाभिज्ञत्वमस्य, परमयोगनित्यत्वात्।

(८५०) **ऊर्ध्वजिह्वाय सिंहाय** - सिंहः सन्नूर्ध्वजिह्व इत्यर्थः।

ऊर्ध्वबाहवे - ऊर्ध्वं बाहू यस्य स ऊर्ध्वबाहुस्तस्मै इति।

परप्रध्वंसकाय - परेषां प्रध्वंसं करोतीति परप्रध्वंसकस्तस्मै।

शङ्खचक्रधराय - शङ्खचक्रे बिभ्राणायेत्यर्थः।

गदापद्मधराय - (गदा च पद्मञ्च गदापद्मे,तयोर्धरस्तस्मै)

पञ्चबाणधराय - पञ्चबाणान् धरतीति पञ्चबाणधरः। अथ बाणः कामं चरतीति वशीकरोतीति अपरं लम्बते।

कामेश्वराय - कामस्येश्वरः कामेश्वरस्तस्मै। ईश्वरः - ईष्टे ईश्वरः। स्थेशभास-(पा.सू. ३.२.१७५) इति वरच्प्रत्ययः। कामस्तदधीनः, न तु कामाधीनः श्रीनृसिंह इत्यर्थः।

कामाय - कामयतेऽयमिति कामः। कामयतीति वा कामस्तस्मै। यद्वा - कामयतेऽनेनेति कामः। यद्वा- कामोऽस्यास्तीति कामः। मत्वर्थीयोऽच्प्रत्ययस्तस्मै कामाय। यद्वा - काम्यतेऽसौ कामस्तस्मै कामायेति।

कामपालाय - (कामं पालयतीति) कामपालस्तस्मै।

कामिने- कामोऽस्यास्तीति कामी। कामोऽभिलाषः(अ.को. १.७.२८) स्वयमेवाकामोऽपि भक्ताभिमताभिलाषीत्याशयः।

(८६०) **कामविहाराय**- काम इच्छा स विहारः क्रीडा यस्य तस्मै। यद्वा - कामेनेच्छया विहारो यस्य।

कामरूपधराय - इच्छास्वरूपधारीत्यर्थः। वस्तुतोऽस्वरूपः।

सोमसूर्याग्निनेत्राय - सोमसूर्याग्नयो नेत्रा यस्य। सोमश्च सूर्यश्च

अग्निश्चेति द्वन्द्वगर्भो बहुव्रीहिः सोमसूर्ययोरिवाग्निर्नेत्रो यस्य सः। अथवा - सोमसूर्याविवाग्निर्नेत्रो यस्येति। अग्निर्देवानां मुखमिति श्रीनृसिंहनेत्र इत्यपूर्वमात्रेयविशेषणेनोक्तम् ।

सोमपाय - सोमं पिबतीति सोमपस्तस्मै।

नमः **सोमाय** - सोमश्चन्द्रस्तद्वर्तते धवलतयेति सोमः। तदुक्तं ध्याने - इन्दुधवलमिति। यद्वा - सोमो नेत्रतया यत्र वर्तते स सोमः। तदुक्तम् - सोमसूर्येति। कैश्चित्तु, यद्वा - उमया सह वर्तमानः सोमः तस्मै। शिवायेत्यर्थः इति व्याख्यातम्। तदसत्, वासुदेवरूपकृष्णसहस्रनामप्रस्तावात्। ननु तस्यापि रुद्रादिशब्दव्यपदेशः क्रियत इति चेन्मैवम्, रुद्रादिनाम्नां मुख्यवृत्त्या श्रीविष्णावेव योजयितुं शक्यत्वात्। रोदयत्यसुरानिति रुद्र इत्यादि। शिवस्तु सर्वदा रावणादिषु प्रसादमेव कृतवान्। विष्णुरेव दैत्यान् हतवानिति सर्वजनप्रसिद्धम्। यत्तु विष्णुशिवयोरभेदेनैव शब्दार्थाभ्यां व्यवहारः, स तु तादृशवेदान्तिनामेव। **अहं त्वेतादृशवेदान्तशास्त्रमपाठितो गुरुणा**। तथा हि - न हि कदाचित् केनचित् कथञ्चिदपि श्रीविष्णुः पार्वतीपतिरुमापतिरिति व्यपदिश्यत इति दृष्टं श्रुतं वा। तथा सदाशिवोऽपि लक्ष्मीपतिः श्रीपतिरिति वा (न) दृष्टं श्रुतं वा। अतः स्तुतिबुद्धिस्तामसप्रद्वेषेणेत्यस्मदुक्तैव व्याख्या ज्यायसी। यद्वा - एवमाख्यातम्, सुधां सूते सोम इत्यमृतम्। अमृतं च मोक्षः। ततश्च यज्ज्ञानात्, यत्सेवया वा मोक्षाख्यममृतं प्राप्यते स सोम इति विष्णुः शिवस्योक्तेः।

वामाय - वामं विद्यते यस्य स वामस्तस्मै। वामं वसु।

वामदेवाय - वामदेवो मुनिस्तस्मै। वामः श्रेष्ठो देवः दीव्यतीति देवः। इतरावतारापेक्षया मातापितृसम्बन्धाजन्यत्वमेव श्रेष्ठत्वम्।

सामस्वनाय - सामतुल्यस्वरो यस्य सः। अथवा - सप्त सामान्ये०

स्वरो यस्य स तस्मै। वेदानां सामवेदोऽस्मि(भ.गी.१०.२२) इति वचनात्।

सौम्याय - अक्रूरायेत्यर्थः।

भक्तिगम्याय - उपायपूर्वं भगवति मनःप्राणिधानं भक्तिः, ईश्वरप्रीतिर्वा भक्तिः । तयैकया गम्यः, तस्मै।

(८७० **कूष्माण्डगणनाथाय** - कूष्माण्डहोमप्रियो गणनाथस्तस्मै। त्वराकार्य सम्पादका अनेके गणनाथास्ते त्वयमेवेति।

ननु ते ह्यनेककार्यसाधका नासौ तथेति चेदत आह- **सर्वश्रेयस्कराय** च। सर्वाणि च तानि श्रेयांसि फलानि कार्याणि, तेषां हेतुकरस्तस्मै। तत्सम्पादक इत्यर्थः।

भीष्माय - वैरिणो बिभ्यत्यस्मादिति भीष्मः। भियः षुक्च(उ.सू. १.१४८)इति षुक्। कालादिवशीकारसामर्थ्यात्

भीकराय - (भियं शत्रुभ्यः करोतीति)भीकरस्तस्मै।

भीमविक्रमणाय च। भीमं भयानकं विक्रमणं यस्येति विग्रहः। भीमपराक्रम इत्यर्थः। षुगभावपक्षे भीम इति रूपम्।

मृगग्रीवाय - मृगस्य ग्रीवेव ग्रीवा यस्यासौ मृगग्रीवः। मृगशब्देन लक्षणया मृगेन्द्रः सिंह उच्यते। मृगयतीति मृगः जानिनि मृग ?इति व्युत्पत्त्या मृगेन्द्रः सिंह उच्यते। गिरत्यनयाऽन्नपानं ग्रीवा। शेवयह्वजिह्वाग्रीवाप्वमीवाः (उ. १.१५५)इति निपात्याः। सप्तम्युपमानपूर्वस्योत्तरलोपश्चेति साधुः। सिंह वदनायेत्यर्थः।

जीवाय - अविद्यावच्छिन्नरूपतया जीवः। यद्वा - जीवन्ते भूतानि येनेति जीवः। चैतन्यमिति यावत्। अथवा क्षेत्रज्ञरूपेण धारयन् जीवयतीति जीवः। तथा च भगवानाह श्रीकृष्णः

प्राणान् क्षेत्रज्ञ रूपेण धारयन् जीव उच्यते। इति।

यद्वा - यदिच्छया मर्त्याः सर्वे जीवन्ति स एव परमात्मा जीवयति। स च जीवः देहत्रये नामत्रयं लभते - आत्माज्ञानलक्षणकारणदेहाभिमाने सुषुप्त्यवस्थायां प्राज्ञतां लभते। षोडशकलदेहाभिमाने स्वप्नावस्थायां तैजसतां लभते। देवमनुष्यतिर्यगादिस्थूलदेहाभिमाने जागरणावस्थायां विश्वतां लभते। ततो युक्तम् अविद्यावच्छिन्नं चैतन्यं जीव इति। यद्वा - अविद्याप्रतिबिम्बितं चैतन्यं जीव इति। अत्रावच्छेदकपक्षो नौचितीं धत्ते। सामान्यविशेषाभ्यामुपाधिभ्याम् अदान्तवर्तिनो जीवभावेन सर्वात्मनाऽवच्छिन्नत्वात् अविच्छिन्नस्य ब्रह्मणो ब्रह्माण्डाद् बहिरेव सद्भावप्रसक्तेः सर्वगतत्वसर्वोपादानत्वसर्वनियन्तृत्वानि नैव भवेयुः। अवच्छिन्नप्रदेशेऽप्यनवच्छिन्नस्य विगुणीकृत्य वृत्त्यनुपपत्तेः। प्रतिबिम्बपक्षे तु जलगते स्वाभाविकावकाशे सत्येव प्रतिबिम्बाकाशदर्शनात् एकत्रैव द्विगुणीकृत्य वृत्त्युपपत्तिः, सर्वनियन्तृत्वाद्युपपत्तिश्च। ततोऽविद्या जीवावच्छेदोपाधिः। एवं बुद्ध्यन्तःकरणाहङ्कारोपाधिताऽपि। तत्राज्ञानान्तःकरणस्थूलदेहानां कदाचिद् विकल्पेनोपाधिता, कदाचित्समुच्चयेन। सुषुप्ते र्निर्विकल्पैकचैतन्यैकरसमविद्यायोगेनेषद्भेदाख्यस्थूलव्यवहारालम्बनम्। ततः स्वप्नेऽविद्योपादानम्। करणावच्छेदात् तदेव चैतन्यं स्थूलतरव्यवहारालम्बनम्। ततः पुनर्जागरणेऽन्तःकरणसंसृष्टस्थूलदेहोपरागात् स्थूलतरं भवति। पूर्वपूर्वोपाध्यवच्छिन्नस्यैवोत्तरोत्तरावच्छेदात् न जीवभेदः। निरपेक्षोपाधिभेदे स भवेदपि। तथोक्तम् -

अधिष्ठानांशसंयुक्तं भ्रमांशमवलम्बते।
यदा तदाऽहं संसारीत्येवं जीवोऽभिमन्यते।। इति।

स एवेश्वरवद्देहत्रये नामत्रयं लभते। आत्माज्ञानलक्षणकारणदेहाभिमाने सुषुप्त्यवस्थायां प्राज्ञता। षोडशकलसूक्ष्मदेहाभिमाने स्वप्नावस्थायां तैजसता। देवमनुष्यतिर्यगादिस्थूलदेहाभिमाने विश्वतेत्यास्तां तावदप्रकृतम्।

प्रकृतमनुवर्तामहे -

अजिताय - न जितोऽजितस्तस्मै। ननु जयं प्राप्तो हि जितः, ततो न जितोऽजित इत्युक्तेः पराभूत इत्येवोक्तं स्यात्। मैवम्। जिह्री अभिभव इत्यस्य रूपं, न जि जय इत्यस्य, प्रातिकूल्याचरणापत्तेः। जि जय इत्येतद्वाऽऽवृत्यं न तत्र जितायेत्येव। नामधात्वन्तरपक्षेऽपि जिनायेत्यपि नाम वक्तुं शक्यते भक्तैरिति शेषस्वीकारात्।

अजितकारिणे- अजितं करोतीत्यजितकारी, तस्मै । वैरिणं पराभूतं करोतीत्यर्थः। अथवा - अस्य विष्णोः जितं पराभूतं वैरिणं करोतीति। श्रीमन्नृसिंहसामर्थ्यादेवावताररूपी श्रीविष्णुर्भक्तानपराभूतान् करोतीत्यर्थः। **जित कारिणे** इति क्वचित्पाठः। सोऽसङ्गतः। व्याख्येयो वा कथञ्चिदस्मदुक्त रीत्या।

जटिने- जटाः सन्त्यस्यासौ जटी, तस्मै। पिङ्गलजटाधरायेत्यर्थः। क्वचित् **कटिने** इति पाठः सोऽसङ्गतः। व्याख्येयो वा कथञ्चित्। कटोऽस्यास्तीति कटी। कटिः सालङ्कारो मध्यदेशः। क्वचित् तटिने इति पाठः। सोऽसङ्गत एव सर्वथा।

(८८०) **जामदग्न्याय-** जमदग्नेरयं जामदग्न्यः, तस्मै। जमदग्निसम्बन्धि क्रोधरूपायेत्यर्थः। यो हि जमदग्नौ क्रोधरूपतयाऽवस्थितः, स एवायमित्यर्थः।

जातवेदसे - जातो वेदो अस्मात् जातवेदाः बाहुलकोऽसुन्। अत एव शास्त्रयोनित्वाद्(ब्र.सू.१.१.३) इत्यत्र जाते जाते वेद्यत इति जातवेदाः तमस्यतीति जातवेदाः। यद्वा - जाते जाते विद्यत इति जातवेदास्तस्मै।

जपाकुसुमवर्णाय - जपाकुसुमवद् वर्णो यस्येति। रक्तवर्णायेत्यर्थः।

जप्याय - जपार्हाय। जप्यमन्त्रार्थरूपाय।

जपिताय - जपः सञ्जातो यस्य। तदस्य सञ्जातम्(पा.सू. ५.२.३६)

इतीतच्। जपमितः प्राप्तः। जपतेः निष्ठाक्तप्रत्यये "वमुजपिख्यास्वसोनिष्ठाय इड्वेतिं केचित्" इति वार्तिकाद् रूपसिद्धिः। पक्षे जप्त इति रूपम्।

जरायुजाय उद्भिजाय स्वेदजाय - (जरायोः, उद्भिद्य, स्वेदाद्वा जायत) इति प्राण्युत्पत्तेस्त्रेधा दृष्टेः। (अत्र जरायुजायेत्यनन्तरमण्डजायेति क्वचित् पाठः। तथा सति चतुर्धेति द्रष्टव्यम्।)

(८९०) **जनार्दनाय** - जनानर्दयतीति जनार्दनः। अर्द गतौ याचने च। याचनार्थाया अर्दयतेर्ल्युट्प्रत्ययः। यद्वा - जनान् दैत्यान् अर्दयति पीडयतीति जनार्दनः। जनैः पावकैरर्दयति(पीडयतीति) जनार्दनः। नन्दादित्वाल्ल्युः। युवोरनाकौ(पा.सू.७.१.१) इत्यनः।

रामाय- रमयतीति रामः। यत्र नित्यानन्दस्वरूपे योगिनो रमन्ते स रामः। पाद्मे तदाह-

रमन्ते योगिनो नित्यं परानन्दे चिदात्मनि।
अतो रामपदेनैतत् परं ब्रह्माभिधीयते।।(द्र. रा.ता.उ. १.६)

यद्वा - स्वेच्छया रमणीयवपुर्वहो राम इत्यभिधीयते। वस्तुतस्तु - अभिरामेण वपुषा रामत्वम्। ततः सिताङ्गतया बलभद्रः। सुन्दरनीलाङ्गतया सीतावामाङ्गतया दाशरथी रामः। ब्राह्मक्षात्रवेषाङ्गतया परशुरामः। सिंहाङ्गमनुष्याङ्गतया श्रीमन्नृपञ्चास्य इति। तदाहुः कवयः - राम इत्यभिरामेण वपुषेति(रघुवंशम् १०.६७)।

जाह्नवीजनकायचेति। जान्हव्या जनक उत्पादकः कारणमित्यर्थः। जनक इत्यत्र जनिवध्योश्च(पा.सू.७.३.३५) इति वृद्ध्यभावः

ननु जाह्नव्यादि अतश्चेदुत्पन्नं, तर्हि कुतश्चिज्जातो भविष्यति। अत आह-

जराजन्मविदूरायेति - जरा च जन्म च जराजन्मनी, ते विशेषेण दूरे

यस्येति द्वन्द्वगर्भो बहुव्रीहिः। अथवा - जराजन्मादिदूरायेति पाठः। तत्रादिशब्दात् प्रतिभयनाशौ गृह्येते। जरा, षिद्भिदादिभ्योऽङ्(पा.सू. ३.३.१०४)। जन्म, जनेर्मनिन्प्रत्ययः (उ. ४.१४४)। आदि, उपसर्गे घोः कि(पा.सू.३.३.९२) इति किः। दूरम्, दुःखेन ईयते - दूरम्। दुरीणो लोपश्च(उ. २.२०)इति दुर् पूर्वादिणो लुक्, धातोश्च लोप इति।

प्रद्युम्नाय - प्रकृष्टं द्युम्नमस्य। द्युम्नं बलम्।

प्रमोदिने - प्रकृष्टो मोदः, स विद्यते यस्य सः तस्मै।

जिह्वारौद्राय - जिह्वया रौद्रो भयानकः। रुद्र एव रौद्रः । जिह्वया जिह्वालालनमात्रेणासुरान् रोदयतीति रुद्रः। अथवा - रोदयति शत्रूनिति (रुद्रः तस्मै) रुद्राय। यद्वा - रोदयत्यसुरस्त्रीरिति (रुद्रस्तस्मै) रुद्राय। अथवा - दुष्टसंहारकाले तान् हरतीति रुद्रः। यद्वा - रुदं दुष्टेभ्यो राति ददातीति रुद्रः। यद्वा - रुत् दुःखं, दुःखकारणं वा द्रवयतीति रुद्रः। अथवा- रोगं दुःखं दारयतीति वा रुद्रः। अथवा - रुत् रुचिं दीप्तिं राति ददातीति रुद्रः। न तत्र सूर्यो भाति न चन्द्रतारकम्(मुं.उ. २.२.१०) इति श्रुतेः। ऋज्रेन्द्राग्रवज्रविप्रकुब्र चुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवम्रेरामालाः(उ.सू.२.२८), रोदेर्णिलुक्च, उ.सू. २.२८) इति रक्प्रत्ययतः साधुः।

वीरभद्राय - महान् वीरो भद्रः शत्रून् प्रति याताऽपि कल्याणरूप इत्यर्थः। यद्वा - विशेषेण शत्रून् ईरयति गच्छतीति वीरः। अथवा - विशेषेण शत्रूनस्यतीति वीरः। यद्वा - प्रचेतयति प्रजनयति जगदिति वीरः। यद्वा - शूरा वीरविक्रान्ता वीर इति यावत्। भन्दते भद्रं कल्याणमित्यर्थः। ऋज्रेन्द्राग्रवज्रेति (उ. २.२८) रन् प्रत्ययः।

(९००) **चिद्रूपाय**- चित् सत्यं ज्ञानं तद्रूपः। चेततीति चित्। यद्वा- चेतनं चित्। चिती संज्ञाने, अतः क्विप्। सत्यं ज्ञानमनन्तं ब्रह्म(तै.उ. ब्रह्म.१) इति श्रुतेः।

इति श्रीमन्महाराजाधिराजश्रीदलपतिराजविरचिते श्रीनृसिंहप्रसादे व्रतसारे श्रीनृसिंहसहस्रनामभाष्ये नाम्नां नवमं शतं सम्पूर्णम् ।

दशमशतकम्

समुद्राय - समुद्रेति सम्यक् शीघ्रमेव वा भक्तकार्यार्थं समुदेतीति समुद्रः। स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभि-भ्यो रक् (उ.सू. २.१३)इत्यौणादिको रक् प्रत्ययः।

कद्रुद्राय - कवयति कवयते वा कविः। ततः क्विपि कत्। कद्रुद्रस्तस्मै। शब्दायमानोऽसुरान् रोदयतीत्यर्थः

प्रचेतसे- प्रकृष्टं चेतोऽन्तःकरणं यस्यासौ प्रचेताः। यद्वा - भक्तेषु प्रकर्षेण चेतश्चेतनात्मकतयाऽन्तःकरणं यस्येति। सर्वकालं भक्तेष्वेवा न्तःकरणे सत्त्वाभिधानं वहतीति भावः। प्रचेतयते प्रचेताः, तस्मै। असुन्।

इन्द्राय - इन्दति वा तेजोभिः इन्द्रः। ऋज्रेन्द्रवज्रेति(उ. २.२८) रन्। ततश्च "इदि परमैश्वर्ये" इत्यतो रप्रत्यये इन्द्रशब्दव्युत्पत्तेः समर्थायेत्यर्थः सम्पद्यते। **क्वचिदिन्दिरायेति** पाठः। इन्दिरा विद्यते यस्यासौ इन्दिरः। इन्दिरा लोकमाता मा (अ.को. १.१.२८) इति कोषात् लक्ष्मीः। **इन्दिन्द्रियायेति** पाठः। स्वयंक्षुरादिरूपः। तदधिष्ठातृतया तद्रूपः, तद्वान्वा।

इन्द्रियज्ञाय- इन्द्रियात् जानातीति इन्द्रियज्ञः। इन्द्रियं चापञ्चीकृत भूतरजोंशाकारपरिणताज्ञानात् क्रमात् कर्मेन्द्रियाणि, श्रोत्र-त्वक्-अक्षि-रसना-घ्राणसंज्ञानि जातानि। अपञ्चीकृतभूतसत्वांशप्रधानाज्ञानाद् अन्तःकरणं च मनो बुद्धिरहङ्कारश्चित्तमिति चतुर्भेदं जातम्। सङ्कल्पविकल्पात्मकत्वान्मनः। बोधनात्मकत्वाद् बुद्धिः। अभिमानादहङ्कारः। चेतनात्मकत्वाच्चित्तमिति

इत्यादि। तथा चक्षुरेव पश्यति, नेतरत्। श्रोत्रमेव शृणोति, नेतरत्। अधिष्ठातुरेकत्वादेषां तु भेदे भवेदपि वैचित्री। अभेदे तु कथमित्यादि सर्वं जानातीत्यर्थः। ननु इन्द्रश्चेत् कथमिन्द्रानुजतोक्तेत्याशङ्क्य तामप्याह - (**इन्द्रानुजायेति**।) इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः (१.१.२०) इति (अमर)कोषात्।

अतीन्द्रियाय - इन्द्रियाण्यतिक्रान्तोऽतीन्द्रियः, इन्द्रियाविषय इत्यर्थः। मनोवागगोचरः" इति श्रुतेः।

सान्द्राय- त्यक्तप्रायआदिभावमापन्न इति। **सारायेति** क्वचित्पाठः। साराय - सरयतीति सारः। सृगतौ। भक्तकार्यार्थं यत्र क्वापि गच्छतीत्यर्थः। यद्वा - जगत्सारभूतायेत्यर्थः।

इन्दिरापतये - लक्ष्मीपतये। इन्दिरायाः पतिरिति विग्रहः।

(९१०) **ईशानाय** - ईश्वराय।

[ईशानशब्दस्य विष्णुवाचित्वम्]

यद्यपीमानि शिवनामानि प्रतीयन्ते आपाततस्तथाऽपि न भ्रमितव्यम्, वस्तुगत्यैतेषां विष्णुनामत्वात्। तेनैव तत्कार्योपयोगितया तथैवाभिहितत्वात्। यद्वा- इदं मुख्यं श्रीविष्णोरेव नाम। तन्नाम सत् तेनैवान्यस्मायापि दत्तमित्यर्थः। अर्थस्तु - अविशेषेण सर्वभूतनियन्ता हीशानः। श्रीविष्णुर्भगवानेव यदा सर्वभूतानां नियन्ता, तदा स एव मुख्यतया ईशानशब्देन व्यपदिश्यते। ईशान इत्यत्र ताच्छील्ये शानच्प्रत्यये इष्टसिद्धिः। पुराणप्रसिद्ध्याऽपि यद्यपि विष्णुनामैव, तथाऽपि शिवस्यापि भवतीति। तर्हि कूर्मपुराणे श्रीभगवान्-

तस्मिन्हि पूज्यमाने वै देवदेवे महेश्वरे।
सम्पूजितो भवेत्पार्थ देवो नारायणः प्रभुः।।
रुद्रो नारायणश्चैव सत्वमत्र द्विधा स्थितम्।

इत्यादिना बहुधा ऐक्यप्रतिपादनात्। शिवः -

अयं नारायणश्चाहमीश्वरो नात्र संशयः।

नान्तरं सम्प्रपश्यन्ति तेषां देयमिदं परम्।।

ममैषा परमा मूर्तिर्नारायणसमाह्वया।

इनाय - इनः सूर्यः स्वामी वा। एतीतीनः। बालान् भक्तान् रक्षितुं यत्र क्वापि यातीत्यर्थः। यद्वा - यमर्थिनो यान्ति, स इनः। इण्सिञ्जिदीङुष्यविभ्यो नक् (उ.सू. ३.२) इति नक् प्रत्ययः। तस्मै।

व्योमात्मने - व्योमवदात्मा, कूटस्थनित्य इत्यर्थः। व्योमवत् कूटस्थनित्यो वा भवतीति व्योम। द्वारस्वर...श्वस्श्वन् इति ओत्वम्। यद्वा - वीयते वा स्वनाम्ना व्योमेत्यर्थः।

व्योमकेशिने- व्योमनि केशा यस्य स व्योमकेशी, तस्मै व्योमकेशिने। अथवा- व्योम द्यौः के मूर्ध्नि शेतेऽस्य व्योमकेशः सदाशिवः। स विद्यते स्तोता यस्य यत्र वा स व्योमकेशी, तस्मै व्योमकेशिने।

व्योमाधाराय - व्योम्न आधारः, तस्मै।

व्योमवक्त्राय - व्योमवत् व्योम्नि वा वक्त्रं यस्य।

असुरघातिने - असुरान् घातयतीत्यसुरघाती, तस्मै। यद्वा- सुरन्तीति सुराः। सुर ऐश्वर्ये कः। सुरविरुद्धा असुरा इति। यद्वा- सुरा येषामस्ति ते सुराः। अर्शआदित्वादच्। समुद्रोद्भवसुरापानकरत्वात् सुरत्वम्। सुराया अपानादसुरता। यद्वा- सुष्ठु राज़न्ते सुराः, तद्विरुद्धा असुरा इति। यद्वा - अस्यन्ति क्षिपन्ति सुरान् देवानित्यसुरा इति।

(९२०) **व्योमदंष्ट्राय** - व्योम्नि दंष्ट्रा यस्य। दंश्यत इत्यनया सा दंष्ट्रा।

व्योमवासाय - व्योमैव वासो यस्य। नम इत्यर्थः।

सुकुमाराय - शोभनः कुमारः। कुमारता ब्रह्मचारितया। तस्मै सुकुमाराय।

रामाय - अभिरामतया तद्रूपतया यद्यपि रमयतीति राम इति व्युत्पत्तिः सम्भवति सर्वव्यभिचारतया योगायोगः। अभिरामत्वं च सिंहास्यनराङ्गतया योज्यम्।

शिशुचाराय - शिशुभिः सह चरतीति शिशुचारः। यद्वा - शिशून् चारयतीति शिशुचारः इति गत्यर्थण्यन्ताच्चरतेरच्प्रत्यये चार इति रूपम्। शिशूनायमयतीत्यर्थः। यद्वा - शिशुमारायेति पाठः। तत्रायमर्थः - शिशुमारो ज्योतिश्चक्रं, तद्रूपायेति। अत एव नक्षत्रनेमिरिति विष्णुरुच्यते, त्रिलोक्या अभिरामाय क्रीडाकरत्वात्।

दिशादिरूपाय - दिशा रूपं यस्य स इत्यादिभिर्विराड्रूपतोक्ता। विश्वस्य जगतः कारणरूपतया विश्वरूपता। यद्वा - इदम् विश्वं परपुरुषा दभिन्नमिति परमार्थ इति विश्वः श्रीनृसिंहः। यद्वा - विशतीति विश्वं ब्रह्म। तत्सृष्ट्वा। तदेवानुप्राविशत्"(तै.उ.ब्रह्म. २.७) इति श्रुतेः। यद्वा - उपसंहारे ब्रह्मणि विश्वानि विशन्तीति विश्वमिति। तथा च श्रुतिः - यत्प्रयन्त्यभि संविशन्ति (तै.उ. भृगु. ३.१) इति।

विश्वरूपाय- कर्मव्युत्पन्नो रूपशब्दः। विश्वेन रूप्यमाण इत्यर्थः।

विश्वात्मकाय - विश्वस्यात्मा विश्वात्मा। विश्वमात्मा स्वरूपं यस्य। बहुव्रीहौ कः।

ज्ञानात्मकाय - ज्ञानमेव स्वरूपं वा यस्य। विज्ञानमानन्दम् (बृ.उ. ३.९.३४)इति श्रुतेः।

(९३०) **विश्वेशाय** - विश्वस्येशः स्वामी।

परमात्मने - परश्चासावात्मा चेति, तस्मै परमात्मने। परमात्मा परमेश्वरः परब्रह्मैवेत्यर्थः।

एकात्मने- एकश्चासावात्मा च एकात्मा, तस्माइति। एको मुख्य

आत्मा।

द्वादशात्मने- द्वादशात्मा तु विष्णुः। विष्णुर्वै त्रिविधः - आत्मा विष्णू रुद्रः। स प्रत्येकं त्रिविधः। ब्रह्मविष्णुरुद्राः (आधिभौतिकः) आधिदैविकः आध्यात्मिकश्चेति त्रिविधाः। त्रैविध्ये द्वादशात्मकता। एवं द्वादशात्मने नमोऽस्त्विति सम्बन्धः

चतुर्विंशतिमूर्तये - चतुर्विंशतिमूर्तयो यस्यासौ चतुर्विंशतिमूर्तिस्तस्मै। ताश्च मूर्तयः प्रसिद्धाः। यद्वा - चतुर्विंशत्या रूप्यमाणो रूप्य इति यावत्। केशवादिमूर्तिभिरेवायं ज्ञायते अयमिति नान्यथेति।

पञ्चविंशतिमूर्तये - पुरुषेण सह पञ्चविंशतिमूर्तयो यस्येति। पूर्वाश्चतुर्विंशतिः, पुरुषः पञ्चविंशतितमः। अथवा - साङ्ख्याभिप्रायेण व्याख्येये अयमाशयः - प्रकृतिरव्यक्तम्, ततो महत्, अतोऽहङ्कारः, ततः षोडशको विकारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि इति। ततः पञ्चमहाभूतानि। एवं पञ्चविंशतिः। पुरुषः पञ्चविंशक इति। पुरि शयनात् पुरोहिताच्च पुरुषः। अनादिसूक्ष्मः सर्वगश्चेतनो ज्योतिषो द्रष्टा भोक्ता चेति। नन्वेवंविधपुरुषस्य कथमचेतनसन्निधानम्।

उच्यते - अपेक्षानिबन्धनं तत्। तथा हि - प्रधानभोगात्तन्न भोक्तारं विनेति भोक्त्रपेक्षा। तस्य भोग्ये। असम्भिन्नपुरुषः तद्गतदुःखत्रये स्वात्मन्यभिमन्यमानः कैवल्यमिच्छतीति युक्तमुभयोर्योगः। तदुक्तं साङ्ख्यैः -

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि।। (सां.का.) इति।

अन्यैस्तु अन्यथोक्तस्तु -

प्रकृतेरभवद्बुद्धिरभूद्बुद्धेरहङ्कृतिः
अहङ्काराच्च सूक्ष्माणि तन्मात्राणीन्द्रियाणि च।

सूक्ष्मेभ्यः पंचभूतानि तेभ्यः स्थूलमिदं जगत्।
चतुर्विंशकमव्यक्तं पुरुषः पंचविंशकः।।

इति बुद्धिभेदधर्मज्ञानकृता षड्विंशतिः

षड्विंशकात्मने नमोऽस्तु। षड्विंशतेः पूरणः षड्विंशः। षड्विंश एव षड्विंशकः। पृथिव्यादीनि पंचभूतानि शब्दस्पर्शरूप(रस)गन्धाख्याः पंच गुणाः। श्रोत्रत्वगक्षिजिह्वानासिकापायूपस्थहस्तचरणवाग्रूपाणि दशेन्द्रियाणि। मनोबुद्धि रहङ्कारश्चेत्यन्तःकरणं त्रिधा। प्रकृतिश्चतुर्विंशी। पुमान् पंचविंशः। षड्विंश ईश्वर इति षड्विंशकरूप इत्यर्थः।

एवं **सप्तविंशतिकरूप**ता व्याख्येया।

धर्मार्थकाममोक्षाय - धर्मश्च अर्थश्च(कामश्च मोक्षश्चास्त्यस्येति) धर्मार्थकाममोक्षः, अर्शआदित्वादच्। अनेन धर्मार्थकाममोक्षास्तत्र सन्तीत्युक्तम्। मोचनं मुक्तिः।

[मतभेदेन मुक्तिस्वरूपकथनम्]

तत्र केचित् विषयाकाराप्लुतविज्ञानसन्तानोपरमो मोक्ष इत्याचक्षते। केचित्तु विधूतविषयाकारोपप्लुतविशुद्धविज्ञानसन्तानोदयो मोक्ष इति। अन्ये तु दुःखात्यन्ताभावो मोक्ष इति। अन्येत्वात्यन्तिकी दुःखनिवृत्तिरिति। अन्ये तु एतज्जीवनिष्ठ-दुःखसमानकालीन-दुःखध्वंसातिरिक्तैतन्निष्ठ-दुःखध्वंसः अस्य मुक्तिरिति। अपरे त्वेतन्निष्ठदुःखप्रागभावासमानकालीनैतन्निष्ठदुःखध्वंसोऽस्य मुक्तिरिति। अपरे तु ज्ञानाजनकसंस्कारजनकजन्यसाक्षात्कारविषयो दुःखध्वंसो मुक्तिरिति। प्रलीननिखि(ल)लोपाच्च क्षेत्रज्ञस्य सन्ततोर्ध्वगतिलक्षणोऽक्षयशरीरा दिलाभो मुक्तिरिति। साङ्ख्याचार्यास्तु प्रकृतिपुरुषविवेकदर्शनात् पुरुषस्य स्वरूपावस्थानं मुक्तिरित्याचक्षते। आचार्याः पुनरविद्यानिवृत्तौ नित्यनिरतिशय सुखाभिव्यक्तिर्मुक्तिरित्यभिव्यञ्जयन्ति।

न केवलं स एव, अपि तु तद्वानपीत्याह - **विमुक्तायेति**। विशेषेण मुक्तिर्यस्यासौ विमुक्तस्तस्मै। यद्वा - न केवलं तद्वानेव, किन्तु तद्वद्युक्त इत्याह - विमुक्तायेति। विशेषेण मुक्तिर्येषां ते विमुक्ताः। तत्र असौ विमुक्तः स्वयं मुक्तोऽन्यांश्च मुक्तान् स्वं प्रापयतीति भावः।

(९४०) **भावशुद्धाय**- ननु स्वयं त्वमुक्तेः कथं मुक्तानङ्गीकरोतीत्यत आह- भावशुद्धायेति। भावेन शुद्धो भावशुद्ध तस्मै भावशुद्धायेति। निष्प्रपञ्च इति भावः।

सिद्धाय- भवनं भावः, भाव उत्पत्तिः, तद्वानिति कस्यचिद् भ्रान्तिः स्यादत आह - सिद्धायेति। नित्यानित्यः। अथवा - सिद्धरूपाय दाता भोक्ता अयाचकश्चेति। तदुक्तम् -

सिद्धस्य त्रीणि चि(ह्नानि) दाताऽभोक्ताऽयाचकः। इति।

अनेन स्वयं मुक्तत्वेऽपि अन्येषां मुक्तिदत्वं स्पष्टीकृतम्। सिध्यतीति सिद्धः।

अन्येषां साध्योऽपीत्याह- **साध्यायेति**। साध्यते आराध्यते इति साध्यः। साध्यो गम्यो ध्येयो हृष्यः उपास्य इत्यर्थः।

शरभाय - शृणाति शरभः। शरभेण तुल्यः शरभ इति। यद्वा - शरेषु शरीरेषु प्रत्यगात्मतया भातीति शरभः। शराः शरीराण्युच्यन्ते शीर्यमाणत्वादिति

प्रबोधाय - प्रकृष्टो बोधो यस्य। अथवा - प्रकृष्टो बोधो यस्मादसौ प्रबोधः, तस्मै प्रबोधाय। उन्निद्रभावं प्राप्तायेत्यर्थः।

सुबोधाय - शोभनो बोधो यस्य सः। विपर्ययज्ञानरहित इत्यर्थः।

बुद्धिप्रियाय - बुद्धेः प्रियः। बुद्धिर्निश्चयात्मकं ज्ञानम्। अथवा - बुद्धिः प्रिया यस्य स तस्मै।

स्निग्धाय - स्नेहयुक्ताय।

विदग्धाय - (विदुष इत्यर्थः।)

मुग्धाय - नमो गुणयोगात्।

(९५० **मुनये**- मननशीलाय। यद्वा- मन्यते मुनिः। मनेरुच्च(उ.सू.४.१२२) इतीनिप्रत्ययः।

प्रियश्रवाय - श्रूयते नियमेनेति श्रवो वेदः। प्रियः श्रवो यस्यासौ प्रियश्रवः, तस्मै। वेदप्रियायेत्यर्थः। अथवा - **प्रियम्वदाय**। अयं मुख्यः पाठः। तत्रार्थः -प्रियं वदति, प्रियंवदः। ख च(पा.सू. ४.४.१३२)इति खच्।

श्रव्याय - आत्मध्यानाय श्रोतव्यायेत्यर्थः

स्रुक्स्रुवाय- स्रुक् च स्रुवश्च स्रुक्स्रुवौ यागीयपदार्थौ, तद्रूपाय।

न च केवलं यागीयपदार्थरूपः, किन्तु यागाधिष्ठातृरूपोऽपीत्याह- **आश्रिताय**। यज्ञश्रितायेत्यर्थः। क्वचित् **श्रितायेत्येव** पाठः। तत्र वर्तमाना ध्याहारेण व्याख्या। श्रित इत्यत्र क्तप्रत्ययः। अकः किनिति किण्निषेधः।

ग्रहेशाय - ग्रहाणामीशो ग्रहेशः, तस्मै।

महेशाय- महांश्चासावीशश्चेति महेशः, तस्मै। परमेश्वरायेत्यर्थः।

ब्रह्मेशाय - चतुर्मुखसहस्रमुखप्रभृतीनामीशः स्वामी, तस्मै।

श्रीधराय - श्रियो धरः श्रीधरः, तस्मै।

सुतीर्थाय- सुष्ठु तीर्थेनैवावगाहनादिभिस्सद्व्ययादिहेतुत्वात्तीर्थरूपता।

(९६० **हयग्रीवाय**- हयस्य ग्रीवा यत्र देहे तच्छरीरधारी। यद्वा- हयस्य ग्रीवेव ग्रीवा यस्यासौ हयग्रीवः तस्मै। गिरत्यनया अन्नपानं ग्रीवा। शेवयह्वजिह्वा ग्रीवाप्वमीवाः(उ. १.१५२) इति निपात्याः। सप्तम्युपमानपूर्वस्योत्तरपदलोप श्चेति साधुः।

उग्राय- अधृष्यायेत्यर्थः। उग्रत्वं चात्र सूर्यादीनामपि भयहेतुतया व्याख्येयम्। स सर्वोत्तमः सूर्यादीनामपि भयहेतुरिति, भीषास्माद्वातः पवते (तै.उ. ब्रह्म. २.८) इत्यादिश्रुतिषु दृश्यते। उग्रशब्दनिष्पतिस्त्वेवम् - उच्यति

क्रुद्धः समवैति उग्रो रौद्रत्वात्। विरोधिनाशार्थः क्रोधयुक्त उग्र इत्यर्थः।

उग्रवेगाय - उग्रवेगो यस्य सः। अत्युग्रतया वेगवानिति।

उग्रकर्मरताय - उग्रं भीषणं यत्कर्म तत्र रतः, तस्मै।

उग्रनेत्राय - उग्रा रक्ततया नेत्रा यस्येति, तस्मै।

व्यग्राय - अनेकव्यासक्ताय। तथा विविधमग्रमस्य व्यग्रः। यद्वा - विविधमग्रं विशेषेण गतिर्यस्येति व्यग्रः। तथा च(अमर)कोषः - व्यग्रो व्यासक्त आकुले (३.३.१९१)इति।

समग्रगुणशालिने- समग्रैर्गुणैः शालत इति समग्रगुणशाली, तस्मै।

(**बालग्रहविनाशाय** - बालानां ग्रहान् विनाशयतीति बाल)ग्रह विनाशस्तस्मै।

पिशाचग्रहघातिने - पिशाचग्रहान् घातयतीति पिशाचग्रहघातः, तस्मै।

दुष्टग्रहनिहन्त्रे - दुष्टग्रहहननकर्त्रे।

(९७०) **निग्रहानुग्रहाय**- असाधूनां निग्रहकर्ता, साधूनामनुग्रहकर्तेति भावः।

वृषध्वजाय - वृषो धर्मः, कामवर्षणात्। स ध्वजो यस्य। धर्मध्वज इत्यर्थः।

वर्ष्याय- वर्षानिमित्ते भवो वर्ष्यः, तस्मै। वर्षा वृष्टिः वृष्टिनिमित्तं अयमेव च तीर्ण इति भावः। अथवा - **वृष्यायेति** पाठः। विभाषाकृवृषोः (पा.सू. ३.१.१२०)इति सिद्धिः।

वृषाय - वृषान् कामान् फलानि वर्षतीति वृषो धर्म इत्यर्थः। धर्मो ह्यनुष्ठातृभ्य इष्टं फलं प्रयच्छति। तदा धर्म इत्यर्थः। अथवा - धर्मफलं वर्षतीति वृषः। पुरुषैरनुष्ठितेऽपि धर्मेऽयमेव फलदातेति। इदं च स्पष्टीकृतं व्यासदेवैरुत्तरमीमांसायाम् - फलमत उपपत्तेः(ब्र.सू. ३.२.३८) इत्यत्र। अतश्च कामानां वर्षणात् वृष इति। तदुक्तं भगवता(म.भा.शान्ति. ३४३.५८) -

वृषो हि भगवान् धर्मः स्मृतो लोकेषु भारत। इति

वृषभाय- कामान् वर्षतीति वृषः। वृषे धर्मे अधिष्ठातृदेवतारूपतया भातीति वृषभः। ततश्च कामानां वर्षयिता वृषभ इत्यर्थः। ननु धर्मेऽनुष्ठिते फलं भविष्यत्वेव। सत्यम्, तथापि कर्माराधितेश्वरादेव फलप्राप्तिः। तदुक्तं मीमांसासूत्रकृता - फलमत उपपत्तेः(ब्र.सू. ३.२.३८) इति। फलम्, अतः कर्माराधितेश्वरात्, उपपत्तेरित्यन्वयः।

उग्रश्रवाय - उग्रं श्रूयत इत्युग्रश्रवः, तस्मै।

शान्ताय - शान्तिरस्यास्तीति शान्तः समोपेतः।

श्रुतिधराय - श्रुतेर्धरः श्रुतिधरः। धरते धर इति।

देवदेवेश - देवानां देवः देवदेवः। तस्येशः स्वामी। त्रयस्त्रिंशत्कोटिदेवेश इन्द्रः। तस्याप्ययं स्वामी देवदेवेशः। तत्सम्बोधनं देवदेवेश।

मधुसूदन - मधु सूदयतीति मधुसूदनः।

(९८० **पुण्डरीकाक्ष**- पुण्डरीकवदक्षिणी यस्यासौ पुण्डरीकाक्षः। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्(पा.सू.५.४.११३) इति षच्।

दुरितक्षय- दुरितस्य दुरितापूर्वस्य क्षयः फलाजनकत्वं यस्मात्सः।

करुणासिन्धो) - करुणायाः सिन्धुः। कृपासागर इत्यर्थः।

समितिञ्जयाय - समितिं युद्धं जयतीति समितिञ्जयस्तस्मै।

नारसिंह - (व्याख्यातम्)

गरुडध्वज - गरुडो ध्वजे आसने वा यस्य। गरुद्भिर्डयते गरुडः। पृषोदरादित्वात्तलोपः। डीङ् विहायसा गतौ इत्यस्मात् डप्रत्ययः। यद्वा - नागान् गिरतीति गरुडः इति।

यज्ञध्वज कालध्वज (जयध्वज) - (यज्ञादिर्ध्वजो यस्य, तत्सम्बुद्धौ।)

अग्निनेत्र - अग्नयो नेत्रा यस्य। अग्निवद्वा नेत्रा यस्येति।

(९९०) **अमरप्रिय**- अमराणां देवानां प्रियः। अथवा- अमराः प्रिया यस्येति विग्रहः। सः (अमरप्रियः, तत्सम्बुद्धौ अमरप्रिय।

महानेत्र - महतो नेत्रा यस्य।

भक्तवत्सल - भक्तेभ्यो वत्सलो भक्तवत्सलः। तत्सम्बोधनम्।

धर्मनेत्र - धर्म एव नेत्रो यस्य। अथवा- धर्मो नेत्रो दृष्टिर्यस्य स धर्मनेत्रः, तत्सम्बोधनम्।

करुणाकर- करुणाया आकर उत्पत्तिभूः। यद्वा- करुणां करोतीति करुणाकरः। तत्सम्बोधनम्।

पुण्यनेत्र - पुण्यमेव नेत्रः, पुण्ये नेत्रे वा(ऽस्य) पुण्यनेत्रः।

अभीष्टदायक - इष्टप्रदातः।

नरसिंहरूप - ते नमोऽस्तु। नरेण सिंहेन च रूप्यमाणो निरूप्यमाणो वस्तुतो नरो नरसिंह इत्यर्थः।

वरसिंहरूप - वरप्रदाता सिंहः वरसिंहः तद्रूप।

गुरुसिंहरूप (लघुसिंहरूप)- गुरुर्गरीयान् सिंहः, लघुर्लघीयान् सिंह इति नामद्वयव्याख्या। **रणसिंहरूप जयसिंहरूपेति** नामद्वयस्थानेऽपि पाठद्वयं दृश्यते। तदपि स्पष्टमेवेति नात्र यत्नः। क्वचित्तु **वरसिंहरूपेति** पाठः। मुख्यपाठस्तु **नरसिंहरूपेति**। अयमेव पाठः समीचीनः, नारसिंहायेत्यारम्भात्, नरसिंहेत्युपसंहारादिति।

इति श्रीदलपतिराजविरचिते श्रीनृसिंहसहस्रनामभाष्ये

दशमं शतं सम्पूर्णम् ।

उद्धृत्य गर्वितं सुरद्विषं दैत्यं हत्वा आजौ संग्रामे स्वात्मतेजसा गर्जसे। सुरान् देवान् द्वेष्टीति सुरद्विट्, तं सुरद्विषम्। उत् उच्छृङ्खलं वृत्तं स्वभावः

प्रवृत्तिर्वा यस्य। तेन गर्वितम्। दितेरयं दैत्यः, तम्। दिक्पालानित्यादि भूतगणानपीतित्यन्तस्य पूर्वेणान्वयः। ततश्चायं सम्बन्धः - त्वमेतान् पश्यन् दृष्ट्वा च प्रसीद प्रसन्नो भव।

द्रुतमेवावतीर्य दुष्टवधे कृते को वातः परं प्रसाद इत्याशङ्कायामाह -उग्रभावमिमं त्यजेति। इममित्यपरोक्षाकारवाचिना इदमा प्रत्यक्षत्वमसूचि। उग्रभावमुग्रत्वम्। उग्रत्वं महासिंहेत्यनेन स्पष्टीकृतम्। इतः पूर्वं दृष्टपूर्वसिंहेभ्यो वैलक्षण्यं महाशब्दाभिव्यङ्ग्यम्। अन्यथा सिंह इत्येव ब्रूयात्। सन्ध्यभाव श्छान्दसः। छन्दस्त्वं च छन्दोवत् पुराणानि भवन्ति" इतीष्टेः।

ततः किं वृत्तमित्याह - इत्युक्तेति। पितामह इत्युक्ते विज्ञापनारूपेण दण्डवद् भूमौ निपपातेत्यन्वयः। इतिशब्दः प्रकारवाची, तृतीयान्तश्च। एवं स्मृतिसहितस्येतिवत् प्रसीद प्रसीदेति पुनः पुनरुक्त्वा पपातेति सम्बन्धः। अन्यथाऽनन्वय एव स्यात्।

ननु दैत्यमित्येव वक्तव्यम्, न पुनः सुरद्विषमित्यपि। सत्यम्, तथाऽपि न पौनरुक्त्यम्। साक्षात्परम्परया वा दित्यपत्यानां प्रल्हादविभीषणादीना मवध्यत्वम्। अतो वध्यत्वे सुरद्वेषः कारणम्। अतः सम्यगुक्तम्- सुरद्विषमिति।

एवं ब्रह्मणा विज्ञाप्य प्रणिपाते कृते किं वृत्तमित्याह मार्कण्डेयः - दृष्ट्वेति। सर्वा अपि देवता दृष्ट्वा अव्यवहितां ब्रह्मणो वाचं श्रुत्वा अव्यवहितस्तोत्रेणापि सुहृष्टः सौम्यभावमधारयत्। नारसिंहः सर्वान् सुरोत्तमान् दृष्ट्वा अब्रवीच्चेति वाऽध्याहारेण पृथगन्वयेन वा व्याख्येयम्।

किमब्रवीदित्याह - भो देववरा इति। अत्र श्रीनृसिंह उवाच भो भो देववरेति पुस्तकपाठः। सोऽसङ्गतः। अब्रवीन्नारसिंह इत्युक्तेः। अतः श्रीनृसिंह उवाचेत्यसङ्गतम्। सर्वे पितामहपुरोगमा इत्यत्र क्रियात्रयं श्रूयते- श्रृणुध्वं, भवतु, करिष्यामीति। प्रत्येकं क्रियान्वये वाक्यभेदापत्तिः। सत्यम्, भवेदेक

वाक्ये स दोषः, वाक्यत्रयकल्पनायां न कश्चिद्दोषः।

तत्र सर्वोत्तम एव एतत्स्तोत्रपाठे फलविशेषमाह - एतदिति यः पूजान्ते स्वयमन्यस्मात् शृणोति, अन्यस्मै वा श्रावयति भक्तिसंयुतः सर्वकामानाप्नोति शरदां शतं जीवेच्चेति। अन्यमपि स्वनामभिः क्रमेण स्वार्चने फलविशेषं दर्शयति - यो नामभिरिति, नृसिंहाद्यैरिति। ॐ नमो नारसिंहायेत्यादिभिः सर्वतीर्थेष्वित्यादिफलपदानि स्पष्टार्थानि।

इदानीं स्तोत्रधारणे फलमाह - मन्नाम विगतज्वरो भवेदित्यारभ्य रोगा रोगाधिदेवताः शीघ्रं नश्यन्तीति। रोगाः क्षयादयः, रोगाधिदेवता वाय्वग्नि प्रभृतयः

स्वनामस्मरणफलं दर्शयति- नृसिंहेति। हे सुराः नृसिंहस्मरणाद् राजानो दासतां यान्तीत्यादि विषाण्यमृततां यान्तीत्यन्तेन पुनराह फलं तस्यैव राज्यकाम इत्यादि

श्रीनृसिंहप्रसादेन सर्वमाप्नोतीत्युपसंहरति - एतत्सर्वमिति। एवं श्रीनृसिंहस्मरणं तत्तत्फलकामनया कार्यमित्युक्तम्। इदानीं जलसञ्चरणादौ अविस्मरणं न कार्यमित्याह - जलेत्यादिना नारसिंहं न विस्मरेदित्यन्तेन। एवमन्वयव्यतिरेकाभ्यां श्रीनृसिंहस्मरणं करणीयमिति भावः।

इदानीं नामस्मरणस्य पापक्षयार्थतां दर्शयति - ब्रह्मघ्नश्चेत्यादिना मुच्यते सर्वकिल्बिषैरित्यन्तेन।

इदानीमतिशयार्थं तस्यैव फलान्तरमाह - बहुनाऽत्रेति शुद्धमानस इत्यनेन।

तद्धि विश्वासादिसहकारितयोक्तं गमनावस्थाननिद्राभोजनजागरण हास्यादिष्वपि स्मरणं कर्तव्यमित्याह गच्छन्नित्यादिना सम्यग्ज्ञानाद् द्विजो भवेदित्यन्तेन। सर्वफलेष्वपि ज्ञानातिरिक्तफलस्यात्युत्कटस्याभावात् सर्वानन्तरं

तत्समावेशः। सम्यगिति मिथ्याज्ञानविपर्यये वा विशिनष्टि। अनेन च तेषां तेषां नाम्नां तेषु फलेषु विनियोग इति दर्शितम्। यथा समस्तरुद्राध्यायस्यैकमन्त्रत्वेऽप्येकादशानुवाकानां तत्तत्फलसाधनतया विनियोगः, तथाऽत्रापि समस्तसहस्रनामस्तोत्रमन्त्रस्यैकमन्त्रत्वेऽपि तल्लिङ्गानां केषाञ्चिन्नाम्नां सर्वकामावाप्तौ केषाञ्चिच्चिरञ्जीवित्वे केषाञ्चित् सर्वफलावाप्तौ केषाञ्चिज्जातिस्मरत्वे केषाञ्चिद्ब्रह्मज्ञाने केषाञ्चित् सर्वप्रत्यवायपरिहारद्वारा वैष्णवपदप्राप्तौ केषाञ्चिद्राज्यप्राप्त्यादौ केषाञ्चिदिष्वाधानप्राप्त्यादौ केषाञ्चित्कारागृहमोक्षणे केषाञ्चिच्चोरसर्पव्याघ्रादिभयहानौ केषाञ्चिद्भार्यावश्यादौ केषांचित्पुत्रकन्यावाप्तौ केषाञ्चिद् बिलप्रवेशपर्वतारोहणादौ केषाञ्चिद्ब्रह्महत्यादिपञ्चमहापातकादि प्रकीर्णान्तं पापक्षये विनियोगः। श्रीनृसिंहसहस्रनाम्नस्तु पुंसः पापक्षयद्वारा सर्वफलप्राप्तौ स्त्रीणां च सौभाग्यसुरूपत्वपतिप्रियत्ववैधव्याभाव सपत्न्यभावादिषु विनियोगः तत्तल्लिङ्गकनाम्नां श्रीनृसिंहसहस्रनाम्नश्च प्रतीयत इति सर्वमनवद्यम्।

स्वमूर्तिप्रदक्षिणाफलमाह - भूमीति

ततः किं वृत्तमित्याह - मार्कण्डेय इति, इत्युक्त्वेत्यादिना। ब्रह्मणेत्यादिना प्रह्लादस्य राज्याभिषेकमुपदिष्टवान्। स च तथैवादिश्य प्रकृतिस्थोऽभूदित्यर्थः। तथाऽपि तं तत्राभिषिच्य स्वलोकं ययौ प्रापेत्यन्वयः। तथेन्द्रोऽप्येकविंशतियुगसङ्ख्यया स्वराज्यपरिभ्रष्टः स्वराज्यं प्रापेत्याह - हिरण्येत्यादिना।

एतस्यावश्यजप्यतां दर्शयितुं गुरुपरम्परायातं क्रममतिशयायाह- एतन्नामसहस्रं मे इत्यादिना उपदिष्टोऽस्मि तेनेत्यन्तेन। सहस्रकमिति स्वार्थे।

मार्कण्डेयो जपफलं स्वीयं दर्शयति - तत्प्रसादादिति। मया च मार्कण्डेयेन राज्ञे तव कथितमित्यन्वयः। त्वं हि राजा शुचिर्भूत्वा नित्यं

सर्वोत्तमं शाश्वतमाराधय। आराधनप्रकारं वदन् तत्फलमाह- पूजयित्वेत्यादिना महतीं सिद्धिं सर्वांश्च कामान् प्राप्स्यसे इत्यन्तेन।

अयमाशयः। अयञ्चाराधनप्रकारः- श्रीनृसिंहसहस्रनामभिरेभिः श्रीनृसिंह नाम्ना वा पूजयित्वा इदं च प्रकृतस्तोत्रं जप्त्वा एतैरेव मन्त्रैर्नारसिंहायेत्यादिभि राज्यादिना होमं कृत्वा सर्वमिष्टं प्राप्स्यसे इति सर्वत्र रामकृष्णमन्त्रादिषु मन्त्रेणैव होमं कुर्यादिति महता समारम्भेण विधानादेतस्यापि तन्मन्त्रसाम्यात् पूजाजपहोमा अनेनैव विधीयन्ते इति। क्वचिद्भूत्वेति पाठः। तत्रायमर्थः - निश्चलमानसो भूत्वा महतीं सिद्धिं प्राप्स्यसे इति। क्वचित्स्थित्वेति पाठः - स स्पष्टार्थः। सर्वेष्वपि पाठेषु कृत्वेत्येव पाठो मुख्यः, असन्दिग्धार्थत्वात्।

एतस्यैव स्तोत्रमन्त्रस्य सर्वोत्तमतां दर्शयति- अयमेवेति। परः उत्कृष्टः, धर्मः श्रेयःसाधनम्।

एतस्यैव वैदिकमन्त्ररूपतां दर्शयति - नृसिंहमन्त्रादिति।

एतस्यैव सर्वात्मकतां दर्शयति - यदिहेति।

एतस्य सर्वसाधनतां स्पष्टीकरोति - सर्वार्थेति। एतस्य महदेकमन्त्रतया जप्यतां दर्शयितुं प्रमाणादिभिः सम्पुटीकरणं दर्शयति।

व्युग्रं सिंहवदुत्तमाङ्गमुररीकुर्वन्नपि स्वेच्छया
कारुण्यादभयप्रदाननिपुणैरालोकनानां क्रमैः।
आल्हादं निजपादपङ्कजजुषां यः कल्पयत्यन्वहं
प्रह्लादप्रणयी स नोवितनुतां भद्रं परः पूरुषः।।
यो लोकस्य गुरुर्विशारदजना यं भावयन्ते गुरुं
येनैतद्गुरुणोदहारि गुरवे तस्मै नमः सर्वदा ।
यस्माद्वेदपथः स्थिरोऽजनि जने यस्य प्रसादाद्रतिः
यस्मिन्सर्वगुणा गुरौ हृदि सदा तं त्वां नृसिंहं भजे ।।

इति श्रीमल्लक्ष्मीनृसिंहचरणयुगलसरोरुहभ्रमर-
सकलभूमण्डलमण्डन-समस्तयवनाधीश्वरश्रीनिजामशाहसमस्तकरणाधीश्वर -
याज्ञवल्कीयशाखाप्रकाशकापरसूर्य- श्रीदलपतिराजविरचिते श्रीनृसिंहप्रसादे
व्रतसारे **श्रीनृसिंहसहस्त्रनामभाष्यं** सम्पूर्णम् । श्रीः

श्रीनृसिंहसहस्त्रनामावलिः

ॐ ह्री श्रीं ऐं क्ष्रौं
नारसिंहाय
वज्रदंष्ट्राय
वज्रिण
वज्रदेहाय
वज्राय
वज्रनखाय
वासुदेवाय
वन्द्याय
वरदाय
वरात्मने १०
वरदाभयहस्ताय
वराय
वररूपिण
वरेण्याय
वरिष्ठाय
श्रीधराय
प्रह्लादवरदाय
प्रत्यक्षवरदाय
परात्परतरेशाय
पवित्राय २०
पिनाकिन्
पावनाय
प्रसन्नाय
पाशिने
पापहारिणे
परुष्टुताय
पुण्याय
पुरुहूताय
तत्पुरुषाय
तथ्याय ३०
पुराणपुरुषाय
पुरोधसे
पूर्वजाय
पुष्कराक्षाय
पुष्पहासाय
हासाय
महाहासाय
शार्ङ्गिणे
सिंहाय
सिंहराजाय ४०
जगद्वश्याय
अट्टहासाय
रोषाय
जलावासाय
भूतावासाय
भासाय
श्रीनिवासाय
खड्गिने
खड्गजिह्वाय
सिंहाय ५०

खड्गावासाय
मूलाधिवासाय
धर्मवासाय
धन्विने
धनञ्जयाय
धन्याय
मृत्युञ्जयाय
शुभञ्जयाय
सूत्राय
शत्रुञ्जयाय ६०
निरञ्जनाय
नीराय
निर्गुणाय
गुणाय
निष्प्रपञ्चाय
निर्वाणपदाय
निबिडाय
निरालम्बाय
नीलाय
निष्कलाय ७०
कलाय
निमेषाय
निबन्धाय
निमेषगमनाय
निर्द्वन्द्वाय
निराशाय

निश्चयाय
निजाय
निर्मलाय
निधानाय ८०
निर्मोहाय
निराकृते
नित्याय
सत्याय
सत्कर्मनिरताय
सत्यध्वजाय
मुञ्जाय
मुञ्जकेशाय
केशिने
हरिकेशाय ९०
शेषाय
गुडाकेशाय
सुकेशाय
ऊर्ध्वकेशाय
केशिसंहारकाय
जलेशाय
स्थलेशाय
पद्मेशाय
उग्ररूपिणे
कुशेशाय १००
कूलाय
केशवाय

शुक्तिकर्णाय
सुप्ताय
रक्तजिह्वाय
रागिणे
दीप्तरूपाय
दीप्ताय
प्रदीप्ताय
प्रलोभिने ११०
प्रच्छन्नाय
प्रतोदाय
प्रभवे
विभवे
प्रभञ्जनाय
पान्थाय
प्रमाय
प्रमिताय
प्रकाशाय
प्रतापाय
प्रज्वलाय १२०
उज्ज्वलाय
ज्वालामाला-
स्वरूपाय
ज्वलज्जिह्वाय
ज्वालिने
महाज्वालाय
कालाय

कालमूर्तिधराय
कालान्तकाय
कल्पाय
कलनाय १३०
कृते
कालचक्राय
शक्राय
षट्चक्राय
चक्रिणे
अक्रूराय
कृतान्ताय
विक्रमाय
क्रमाय
कृतिने १४०
कृत्तिवासाय
कृतिघ्नाय
कृपात्मने
सङ्क्रमाय
क्रुद्धाय
क्रान्तलोकत्रयाय
अरूपाय
सरूपाय
हरये
परमात्मने १५०
अजेयाय
आदिदेवाय

अक्षयाय
क्षयाय
अघोराय
सुघोराय
घोरघोरतराय
अघोरवीर्याय
ललद्घोराय
घोराध्यक्षाय १६०
दक्षाय
दक्षिणार्हाय
शम्भवे
अमोघाय
गुणौघाय
अनघाय
अघहारिणे
मेघनादाय
मेघाय
मेघात्मने १७०
मेघवाहनरूपाय
मेघश्यामाय
मालिने
व्यालयज्ञोपवीताय
व्याघ्रदेहाय
व्याघ्रपादाय
व्याघ्रकर्मणे
व्यापकाय

विकटास्याय
वीर्याय १८०
विष्टरश्रवसे
विकीर्णनखदंष्ट्राय
नखदंष्ट्रायुधाय
विष्वक्सेनाय
सेनाय
विह्वलाय
चलाय
विरूपाक्षाय
वीराय
विशेषाक्षाय १९०
साक्षिणे
वीतशोकाय
विस्तीर्णवदनाय
विधानाय
विधेयाय
विजयाय
जयाय
विबुधाय
विभावाय
विश्वम्भराय २००
वीतरागाय
विप्राय
विटङ्कनयनाय
विपुलाय

विनीताय
विश्वयोनये
चिदम्बराय
चित्ताय
विकृताय
वियोनये २१०
विह्वलाय
विवाहाय
व्याहृतये
विलासाय
विकल्पाय
महाकल्पाय
बहुकल्पाय
कल्पाय
कल्पातीताय
शिल्पिने २२०
कल्पनाय
सुरूपाय
फणितल्पाय
तडित्प्रभाय
ताक्ष्र्याय
तरुणाय
तरस्विने
तपनाय
तरक्षाय
तापत्रयहराय २३०

तारकाय
तमोघ्नाय
तत्त्वाय
तपस्विने
तक्षकाय
तनुत्राय
तटिने
तरलाय
शतरूपाय
शान्ताय २४०
शतधाराय
शतपत्रायताक्षाय
स्थितये
शतमूर्तये
शतक्रतुस्वरूपाय
शाश्वताय
शतात्मने
सहस्त्रशिरसे
सहस्त्रवदनाय
सहस्त्राक्षाय २५०
देवाय
दिशाश्रोत्राय
सहस्त्रजिह्वाय
महाजिह्वाय
सहस्त्रनामधेयाय
सहस्त्राक्षधराय

सहस्त्रबाहवे
सहस्त्रचरणाय
सहस्त्रार्कप्रकाशाय
सहस्त्रायुध-
धारिणे २६०
स्थूलाय
सूक्ष्माय
सुक्षीणाय
(सुक्षुण्णाय)
सुभिक्षाय
सुराध्यक्षाय
शौरिणे
धर्माध्यक्षाय
धर्माय
लोकाध्यक्षाय
प्रजाध्यक्षाय २७०
शिक्षाय
विपक्षक्षयमूर्तये
कालाध्यक्षाय
तीक्ष्णाय
मूलाध्यक्षाय
अधोक्षजाय
मित्राय
सुमित्रावरुणाय
शत्रुघ्नाय
अविघ्नाय २८०

विघ्नकोटिहराय

रक्षोघ्नाय

मदघ्नाय

भूतघ्नाय

भूतपालाय

भूताय

भूतावासाय

भूतिने

भूतवेतालघाताय

भूताधिपतये २९०

भूतग्रहविनाशाय

भूतसंयमिने

महाभूताय

भृगवे

सर्वभूतात्मने

सर्वारिष्टविनाशाय

सर्वसम्पत्कराय

सर्वाधाराय

सर्वाय

सर्वार्तिहरये ३००

सर्वदुःखप्रशान्ताय

सर्वसौभाग्यदायिने

सर्वज्ञाय

अनन्ताय

सर्वशक्तिधराय

सर्वैश्वर्यप्रदात्रे

सर्वकार्यविधायिने

सर्वज्वरविनाशाय

सर्वरोगापहारिणे

सर्वाभिचारहन्त्रे३१०

सर्वोत्पातविघातिने

पिङ्गाक्षाय

एकशृङ्गाय

द्विशृङ्गाय

अमरीचये

बहुशृङ्गाय

लिङ्गाय

महाशृङ्गाय

माङ्गाल्याय

मनोज्ञाय ३२०

मन्तव्याय

महानसे

महादेवाय

देवाय

मातुलिङ्गधराय

महामायाप्रसूताय

मायिने

जलशायिने

महोदराय

मन्दाय ३३०

मन्ददाय

मदाय

मधुकैटभहन्त्रे

माधवाय

मुरारये

महावीर्याय

धैर्याय

चित्रवीर्याय

चित्रकर्माय

चित्राय ३४०

चित्रभानवे

मायातीताय

मायाय

महावीराय

महातेजाय

बीजाय

तेजोधाम्ने

बीजिने

तेजोमयनृसिंहाय

तेजसां निधये ३५०

महादंष्ट्राय

तुष्टाय

पुष्टिकराय

शिपिविष्टाय

हृष्टाय

(पुष्टाय)

परमेष्ठिने

विशिष्टाय

शिष्टाय	त्रिवर्गाय	अद्भुतकर्मणे
गिरिष्ठाय	त्रिधाम्ने	सद्योजाताय
इष्टदायिने ३६०	त्रिमूलिने	सन्ध्याय ४१०
ज्येष्ठाय	त्रिकालज्ञानरूपाय	वैद्युताय
श्रेष्ठाय	त्रिदेहाय	अध्वातीताय
तुष्टाय	त्रिधात्मने	अध्वाय
अमिततेजसे	त्रिमूर्तिविद्याय	वागतीताय
अष्टाङ्गन्यस्त-	त्रितत्वज्ञानिने ३९०	वाग्मिने
रूपाय	अक्षोभ्याय	वागीश्वराय
सर्वदुष्टान्तकाय	अनिरुद्धाय	गोपाय
वैकुण्ठाय	अप्रमेयाय	गोहिताय
विकुण्ठाय	भानवे	गवाम्पत्ये
केशिकण्ठाय	अमृताय	गन्धर्वाय ४२०
कण्ठीरवाय ३७०	अनन्ताय	गम्भीराय
लुण्ठाय	अमिताय	गभीराय
निःशठाय	अमराय	गर्जिताय
हराय	अपमृत्युविनाशाय	ऊर्जिताय
सत्वोद्रिक्ताय कृष्णाय	अपस्मार-	पर्जन्याय
रजोद्रिक्ताय वेधसे	विघातिने ४००	प्रबुद्धाय
तमोद्रिक्ताय रुद्राय	अन्नदाय	प्रधानपुरुषाय
ऋग्यजुःसामगाय	अन्नरूपाय	पद्माभाय
ऋतध्वजाय	अन्नाय	सुनाभाय
रज्ज्वाय	अन्नभुजे	पद्मनाभाय ४३०
मन्त्रराजाय ३८०	आद्याय	भासिने
मन्त्रिणे	निरविद्याय	पद्मनेत्राय
त्रिनेत्राय	विद्याय	पद्माय

पद्मायाः पतये
पद्मोदराय
पूताय
पद्मकल्पोद्भवाय
हृत्पद्मवासाय
भूपद्मोद्धरणाय
शब्दब्रह्म-
स्वरूपाय ४४०
ब्रह्मरूपधराय
ब्रह्मणे
ब्रह्मरूपाय
ब्रह्मनेत्रे
ब्रह्मादये
ब्राह्मणाय
ब्रह्मणे
ब्रह्मात्मने
सुब्रह्मण्याय
देवाय ४५०
ब्रह्मण्याय
त्रिवेदिने
परब्रह्मस्वरूपाय
पञ्चब्रह्मात्मने
ब्रह्मशिरसे
अश्वशिरसे
अथर्वशिरसे
अशनिप्रमिताय

तीक्ष्णदंष्ट्राय
लोलाय
अललिताय ४६०
लावण्याय
लवित्राय
भासकाय
लक्षणज्ञाय
लक्ष्याय
लक्षणाय
लसद्दीप्ताय
दीप्ताय
विष्णवे
प्रभविष्णवे ४७०
वृष्णिमूलाय
कृष्णाय
श्रीमहाविष्णवे
महासिंहहारिणे
वनमालिने
किरीटिने
कुण्डलिने
सर्वगाय
सर्वतोमुखाय
सर्वतःपाणि-
पादोरवे ४८०
सर्वतोक्षिशिरो-
मुखाय

सर्वेश्वराय
सदातुष्टाय
सत्पथाय
समरप्रियाय
बहुयोजनविस्तीर्णाय
बहुयोजनमायताय
बहुयोजनहस्ताङ्घ्रये
बहुयोजननासिकाय
महारूपाय ४९०
महाचक्राय
महादंष्ट्राय
महाभुजाय
महानादाय
महारौद्राय
महाकायाय
महाबलाय
आनाभेर्ब्रह्मणो
रूपाय
आगलाद्वैष्णवाय
आशीर्षाद्रुद्राय ५००
ईशानाय
सर्वतः शिवाय
नारायणनारसिंहाय
नारायणवीरसिंहाय
नारायणक्रूरसिंहाय
नारायणदिव्यसिंहाय

नारायणव्याघ्रसिंहाय	मासाय ५३०	आत्मज्योतिषे
नारायणपुच्छसिंहाय	(ऋतवे)	सनातनाय
नारायणपूर्णसिंहाय	वत्सराय	ज्योतिर्लोकस्वरूपाय
नारायणरौद्रसिंहाय	युगादये	ज्योतिर्ज्ञाय
भीषणभद्रसिंहाय११	युगभेदाय	ज्योतिषां पत्ये
विव्हलनेत्रसिंहाय	सन्धये	स्वाहाकाराय
बृंहितभूतसिंहाय	युगसन्धये	स्वधाकाराय
निर्मलचित्तसिंहाय	नित्याय	वषट्काराय ५६०
निर्जितकालसिंहाय	नैमित्तिकाय	कृपाकराय
कल्पितकल्पसिंहाय	दैनाय	हन्तकाराय
(कामदकामसिंहाय)	महाप्रलयाय	निराकाराय
भुवनैकसिंहाय	करणाय ५४०	वेगाकाराय
भविष्णवे	कारणाय	शङ्कराय
सहिष्णवे	कर्त्रे	उकारादिहकारान्ताय
भ्राजिष्णवे ५२०	भर्त्रे	ॐकाराय
जिष्णवे	(हर्त्रे)	लोककारकाय
पृथ्व्यै	ईश्वराय	एकात्मने
अन्तरिक्षाय	सत्कर्त्रे	अनेकात्मने ५७०
पर्वताय-	सत्कृतये	चतुरात्मने
अरण्याय	गोप्त्रे	चतुर्भुजाय
कलाकाष्ठा-	सच्चिदानन्द-	चतुर्मूर्तये
विलिप्ताय	विग्रहाय	चतुर्दंष्ट्राय
मुहूर्तप्रहरादिकाय	प्राणिनां प्राणाय	चतुर्वेदमयोत्तमाय
अहोरात्राय	प्रत्यगात्मने ५५०	लोकप्रियाय
त्रिसन्ध्याय	सुज्योतिषे	लोकगुरवे
पक्षाय	परञ्ज्योतिषे	लोकेशाय

क्षणे ५८०
पत्ये
धाराय
कृतागमाय ५९०
अनादये
अनन्ताय
अभूताय
भूतविग्रहाय
स्तुताय
स्तव्याय
स्तुत्याय
स्तवप्रीताय
स्तोत्रे
नेत्रे ६००
नियामकाय
गतये
मतये

पित्रे
मात्रे
गुरवे
सख्ये
सुहृदे
आत्मरूपाय
मन्त्ररूपाय ६१०
अस्त्ररूपाय
बहुरूपाय
रूपाय
पञ्चरूपधराय
भद्ररूपाय
योगाय
योगरूपाय
योगिने
समरूपाय
योगाय ६२०
योगगम्याय
योगपीठस्थिताय
सौम्याय
ध्यानगम्याय
ध्यायिने
ध्येयगम्याय
धाम्ने
धामाधिपतये
धराधराय

धर्म्याय ६३०
धारणाभिरताय
धात्रे
विधात्रे
सन्धात्रे
धराय
दामोदराय
दान्ताय
दानवान्तकराय
संसारवैद्याय
भेषजाय ६४०
सीरध्वजाय
शीताय
वाताय
अप्रमिताय
सारस्वताय
संसारनाशकाय
अक्षमालिने
असिचर्मधराय
षट्कर्मनिरताय
विकर्माय ६५०
सुकर्माय
परकर्मविघातिने
सुशर्मणे
मन्मथाय
सुन्दराय

वर्माय
वर्मिणे
करिचर्मवसानाय
करालवदनाय
कवये ६६०
पद्मगर्भाय
भूगर्भाय
घृणानिधये
ब्रह्मगर्भाय
गर्भाय
(बृहद्गर्भाय)
धूर्जटये
विश्वगर्भाय
श्रीगर्भाय
जितारये
हिरण्यगर्भाय ६७०
हिरण्यकवचाय
हिरण्यवर्णदेहाय
हिरण्याक्षविनाशिने
हिरण्यकशिपोर्हन्त्रे
हिरण्यनयनाय
हिरण्यरेतसे
हिरण्यवदनाय
हिरण्यशृङ्गाय
निस्सङ्गाय
सङ्गिने ६८०

भैरवाय
सुवेषाय
भीषणाय
अन्त्रमालिने
चण्डाय
रुण्डमालाय
दण्डधराय
अखण्डतत्त्वरूपाय
कमण्डलुधराय
दण्डसिंहाय ६९०
सत्यसिंहाय
श्वेतसिंहाय
पीतसिंहाय
नीलसिंहाय
सिंहाय
रक्तसिंहाय
हारिद्रसिंहाय
धूम्रसिंहाय
मूलसिंहाय
मूलाय ७००
बृहत्सिंहाय
पातालस्थितसिंहाय
पर्वतवासिने
जलस्थसिंहाय
अन्तरिक्षस्थिताय
कालाग्निरुद्रसिंहाय

चण्डसिंहाय
अनन्तसिंहसिंहाय
अनन्तगतये
विचित्रसिंहाय ७१०
बहुसिंहस्वरूपिणे
अभयङ्करसिंहाय
नारसिंहाय
सिंहराजाय
नारसिंहाय
सप्ताब्धिमेखलाय
सप्तसामस्वरूपिणे
सप्तलोकान्तरस्थाय
सप्तस्वरमयाय७१९
सप्तार्चिरूपदंष्ट्राय
सप्ताश्वरथरूपिणे
सप्तवायुस्वरूपाय
सप्तच्छन्दोमयाय
स्वच्छाय
स्वच्छरूपाय
स्वच्छन्दाय
श्रीवत्साय
सुवेषाय
श्रुतये
श्रुतिमौलये ७३०
शुचिश्रवाय
शूराय

सुभगाय
सुधन्विने
शुभ्राय
सुरनाथाय
सुप्रभाय
शुभाय
सुदर्शनाय
सूक्ष्माय ७४०
निरुक्ताय
सुप्रभाय
स्वभावाय
भवाय
विभवाय
सुशाखाय
विशाखाय
सुमुखाय
मखाय
सुनखाय ७५०
सुदंष्ट्राय
सुरथाय
सुधाय
साङ्ख्याय
सुरमुख्याय
प्रख्याताय
प्रभाय
खट्वाङ्गहस्ताय

खेटमुद्गरपाणये
खगेन्द्राय ७६०
मृगेन्द्राय
नागेन्द्राय
दृढाय
नागकेयूरहाराय
नागेन्द्राय
अघमर्दिने
नदीवासाय
नग्नाय
नानारूपधराय
नगेश्वराय ७७०
नागाय
नमिताय
नराय
नागान्तकरथाय
नरनारायणाय
मत्स्यस्वरूपाय
कच्छपाय
यज्ञवराहाय
नरसिंहाय
विक्रमाक्रान्तलोकाय
-वामनाय ७८०
महौजसे
भार्गवरामाय
रावणान्तकराय

बलरामाय
कंसप्रध्वंसकारिणे
बुद्धाय
बुद्धरूपाय
तीक्ष्णरूपाय
कल्किने
आत्रेयाय ७९०
अग्निनेत्राय
कपिलाय
द्विजाय
क्षत्राय
पशुपालाय
पशुवक्त्राय
गृहस्थाय
वनस्थाय
यतये
ब्रह्मचारिणे ८००
स्वर्गापवर्गदात्रे
तद्भोक्त्रे
मुमुक्षवे
शालग्रामनिवासाय
क्षीराब्धिनिलयाय
श्रीशैलाद्रिनिवासाय
शिलावासाय
योगिहृत्पद्मवासाय
महाहंसाय

बालग्रहविनाशाय
पिशाचग्रहघातिने
दुष्टग्रहनिहन्त्रे
निग्रहानुग्रहाय ९७०
वृषध्वजाय
वर्ष्याय
वृषाय
वृषभाय
उग्रश्रवाय
शान्ताय
श्रुतिधराय
देवदेवेशाय

मधुसूदनाय
पुण्डरीकाक्षाय९८०
दुरितक्षयाय
करुणासिन्धवे
समितिञ्जयाय
नारसिंहाय
गरुडध्वजाय
यज्ञध्वजाय
कालध्वजाय
जयध्वजाय
अग्निनेत्राय
अमरप्रियाय ९९०

महानेत्राय
भक्तवत्सलाय
धर्मनेत्राय
करुणाकराय
पुण्यनेत्राय
अभीष्टदायकाय
जयसिंहरूपाय
वरसिंहरूपाय
रणसिंहरूपाय
नरसिंहरूपाय १०००

श्रीलक्ष्मीनृसिंह-
सहस्रनामावलिः ।

टिप्पणी

प्रणमामि नृसिंहमग्रगण्यं विदुषां येन विदारितं प्रमाणैः।
प्रतिपक्षसमक्षमेव वक्षोऽविदुषामापि सनातनः प्रमोदः।।

अत्र भाष्यसंशोधनसमये समुपयुक्ताः प्रकाशिताः श्रीनृसिंहसहस्र नामग्रन्थाः सति भेदे प्रदर्शिताः। भगवत्पादीयभाष्यभूषितं श्रीविष्णुसहस्र नामस्तोत्रं, भास्कररायदीक्षितप्रणीतपद्यमयव्याख्यासनाथं श्रीगणपतिसहस्रनाम स्तोत्रञ्चोपयुक्तं विमर्शकानां सौकर्यायोल्लिखितम्। तत्र सङ्केतः. तेषां विवरणञ्चादौ निरूप्यते

उ. - श्रीनृसिंहसहस्रनामस्तोत्रम् संहस्रनामावल्यष्टोत्तरशतनामस्तोत्र सहितम्(१९५५), श्रीमन्मध्वसिद्धान्तग्रन्थालयः, उडुपि. कन्नडलिपिः। नामावलिः १०००

गो. - श्रीलक्ष्मीनृसिंहसहस्रनामस्तोत्रम् नागरीलिपिः गीताप्रेस् गोरखपुर (उत्तरप्रदेश)

द्र० वि० स० - द्रष्टव्यम् विष्णुसहस्रनाम

बे. - सहस्रनामरत्नम् १९७४ बेंगळूरु

म. - मद्रपुर(चेन्नै)प्रकाशितं श्रीनृसिंहसहस्रनामस्तोत्रम्

स्व. - श्रीलक्ष्मीनृसिंहकल्पोक्तपूजाविधिः १९७३ श्रीस्वर्नवल्लीमहासंस्थानम्, सोन्दा, शिरसि। देवनागरीलिपिः। नामावलिः १००८

दलपतिराजेन लिखितं श्रीनृसिंहसहस्रनामभाष्यं व्याकरणविशेष निरूपणेन, तत्र तत्र पुराणेतिहासादिप्रमेयसङ्ग्रहणेन च शोभतेतमाम्। किन्तु

तद्विषयानभिज्ञेन केनचित् लिखितं बहुत्र दोषदूषितमिव प्रतीयते। अत्रत्या अक्षरदोषाः प्रायेण निराकृताः। विषयदोषास्तु केचनाव्याख्यान - अपव्याख्यान- अतिव्याख्यान - अस्थानविवरणादयश्चेत्स्युः, सूरिभिरेव ते निराकार्या इति सप्रश्रयं निवेद्यते।

आरामपल्ली(पु.१३) - अस्ति कर्णाटकप्रान्ते सह्यशिखरिशिरोभागे शिरसिनामकं पत्तनं निकषा कश्चन ग्रामविशेषः, यत्र श्रीलक्ष्मीनृसिंहदेव सान्निध्यं विद्यते, यस्य च हित्लळ्ळि इति सम्प्रति व्यवहारः। तत्र प्रासादे श्रीनरसिंहजयन्त्यादिमहोत्सवे वेदादिवाचनपूर्वकराजोपचारः क्रियते। तदा प्रथमः श्लोक एवमारभ्यते-

श्रीमच्छब्दकदम्बमञ्जुलमहारामाभिधाने पुरे इति।

अनेनावगम्यते, पूर्वं ग्रामस्यास्य आरामपुरमिति नामासीदिति। अधुना कालपर्ययेणायं ग्रामः सम्वृत्तः कन्नडभाषया नामान्तरेण व्यवह्रियत इति।

(पुट.३५) सालोक्येतिश्लोकेन भक्तानां निष्कामता कथिता। सालोक्यं भगवता सहैकस्मिंल्लोके वासः। सार्ष्टिर्भगवत्समानैश्वर्यम्। सामीप्यं भगवन्निकटवर्तित्वम्। सारूप्यं भगवत्समानरूपता। दीयमानमपि चतुर्ष्वेतेषु किञ्चिन्न गृह्णन्ति, कुतस्तत्कामन्नेति कैमुतिकन्यायेन निष्कामता भक्तानामवगम्यते।

देवानामिति श्लोकेनोत्तमां भक्तिं लक्षयति - गुणा विषया लिङ्ग्यन्ते ज्ञायन्ते यैस्ते गुणलिङ्गाः, तेषां गुणलिङ्गानामिति देवानां विशेषणम्। देवा द्योतनात्मकानीन्द्रियाणि तदधिष्ठातारो वा। तेषां सत्त्वे सत्त्वमूर्तौ हरावेव या भक्तिरूपा वृत्तिः, सा सिद्धिरूपमुक्तेर्गरीयसी। स्वाभाविकी अयत्नसिद्धा। निमित्तं कामो न विद्यते यस्याः सा अनिमित्ता निष्कामा। आनुश्रविककर्मणामिति हेतुगर्भं विशेषणम्। तेन देवानमेवंविधवृत्तौ हेतुर्ज्ञायते।

गुरूच्चारणमनु श्रूयत इति अनुश्रवो वेदः। तद्विहितमानुश्रविकं कर्म। तदस्ति येषामिति बहुव्रीहिः। एकमविकृतं मनो यस्य पुंसः, तस्य शुद्धसत्त्वस्य भक्तिरेवंविधा। तस्य मुक्तिः प्रासङ्गिकी भवत्येव। या भक्तिः कोशं लिङ्गशरीरं जरयति क्षपयति। यथा निगीर्णं भुक्तमन्नं जाठरोऽनलो जरयति तथेति प्रयत्नं विनैव सिद्धौ दृष्टान्तः। अहमिति प्रह्लादवचनं सोपाधिक निरुपाधिकभेदेन द्विविधायां भक्तौ निरुपाधिकभक्तिं स्वपरमात्मनोर्दर्शयति। अनपाश्रयो निरुपाधिकः।

(पुट.५१) अत्र चतुर्थ्यन्ततयेति प्रायोवादः, उपक्रमे चतुर्थ्यन्तपदकदम्ब दर्शनात्। अनन्तररन्तु द्वितीयान्त-सम्बुद्ध्यन्त-प्रथमान्त पदान्यपि बहूनि सन्ति। तस्मिन् विषयेऽयं भाष्यकारो मौनमवलम्बते

अखण्डार्थविचारः(ध्यानश्लोके)-

अपर्यायशब्दानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वम् अखण्डार्थत्वम् इति लक्षणं तत्त्वप्रदीपिकायामस्ति(पु.१९५)। अपर्यायशब्दानां संसर्गागोचर प्रमितिजनकत्वमित्यपि तत्रैव पूर्वं दृश्यते(पु.१९२)। प्रकृष्टप्रकाशश्चन्द्र इत्युदाहरणमपि तत्र विवृतम्(पु. १९२, १९६)। एवमत्रत्यो विचारः कार्त्स्न्येन तत्राखण्डार्थत्वनिरूपणसन्दर्भे(१८६-२०२) उपलभ्यते। अत्र वाक्यानां पौर्वापर्यं किञ्चिद् व्यत्यस्तम्। उक्तोत्तरत्वात् इति हेतुस्तत्र नास्ति, किन्तु व्यावर्त्यभेदा दर्थवत्वोपपत्तेः इति स्पष्टमस्ति। अत्र भाष्ये तथा कथितं कुत्रापि न दृश्यत इति प्रायेण दलपतिराजो ग्रन्थान्तरं तत्त्वप्रदीपिकावलम्बि गृहीतवानिति वक्तुं शक्यम्।

नारसिंहाय(१)- नर०- ३, द्र० वि०स० २१, नारसिंहवपुः

वज्राय(५)- द्र गीता १०.२८ आयुधानामहम् वज्रम्

वासुदेवाय(७)- द्र वि०स० ३३२, ६७ , ७०९

वन्द्याय(८)- द्र० गणस.५५

वरदाय(९)- द्र० वि०स० ३३०

वरात्मने(१०)- वरदात्मने -स्व, महात्मने -उ.

वरदाभयहस्ताय(११)- वरदाभय० -स्व, वरदाभयद० -उ

वराय(१२)- वरदाय -उ

वरेण्याय(१४)- द्र० गणस० ५५

श्रीधराय(१६)- वराय -स्व, श्रीवराय -म.गो., श्रीवराय-उ

परात्परतरेशाय(१९)- परेशाय -उ, परात्परेशाय -स्व, द्र० गणस० ५०

पवित्राय(२०)- द्र० वि०स० ६२, पवित्रम्.

पावनाय(२२)- पावमानाय -स्व. द्र० वि०स० २९२

प्रसन्नाय(२३)- द्र० वि०स० २३७, प्रसन्नात्मा

पाशिने(२४)- द्र० गणस० २

पापहारिणे(२५)- वि० स० ९९२, पापनाशनः

पुण्याय(२७)- द्र० वि० स० ९२५,६८७, पुण्यः

पुष्कराक्षाय(३४)- द्र० वि० स० ४०,५५६, पुष्कराक्षः

पुष्पहासाय(३५)- द्र० वि० स० ९५२ पुष्पहासः

शार्ङ्गिणे(३८)- द्र० गणस० २८

सिंहाय(३९)- द्र० वि० स० २००, ४८८, सिंहः

जगद्वश्याय(४१)- जगद्वन्द्याय -उ

रोषाय(४३)- रुष्टाय -उ

जलावासाय(४४)- बला० -उ

भूतावासाय(४५)- द्र० वि० स० ७०८. गणस० ५३.

श्रीनिवासाय(४७)- द्र० वि०स० १८३, ६०७

सिंहाय(५०)- खड्गाय -उ

मूलाधिवासाय(५२)- भूताधि० -स्व.

धन्विने(५४)- द्र० वि०स० ७६, धन्वी.

धनञ्जयाय(५५)- द्र० वि०स० ६६०, धनञ्जयः। पाण्डवानां धनञ्जयः, द्र० गीता १०.३७

धन्याय(५६)- द्र० वि०स० ७५४, धन्यः गणस० ४९.

मृत्युञ्जयाय(५७)- द्र० गणस० १७.

शुभञ्जयाय(५८)- सुभञ्जनाय -उ.

नीराय(६२)- नीलाय -उ

निर्गुणाय(६३)- द्र० वि०स० ८४०, निर्गुणः

निर्वाणपदाय(६६)- ०प्रदाय -स्व

नीलाय(६९)- नित्याय -उ

निष्कलाय(७०)- द्र० गणस० ५०

कलाय(७१)- कलावते -उ. ततो नामत्रयं नास्ति ।

निश्चयाय(७७)- निश्चलाय -उ

निजाय(७८)- निजायाय -उ. निराय -गो. म

निर्मलाय(७९)- द्र० गणस० ५०

निधानाय(८०)- निदा० -उ. निराधाराय -स्व. निबन्धाय -गो. म

निराकृते(८२)- निराधये -उ

नित्याय(८३)- गणस० ५०

सत्याय(८४)- द्र० वि०स० १०६, २१२, ८६९ सत्यः

हरिकेशाय(९०)- हरीशाय -गो.

शेषाय(९१)- केशाय -उ

गुडाकेशाय(९२)- सुधाकेशाय -उ

सुकेशाय(९३)- सङ्केशाय -बे

कुशेशाय(१००)- कुशेशयाय -स्वे

कूलाय(१०१)- कुशलाय -स्व. अनुकूलाय -उ

केशवाय(१०२)- द्र० वि०स० २३, ६४८, केशवः

शक्तिकर्णाय(१०३)- श्रुतिकण्ठाय -उ. सूक्तिकर्णाय -गो

सुप्ताय(१०४)-. शुष्काय -उ. सूक्ताय -गो

रक्तजिह्वाय(१०५)- प्रसुक्ताय -स्व. रक्तसिंहाय -उ

रागिणे(१०६)- शङ्किने -उ

दीप्तरूप्ताय(१०७)- दीप्ताय -स्व

दीप्ताय(१०८)- दीप्तरूपाय -स्व

प्रलाभिने(११०)- प्रबोधिने -उ

प्रच्छन्नाय(१११)- प्रसन्नाय -स्व

प्रतोदाय(११२)- प्रबोधाय -स्व. प्रबुद्धाय -उ

प्रभवे(११३)- द्र० वि०स० ३५,२९९ प्रभुः

विभवे(११४)- द्र० वि०स० २४०, ८५० विभुः

पान्थाय(११६)- पार्थाय -उ

प्रमाय(११७)- प्रेमाय -स्व

प्रमिताय(११८)- प्रकाशाय -स्व. अप्रमिताय -उ

प्रकाशाय(११९)- अप्रमिताय -स्व

उज्ज्वलाय(१२१)- ज्वलाय -म

ज्वालामालास्वरूपाय(१२२)- ज्वालामालाय स्वरूपाय -स्व

ज्वलज्जिह्वाय(१२३)- ज्वालजिह्वाय -स्व. ज्वालसिंहाय -उ

महाज्वालाय(१२५)- ज्वालाय -उ. महोज्वलाय -गो

कालाय(१२६)- द्र० वि०स० ४१

कल्पाय(१२९)- कल्क्याय -स्व.

कलनाय कृते(१३०)- कल्याणाय -स्व. कालात्मकलनाय -उ

शक्राय(१३३)- चक्राय -उ

षट्चक्राय(१३४)- सटाचक्राय -उ. वषट्चक्राय -गो

चक्रिणे(१३५)- द्र० वि०स० ९०८, ९९५, चक्र

अक्रूराय(१३६)- द्र० वि०स० ९१५, अक्रूरः

विक्रमाय((१३८)- द्र० वि०स० ७८, विक्रमः

क्रमाय(१३९)- द्र० वि०स० ७९, क्रम

कृतिघ्नाय(१४२)- कृतज्ञाय -उ

कृपात्मने(१४३)- कृतात्मने -उ

सरूपाय(१४८)- सुरूपाय -स्व

हरये(१४९)- द्र० वि०स० ६५०, हरिः

परमात्मने(१५०)- द्र० वि०स० ११, गणस० ५०, परमात्मा.

अजेयाय(१५१)- अजेशाय -उ. अजयाय -गो

आदिदेवाय(१५२)- द्र० वि०स० ३३४, ४९०, आदिदेवः

अक्षयाय(१५३)- गणस० ३७

घोरघोरतराय(१५७)- घोरा० -स्व.

अघोरवीर्याय(१५८)- घोर० -उ

ललद्घोराय(१५९)- लसत्पूराय -स्व. लसद्० -उ.

दक्षाय(१६१)- घोराय -उ. द्र० वि०स० ४२३, ९१७, दक्षः

दक्षिणार्हाय(१६२)- दक्षिणार्णाय -उ. दक्षिणार्याय -गो

शम्भवे(१६३)- द्र० वि०स० ३८

अमोघाय(१६४)- दिव्याय -उ.

गुणौघाय अनघाय(१६५)- मेघरूपाय -उ. अमोघरूपाय -बे

अघहारिणे(१६७)- मायान्ध्यहारिणे -उ.

मेघनादाय(१६८)- मेघनाथाय नाथाय -उ

व्यापकाय(१७८)- व्याघ्रपाकाय -स्व.

वीर्याय(१८०)- वीराय -स्व., गो

विष्वक्सेनाय(१८४)- द्र० वि०स० १२५. विष्टकेतनाय -स्व

सेनाय(१८५)- सेनान्यै -उ

विह्वलाय(१८६)- विज्वलाय -उ

विरूपाक्षाय(१८८)- द्र० गणस० ११

वीराय(१८९)- द्र० वि०स० ४०१, ६४३, ६५८

विशेषाक्षाय(१९०)- विशेषज्ञाय -उ

साक्षिणे(१९१)- द्र० वि०स० १५, साक्षी

वीतशोकाय(१९२)- ०वीराय -स्व

विस्तीर्णवदनाय(१९३)- ०कदनाय -स्व

विजयाय(१९६)- द्र० वि०स० १४७, ७०८, विजयः

जयाय(१९७)- द्र० वि०स० ५०९, जयः

वीतरागाय(२०१)- वीतरोगाय -उ

विप्राय(२०२)- वीराय -स्व

विटङ्कनयनाय(२०३)- विकटाङ्गधराय -उ

विपुलाय विनीताय(२०४)- विपुलाङ्गविनीताय -उ

विश्वयोनये(२०६)- द्र० वि०स० ११७, १४९
चिदम्बराय(२०७)- विश्वम्भराय -स्व. दिगम्बराय -उ
चित्ताय(२०८)- वीताय -स्व. वित्ताय -गो. दीप्ताय -उ
विकृताय(२०९)- विश्रुताय -उ
विह्वलाय(२२१)- विज्वराय -स्व
विवाहायेत्यारभ्य कल्पायेत्यन्तं नास्ति । -गो.
शिल्पिने(२२०)- कल्पिने -उ
कल्पनाय सुरूपाय(२२१)- कल्पानां मुखरूपाय -उ
फणितल्पाय(२२३)- अनुकल्पादये -उ. नुतकल्पादये -बे
तरस्विने(२२७)- तपस्विने -उ
तपनायेत्यारभ्य नामत्रयं नास्ति । -उ.
तपस्विने(२३४)- तरस्विने -उ
तनुत्राय(२३६)- तनुत्रयाय -स्व
तटिने(२३७)- वटवे -उ
तरलायेत्यनन्तरं तरक्षवे, तापनाय , तापत्रयहराय चेत्यधिकम् । -उ
शतधाराय(२४१)- शान्त्याधाराय -उ
शतपत्रायताक्षाय(२४२)- शतपत्राय तायांस० -उ. ०तक्षाय -स्व
शतमूर्तये(२४४)- द्र० वि०स० ७२३
शाश्वताय(२४६)- द्र० वि०स० ५६ शाश्वतः
स्थूलाय(२६०)- द्र० वि०स० ८३८ स्थूलः
सुक्षीणाय(२६२)- सुक्षुण्णाय-गो. ततः सुभिक्षायेत्यधिकम् ।-उ.
सुराध्यक्षाय(२६५)- सूर्याध्यक्षाय-उ. द्र० वि०स० १३४ सुराध्यक्ष
शौरिणे(२६६)- शालिने-उ. द्र० गणस० २८

धर्माध्यक्षाय(२६७)- द्र० वि०स० १३५ धर्माध्यक्षः

धर्माय(२६८)- द्र० वि०स० ४०३ धर्मः

लोकाध्यक्षाय(२६९)- रोगा०-उ. द्र० वि०स० १३३ लोकाध्यक्षः

शिक्षाय(२७१)- स्वक्षाय-उ

विपक्षक्षयमूर्तये(२७२)- अविपक्षाय सुमूर्तये-उ

सुमित्रावरुणाय(२७८)- सुमित्रा० -स्व.गो. सुमित्राय अरुणाय-उ

शत्रुघ्नाय(२७९)- द्र० वि०स० ४१

अविघ्नाय(२८०)- सुमित्राय-उ

मदघ्नाय(२८३)- तमोघ्नाय-गो. अकृतघ्नाय-उ

भूतघ्नाय(२८४)- भूतज्ञाय-उ. ततः ज्येष्ठाय शुक्लाय नीलवस्त्रधराय रक्तमाल्यविभूषाय रक्तगन्धानुलेपिने धुरन्धराय धूर्ताय दुर्दर्शाय इत्यधिकम्। -उ

भूतपालाय भूताय(२८५)- भूतपालाधिवासाय -उ

भूतिने(२८८)- नास्ति -उ

भूतसंयमिने(२९२)- भूति० -उ.

महाभूताय(२९३)- द्र० वि० स० ८०५ महाभूतः

सर्वभूतात्मने(२९५)- द्र० वि० स० ८ भूतात्मा

सर्वार्तिहरये(३००)- ०हराय -स्व. सर्वादि० -उ.

सर्वदुःखप्रशान्ताय(३०१)- ०प्रशमनाय -बे.

सर्वज्ञाय(३०३)- द्र० वि०स० ४५३, ८१५ सर्वज्ञः गणस० ५६

अनन्ताय(३०४)- द्र० वि०स० ६५९, ८८६ अनन्तः

सर्वाभिचारसंहन्त्रे(३१०)- ०चारहन्त्रे -स्व. सर्वखेचरहन्त्रे -उ

सर्वोत्पातविघातिने(३११)- ०निघातिने -उ. सर्वैश्वर्यविधायिने -गो

अमरीचये(३१५)- मरीचये -उ

बहुशृङ्गाय(३१६)- द्र० वि०स० ७६३ नैकशृङ्गाय

लिङ्गाय(३१७)- शृङ्गाय -उ

महाशृङ्गाय(३१९)- द्र० वि०स० ५३६ महाशृङ्गः

महानसे(३२२)- महात्मने -उ

महादेवाय(३२३)- द्र० वि०स० ४९१ महादेवः

देवाय(३२४)- द्र० वि०स० ३७५ देवः

मातुलिङ्गधराय(३२५)- मातुलुङ्ग० -उ. द्र० गणस० २९

